BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

G. THIBAUT, PH. D.

No. 137.

चतुर्विंशतिमतसंग्रहः ।

श्रीभट्टोजिदीक्षितसंकलितः ।

साहित्योपाध्यायेन नेपालदेशीयदेवीदत्तपराजुलिना

संशोधितः ।

CHATURVINŚATIMATASANGRAHA,

By PANDIT BHAṬṬOJI DÎKSHITA,

EDITED BY

SÂHITYOPÂDHYÂYA NEPALI PANDIT DEVIDATTA PARÂJULI.

Fasciculus I.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,

BENARES.

1907.

सूचीपत्रम् ।

	रु०	आना	पा०
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकर्मीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला –))	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वासिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	१	०
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	२	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	८	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

॥ श्रीमहागणपतये नमः ॥

चतुर्विंशतिमतसंग्रहः ।

सर्वज्ञः सकलेश्वरः श्रुतिगिरां तात्पर्यभूमिः परा
द्वैतध्वान्तविधूननैकपटुभिः स्वान्ते चिरं चिन्तितः ॥
तेषामात्मतयैव योऽद्वयवपुर्विद्योतते स्वप्रभः
स्वेच्छोपात्तमनोहराकृतिममुं श्रीबालकृष्णं नुमः ॥ १ ॥
विबुधसुरमुनीन्द्रैर्वन्दितं यत्पदाब्जं
सकलजगदुपात्तानन्तरायान् लुनाति ॥
प्रथितविभव ईशो मत्कृतेर्विघ्नपूगं
शमयतु स गणानामग्रणीर्विघ्नराजः ॥ २ ॥
बालभावमवलम्ब्य भारतीं प्रार्थये किमपि काङ्क्षितं मुहुः ॥
यत्त्वदीयपदपल्लवद्वयं मामकीनरसनातिथिर्भवेत् ॥ ३ ॥
नत्वा शास्त्रार्थतत्त्वज्ञानहं कुर्वे यथामति ॥
श्रीचतुर्विंशतिमतस्मृतेर्व्याख्यानमादरात् ॥ ४ ॥

श्रीमन्वादिचतुर्विंशतिमतं संजिघृक्षुः कश्चित्तच्छिष्यो निर्विघ्नसमाप्तिफलकं मङ्गलं शिष्यशिक्षार्थं मुनिकर्तृकतयैवोपनिबध्नन्नाभिधेयं प्रदर्शयति—

सर्वात्मने नमस्कृत्य ब्रह्मणेऽमिततेजसे ॥
धर्मानूचुस्त्रिवेदोक्तान् स्वर्गादिफलदायकान् ॥

धर्मानूचुरिति मन्वाद्या इति शेषः । ते चानुपदमेव वक्ष्यन्ते । पौरुषेयत्वेप्यस्य ग्रन्थस्य वेदमूलत्वाद्धर्मे प्रामाण्यमित्याशयेन धर्मान् विशिनष्टि । त्रिवेदोक्तानिति । यद्यपि समाहारद्विगौ त्रिवेदीत्यपेक्षितं न च

विशेषणं विशेष्येणेति कर्मधारयः दिक्संख्ये संज्ञायामिति नियमात् । तथापि अवयवो वेद इति मध्यमपदलोपी समासः । वेदशब्दस्तत्संघातलक्षकः । यथा चैतत्तथा द्विगोर्लुगनपत्य इति सूत्रे भाष्यादौ स्फुटम् ॥

के मन्वादय इत्याकाङ्क्षायामाह—

मनुना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा ।
विष्णुना च वसिष्ठेन व्यासेनोशनसा तथा ॥
आपस्तम्बेन वत्सेन हारीतगुरुनारदैः ।
पराशरेण गर्गेण गौतमेन यमेन च ॥
शातातपेन शङ्खेन संवर्त्तेन तथैव च ।
बौधायनेन सांख्येन दक्षेणाङ्गिरसा तथा ॥
चतुर्विंशतिभिः शास्त्रं दृष्टं लोकहिते रतैः ।
धर्मसंरक्षणार्थाय संक्षेपेण महात्मभिः ॥

एतैश्चतुर्विंशतिभिः शास्त्रं वक्ष्यमाणं दृष्टमित्यन्वयः । किमर्थं तत्राह संक्षेपेण अल्पायासेनैव धर्मस्य सम्यग्रक्षणमेवार्थः प्रयोजनं तस्मै रक्षणं चेह शाब्दोनुभवः। नन्वसौ आशुविनाशित्वात्कथं कालान्तरभाविकर्मानुष्ठाने उपयुज्यतामित्याशङ्क्याह—

एतज्ज्ञात्वा द्विजः शीघ्रं धर्मं स्मरति तत्त्वतः ।
तस्मात्सर्वप्रयत्नेन शास्त्रमेतदुदीरयेत् ॥

द्विजस्त्रैवर्णिकः । तथा च स्मरणद्वारा उपयुज्यत इति भावः । उदीरयेत् अध्यापयेदित्यर्थः । अत्र च ब्राह्मण एव अधिकारी बोध्यः। तदुक्तं मनुना—

विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केन चिदिति ॥

यद्यपि अध्ययनं त्रैवर्णिकसाधारणं तथापि अध्यापनं ब्राह्मणेनैव कार्यमित्यर्थः । अध्यापकब्राह्मणालाभे तु

मनुरेवाह—

अब्राह्मणादध्ययनमापत्काले विधीयते ।

अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोरिति ॥

अत्राध्यापनमपि अर्थादनुज्ञानमिति तद्व्याख्यातारः । अध्ययनस्य त्रैवर्णिकसाधारण्यं तु मनुनोक्तम्–

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।

तस्य शास्त्रेधिकारोस्मिन् ज्ञेयो नान्यस्य कस्यचिदिति ॥

शास्त्रमुदीरयेदित्युक्तं तद्विशिनष्टि–

वर्णानामाश्रमाणां च ह्याचारकथनं शुभम् ॥

आचाराः कथ्यन्तेऽस्मिन्नित्याचारकथनम् । इदानीं संदर्भशुद्ध्यनुरोधे मूले वक्ष्यमाणानि वचनानि स्मृत्यन्तरस्थानि कानि चिदुपसंहृत्यावश्यकाः षोडश प्राच्याः संस्कारा व्युत्पाद्यन्ते । ते च गर्भाधान, पुंसवना, नवलोभन, सीमन्तोन्नयन, जातकर्म, नामकरण, निष्क्रमणा, न्नप्राशन, चौलो, पनयनानि, चत्वारि वेदव्रतानि प्रतिशाखं गृह्यसूक्तानि स्नानं, विवाहश्चेति । अत्रापि गर्भाधानाद्याः उपनयनान्ता एव सर्वेषां नियताः न तु स्नानाद्याः । तेन ब्रह्मचर्यादेव प्रव्रजेदित्यादि न विरुध्यते । एते च द्विजानामेव समन्त्रकाः ।

यदाह याज्ञवल्क्यः–

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।

निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रिया इति ॥

वैशब्द एवकारार्थः । अत्र तेषामेव क्रिया इति वदन् शूद्रस्यामन्त्रकाः क्रिया इति दर्शयति अत एव संस्कारानधिकृत्य

यमः–

शूद्रोप्येवंविधः कार्यो विना मन्त्रेण संस्कृत इति ॥

तत्र ऋतौ गर्भाधानं कार्यम् । रजः प्रभृतिषोडशरात्रान्त ऋतुकालः । तदुक्तं याज्ञवल्क्येन–

षोडशर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।

ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेदिति ॥

युग्मासु निशासु निशास्विति दिवसानिषेधार्थम् ॥

तथाचाथर्वणश्रुतिः–

प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तत् यद्रात्रौ संयज्यन्त इति ॥

शङ्खलिखितावपि–

नार्त्तवेपि दिवा व्रजेदिति युग्मास्विति बहुवचनं समुच्चयार्थम् । अतश्चैकास्मिन्नप्यृतावप्रतिषिद्धासु युग्मासु सर्वासु रात्रिषु गच्छेत् युग्मग्रहणं च पुत्रार्थम् ।

तदाह मनुः–

युग्मासु पुत्रा जायन्ते स्त्रियोऽ युग्मासु रात्रिष्विति ।

अत्र च ऋतौ गच्छेदेवेति नियमविधिः, न ऋतावेवेति परिसंख्या दोषत्रयापत्तेः । यत्र श्राद्धादिषु ब्रह्मचर्यं विहितं तत्राप्यृतौ गच्छतो न दोष इत्याह ब्रह्मचार्येवेति विज्ञानेश्वरः । वस्तुतस्तु ब्रह्मचर्यमेव तत् । यद्रात्रौ संयुज्यते इति प्रागुदाहृताथर्वणश्रुतिस्थब्रह्मचर्यपदवदिदमपि अर्थवादमात्रमित्युचितम् । तथा च श्राद्धकर्तृभोक्त्रोर्ब्रह्मचर्यमृतावप्यावश्यकमिति प्रतिज्ञाय माधवाचार्यैर्वृद्धमनुवचनमुदाहृतम्–

ऋतुकालं नियुक्तो वा नैव गच्छेत्स्त्रियं क्वचित् ।

तत्रागच्छन् समाप्नोति त्यनिष्टफलमेव त्विति ॥

सूतकादौ तु ऋतावगमनेप्यदोषः ।

तदाहोपमन्युः–

सूतके बन्धने विप्रो हव्यकव्यादिवर्जितः ।

नैनसा लिप्यते तद्वदृतावगमनादपीति ॥

पर्वाणीति बहुवचनबलात् पर्वादीनामित्यर्थः । तेनाष्टमीचतुर्दश्योर्ग्रहणम् ।

यदाह मनुः–

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ।

ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विज इति ॥

आद्या इति । अत्र चतुर्थदिवसे गमनं वैकल्पिकम् । विहितप्रतिषिद्धत्वात् ।

तथाच हारीतः-

चतुर्थेऽहनि स्नातायां युग्मासु गर्भाधानमिति विधौ । निषेधस्तु चतुर्थे सा न गन्तव्येति व्यासोक्तः ॥ व्यवस्थितश्चायं विकल्पः । रजोनिवृत्तौ चतुर्थ्यां विधिः। तदनुवृत्तौ तु प्रतिषेध इति ॥

तथाच मनुः —

रजस्युपरते साध्वी स्नानेन स्त्री रजस्वलेति ॥

साध्वी गर्भाधानयोग्येत्यर्थ इति माधवः ।

आपस्तम्बोपि-

स्नानं रजस्वलायास्तु चतुर्थेहानि शस्यते ।

गम्या निवृत्ते रजसि नानिवृत्ते कथं चनेति ॥

गमनं चैकस्यां रात्रौ सकृदेव तदुक्तम्-

एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् ।

स्वस्थ इन्दौ सकृत्पूज्यं लक्षण्यं जनयेत्पुमानिति ॥

अत्र क्षामता रजस्वलाव्रतजन्या । अल्पाऽस्निग्धभोजनादिना वा कर्त्तव्या ।

तदाह बृहस्पतिः-

स्त्रियाः शुक्रे धिके स्त्री स्यात्पुमान् पुंसोधिके भवेत् ।

तस्माच्छुक्राविवृद्ध्यर्थं स्निग्धं भक्ष्यं प्रकल्पयेत् ॥

लघ्वाहारां स्त्रियं कुर्यादेवं संजनयेत्सुतमिति ॥

नियमान्तरमाह याज्ञवल्क्यः-

यथा कामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति ॥

अनृतावपि स्त्रीकामनायां सत्यां स्त्रियं रमयेदेवेत्यर्थः ।

इदं च पर्वादिव्यतिरेकेण ।

तथा च विष्णुपुराणे तृतीयेंशे—

इति मत्वा स्वदारेषु ऋतुमत्सु नरो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वनृतावपीति ॥

एवं चानृतौ गमननिषेधपराणि वचनानि स्त्रियाः कामनाविरहे बोध्यानि अनृतौ गमनं तु निषेधबौधायनः—

ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति ।
तुल्यमाहुस्तयोः पापं अयोनौ यश्च सिञ्चतीति ॥

तथा महाभारते—

विसस्तैन्यशपथप्रसङ्गेऽनृतौ गच्छतो यो दोषः स ममास्तु इत्यसकृदुक्तम्।

अत्रिः—

षण्मासान् कामयेन् मर्त्यो गर्भिणीं स्त्रियमेव हि ।
आदन्तजन्मनादूर्ध्वमेव धर्मो न हीयते इति ॥

ऊर्ध्वं प्रसूतेरूर्ध्वं बालस्य दन्तजननं मर्यादीकृत्येत्यर्थः । स्त्रीणां वरमिति इन्द्रेण दत्तामिति भावः । तथाच श्रुतिः—

ता अब्रुवन् वरं वृणामहे ऋत्वियात्प्रजां विन्दामहै काममाभिजनितोः संभवामेति तस्मादृत्वियात्स्त्रियः प्रजां विन्दन्ते काममाविजनितोः सम्भवन्ति वारे वृतं ह्यासामिति । विश्वरूपनाम्नः पुरोहितस्य वधादिन्द्रस्य ब्रह्महत्यायां सत्यां तत्तृतीयांशं रजोरूपेण परिणतं स्वीकुर्वन्त्यः स्त्रिय इन्द्रमब्रुवन् ऋत्वियात् ऋतुकालीनात्पुरुषसम्बन्धात् आविजनितोः प्रसवपर्यन्तं सम्भवन्त्यनुभवन्ति वारे वरसंबन्धिनि वचने ।

इति गर्भाधानप्रकरणम् ॥

अथ पुंसवनम् ।

गर्भामासप्रभृतितृतीयमासे गर्भाभिव्यक्तौ सत्यां तत्रैवानभिव्यक्तौ तु चतुर्थे मासि कार्यम् । अनवलोभनं तु चतुर्थे इति स्मृत्यर्थसारैः। तृतीये चतुर्थे षष्ठेष्टमे वा मासे शुक्रसोमबुधगुरुवारेषु पुंसवनानवलोभने कुर्युरित्यन्ये ॥ अत्र नियतकालत्वाद् गुरुशुक्रास्तबालवार्द्ध-

कमलमासादिष्वपि न दोषः ॥ अस्तादिरहितकाललाभे तु शुक्रास्तादौ न कार्य्यम् । सीमन्तदिने वा कार्य्ये ।

अथ सीमन्तोन्नयनम् ।

तच्च गर्भसापेक्षया तृतीये चतुर्थे पञ्चमे षष्ठे सप्तमेऽष्टमे वा मासि ।
तथाच लौगाक्षिः—तृतीये गर्भमासे सीमन्तोन्नयनं कार्यमिति ।
तथा आश्वलायनः—चतुर्थे गर्भमासे सीमन्तोन्नयनं षष्ठेऽष्टमे वेति ।
बैजवापः—अथ सीमन्तोन्नयनं चतुर्थे पञ्चमे षष्ठे वेति ।

सांख्यायगृह्ये सप्तमे मासि प्रथमे गर्भे सीमन्तोन्नयनामिति । एतेष्वसंभवे तु यावत्प्रसवं कार्यम् ।

तथाच शङ्खः—यावद्वा न प्रसव इति । अत्रापि शुक्रास्तादिकालान्तरासंभवे न दोषः ॥ इदं च प्रतिगर्भं नावर्त्तते ॥

तथाच हारीतः—

सकृत्तु कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेदिति ॥

विष्णुना यन्मतान्तरमप्युक्तम्—

सीमन्तोन्नयनं कर्म न स्त्रीसंस्कार इष्यते ।
केचिद्गर्भस्य संस्काराद्गर्भे गर्भे प्रयुञ्जते इति ॥

तत्कृतेऽभ्युदयइत्येवं परम् ।

तथाचाश्वलायनस्मृतौ—

प्रतिगर्भं बलिः कार्यः सीमन्तश्च प्रशस्यत इति ॥

बलिर्विष्णुबलिः गर्भाष्टमे मासे कार्यः ॥ इदं च-

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ।

इति वचनमाश्रित्य गृह्यसूत्रानुक्तेरिदानीं नाचरन्ति ।

अकृतसीमन्तायाः प्रसवे तु विशेषः सत्यव्रतेनोक्तः—

स्त्री यद्यकृतसीमन्ता प्रसूयेत कथंचन ।
पुत्रं गृहीत्वा विधिवत्पुनः संस्कारमर्हतीति ॥
सीमन्तानन्तरं नियमविशेषः स्मर्यते—
नदीप्रतरणं चैव शकटारोहणं तथा ।
उग्रौषधं तथा क्षारं मैथुनं भारवाहनम् ॥
कृते पुंसवने चैतद्गर्भिणी परिवर्जयेदिति ॥

अथ जातकर्म ।

जातमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादावुदङ्मुखः स्नात्वा तदसंभवे दिवाऽऽहृताभिः शीताभिः अद्भिः सुवर्णयुताभिः गृह एव स्नात्वा नालच्छेदात्पूर्वं वृद्धिश्राद्धं हेम्ना कृत्वा जातकर्मदानादि कुर्यात् ।

प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते ।

मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषामिति मनुस्मृतेः ॥ इदं च रात्रौ संध्यायां ग्रहणे जाताशौचान्तरमध्येपि कार्यम् ॥ मृताशौचमध्ये जातश्चेत्तदैव वा आशौचान्ते वा कार्यम् ॥

तदुक्तं विष्णुधर्मोत्तरे—

आशौचोपरमे कार्यमथवा नियतात्मभिरिति ।

पितरि ग्रामान्तरगते सति पितृव्यादिर्गोत्रजो ज्येष्ठक्रमेणेदं कुर्यात् । आदित्यपुराणे विशेष उक्तः—

तत्र दद्यात्सुवर्णं तु भूमिं गास्तुरगं रथम् ।
छत्रं छागं च माल्यं च शयनं वसनं गृहम् ॥
यावन्न च्छिद्यते नालं तावद्दद्यात्स्वशक्तित इति ॥

शङ्खोपि—

सर्वेषां च सकुल्यानां द्विपदचतुष्पदधान्यहिरण्यानि दद्यादिति ॥

अथ नामकरणम् ।

तच्च जातकर्मानन्तरमेव वा एकादशे द्वादशेऽष्टादशेऽन्हि संवत्सरे

वा अन्यस्मिन् वा शुभेन्हि कार्यम् ॥ नाम चास्मै दद्युरिति गृह्यस्थ-चकारस्वरसेन जातकर्मसमानकालीनताभावात् ॥

तथा च मनुः—

नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेदिति ॥

दशम्यामतीतायामित्यर्थः । दशम्युत्तरकाल इति यावत् इति महाभाष्ये पस्पशान्हिके स्फुटम् ॥ तथा विष्णुरपि—आशौचापगमे नामधेयमिति ।

तथा विष्णुपुराणेपि—

ततस्तु नाम कुर्वीत पितैव दशमेऽहनि इति ॥

भविष्योत्तरेपि—

नामधेयं दशम्यां च केचिदिच्छन्ति पार्थिव ।
द्वादश्यामथ वा रात्रौ मासे पूर्णे तथापरे ॥
अष्टादशेहनि तथा वदन्त्यन्ये मनीषिण इति ॥

गृह्यपरिशिष्टे—

जननादशरात्रे व्युष्टे दशरात्रे संवत्सरे वा नामकरणमिति ॥ अत्र स्वगृह्यानुरोधेन व्यवस्थितेति माधवः । अत्र नियतकालेपि विष्टि-वैधृतिव्यतीपातग्रहणसंक्रान्तिश्राद्धादिने निषेधः । गुरुशुक्रास्तमलमासादिनिषेधस्तु नास्ति । नियतकालातिक्रमे तु सोप्यस्तीत्यन्यत्र विस्तरः । अत्र जातकर्मवत्पित्राद्याः क्रमेण कर्त्तारः ॥

अथ निष्क्रमणम् ॥

तच्च चन्द्रदर्शनं सूर्यदर्शनं वा देवतानमस्कारात्मकं वा द्वादशेऽह्नि तृतीये वा मासि चतुर्थे वा कुर्यात् ॥

तथाच स्कान्दे—

द्वादशेऽहनि राजेन्द्र शिशोर्निष्क्रमणं गृहादिति ॥

यमस्तु—

ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनमिति ॥

याज्ञवल्क्यस्त्वाह— चतुर्थे मासि निष्क्रम इति ॥

अथान्नप्राशनम् ॥

तच्च षष्ठे मास्यष्टमे वा दन्ते जाते वा कार्यम् ॥

तथाच याज्ञवल्क्यः— षष्ठेन्नप्राशनं मासीति ॥

यमः—अष्टमे वापि कर्त्तव्यमिति ॥

लौगाक्षिः—षष्ठे मासेऽन्नप्राशनं जातेषु वेति ॥

शङ्खस्तु—संवत्सरेऽन्नप्राशनं अर्द्धसंवत्सरे इत्येके इति ॥

अथ चूडाकर्म ॥

तच्च प्रथमे द्वितीये पञ्चमे सप्तमे वाऽष्टमे उपनीत्या सह वा यथाकुलाचारं कार्यम् ॥

तथाच यमः—

ततः संवत्सरे पूर्णे चूडाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्त्तव्यं श्रुतिदर्शनादिति ॥

शङ्खः—तृतीये वर्षे चूडाकर्म पञ्चमे वेति ।

कारिकायाम्—

यथाकुलं च केषांचिदुपनीत्या सहेष्यते इति ॥

यदि गर्भाधानादिसंस्कारलोपस्तदा प्रायश्चित्तं कृत्वा कालात्ययनिमित्तं प्रायश्चित्तहोमं च कृत्वा चौलहोमः कार्यः ॥

तदाह भगवान् शौनकः—

आरभ्याधानमाचौलात्काले नीते तु कर्मणाम् ।
व्याहृत्याऽऽज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमम् ॥

कार्यमिति शेषः । प्रायश्चित्तं च सएवाह—

एतेष्वेकैकलोपेपि पादकृच्छ्रं समाचरेत् ।
चूडाया अर्द्धकृच्छ्रं स्यादापदि त्वेवमीरितम् ॥
अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् ॥

मनुः

जातकर्मादिसंस्काराः स्वकाले न भवन्ति चेत् ।
चौलादर्वाक् प्रकुर्वीत प्रायश्चित्तादनन्तरमिति ॥
प्रायश्चित्तहोमे कृते तत्कर्म कृताकृतम् ।

तथाच कारिका–

प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ।
कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चित इति ॥

प्रायश्चित्तहोमस्तु प्रधानहोमात्पूर्वं समस्ताभिर्व्याहृतिभिः प्रतिकर्मेक पमेकैकाज्याहुतिः कार्येति । चूडाहोमश्च लौकिकेऽग्नौ । तस्य सभ्य इति नाम ॥ चूडायां विशेषः स्मर्यते–

मध्येशिरसि चूडा स्याद्वाशिष्ठानां तु दक्षिणे ।
उभयोः पार्श्वयोरत्रिकश्यपानां शिखा मता ॥

लौगाक्षिस्तु–

दक्षिणतः कुमुजा वसिष्ठाना,मुभयतोऽत्रिकश्यपानां, मुण्डा भृगवः, पञ्चचूडा आङ्गिरसः, मण्डलोर्ध्वशिखिनोन्ये यथाकुलधर्मं वे ति ॥ कुमुजा केशपङ्क्तिः । तथा विशेषान्तरमाह ज्योतिर्नारदः–

शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ।
पञ्चमाब्दादथोर्ध्वं तु गर्भिण्यामपि कारयेत्॥
सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते ॥

तथा

भिन्नभार्यासुतस्येह न दोषश्चौलकर्मणि इति ॥

एते च संस्काराः स्त्रीणाममन्त्रकाः कार्याः होमस्तु समन्त्रक इति स्मृत्यर्थसारादौ—उपनयनात्प्राग्बाला उच्छिष्टादावप्रयता न स्युः कामचारवादभक्षश्च ॥

तथाच गौतमः–प्रागुपनयनात्कामचारवादभक्ष इति॥ कामचारः इच्छागतिः । कामवादोऽश्लीलादिभाषणम् । कामभक्षः पर्युषादि-भक्षणम् । लशुनादिभक्षणं चेति हरदत्तः । इदं च महापातकवर्जमिति ।

स्मृत्यर्थसारे स्मर्यते च—

स्यात्कामचारभक्ष्योक्तिर्महतः पातकादृते इति ॥

नैषां चाण्डालादिस्पर्शे सचैलस्नानम्। प्रागन्नप्राशनादभ्युक्षणम्। प्राक्चौलादाचमनं पश्चात्स्नानमित्येके। गौतमः—न तदुपस्पर्शनादशौचमिति। तस्य अकृतोपनयनस्य उदक्यादिस्पृष्टस्य स्पर्शनान्नाऽशौचं तेन स्नानं न कर्त्तव्यमित्यर्थ इति हरदत्तः। षष्ठवर्षादूर्ध्वं तु स्नानं कर्त्तव्यमिति स एव। अनुपनीताः पित्रोः स्वधानिनयनादृते मन्त्रान् न ब्रूयुः। तथाच गौतमः—न ब्रह्माभिव्याहरेदन्यत्र स्वधानिनयनादिति।

मनुरपि—

न ह्यस्मिन् विद्यते कर्म किंचिदामौञ्जिबन्धनात्।

नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते ॥ इति

स्वधानिनयनादिति पित्र्यस्य सर्वस्य कर्मण उपलक्षणम्। अन्यत्रोदककर्मस्वधापितृसंयुक्तेभ्य इति वृद्धवसिष्ठोक्तेः। अगृहीताक्षरः पुत्रः पित्रोः संस्कारमर्हतीत्यादिस्मृत्यन्तराच्चेति हरदत्तः। अक्षराभ्यासं तु कुर्युः। तदाह मार्कण्डेयः—

प्राप्तेऽथ पञ्चमे वर्षे विद्यारम्भं तु कारयेत्।

ततःप्रभृत्यनध्यायान् वर्जनीयान् विवर्जयेत् ॥

अष्टमीद्वितयं चैव पक्षान्ते च दिनत्रयमिति।

नृसिंहोऽपि—

अक्षरस्वीकृतिः प्रोक्ता प्राप्ते पञ्चमहायने इति ॥

नानेतान् चौलान्तान् संस्कारान् प्रतिपादयितुं प्रायश्चित्तकाण्डशेषे मूलम्—

जाते पुत्रे जातकर्म नाम चैकादशेऽहनि।

चतुर्थे निष्क्रमो मासि षष्ठेऽन्नप्राशनं मतम् ॥

चूडाकर्म तृतीयेऽब्दे कुलधर्मेण वा तथेति ॥

अथोपनयनम् ॥

तत्र मूलम्—

गर्भाष्टमोऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् ।

एकादशे क्षत्रियस्य वैश्यस्य द्वादशे स्मृतमिति ॥

उपनयनमेवोपनायनं स्वार्थेऽणिति विज्ञानेश्वरः। एवं तु उत्तर पदवृद्धिर्दुर्लभा पूर्वपदे च प्रवर्त्तेत । नच नयनशब्दादेवाणि पश्चादुप शब्देनसमासः। गतेः प्राक् सुबुत्पत्तेः समासात् सुबुत्पत्तिं विना च तद्धितोत्पत्त्ययोगात् । धातूपसर्गयोगस्यान्तरङ्गत्वाच्च प्रज्ञादिष्वपाठाच्च । तस्माण्णिजन्ताल्ल्युडित्येव युक्तम् ॥ तथाच भर्तृहरिः—

निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते इति ॥

णेरणाविति सूत्रे भाष्यादौ स्फुटमेतत् ॥ अत्र समासे गुणभूतस्यापि उत्तरत्रानुषङ्गेण गर्भादेकादशे गर्भादेव द्वादशे इति च बोध्यम् ॥ तथाच्च मनुः—

गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश इति ॥

काम्योपनयने कालविशेषमाह मनुरेव—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।

राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥

विष्णुः—

षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे ।

अष्टमे सर्वकामस्य नवमे कान्तिमिच्छतः ॥

इदं च त्रैवर्णिकाविषयं तथाच संग्रहे—

सप्तमे वाष्टमे वर्षे नवमे दशमे तथा ।

एकादशे द्वादशे वा स्युरुपनेया द्विजातयः ॥

ब्रह्मवर्चसमायुष्यं तेजोऽन्नाद्यं तथेन्द्रियम् ।

पशून् कामयमाना वै प्राप्नुवन्ति यथाक्रममिति ॥

आपस्तम्बोऽपि—सप्तमे ब्रह्मवर्चसकाम,मष्टमे आयुष्कामं, नवमे तेजस्कामं, दशमेऽन्नाद्यकाम, मेकादशे इन्द्रियकामं, द्वादशे पशुकाम, मिति । गुरुशुक्रादिशुभग्रहबलालाभे प्रकारान्तरेण वा प्रतिबन्धे सती

पञ्चमाब्दमारभ्याषोडशाद्द्वाविंशादाचतुर्विंशाद्विप्रादीनां क्रमेण कार्यम्। अत ऊर्ध्वं सावित्रीपतिता व्रात्याः स्युस्तेषामचीर्णप्रायश्चित्तानामुपनयनं न कार्यमित्याहुर्मूले।

आषोडशाच्चाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
सावित्रीपतिता ऊर्ध्वं विज्ञेयास्ते द्विजाधमा इति॥

अत्र वत्सरादित्यनन्तरमुपनेया इत्यस्यानुषङ्गः। द्विजाधमा इति। नचेत्प्रायश्चित्तमनुतिष्ठन्तीति भावः।

तथाच याज्ञवल्क्यः—

आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥
अतऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतो रिति॥

व्रात्यस्तोमाख्ये क्रतौ कृते सति तु उपनयनाधिकारिणो भवन्तीत्यर्थः॥

ज्योतिर्नृसिंहेण विशेष उक्तः—

उत्तरायणगे सूर्ये कर्त्तव्यं त्वौपनायनमिति॥

गृह्येपि—उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहा इति। श्रुतिः— वसन्ते ब्राह्मणमुपनयीत।

वराहः—

माघादिपञ्चमासेषु मेखलाबन्धनं शिशोः।
ज्येष्ठमासे न ज्येष्ठस्य जन्ममासे न सर्वेषाम्॥

बृहस्पतिः—

शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विनेति।
भृगोरङ्गिरसो मौढ्ये कर्त्तव्यं नोपनायनमिति च॥

भृगुः शुक्रः। अङ्गिराः गुरुः।

ज्योतिर्नृसिंहोपि—

तृतीया पञ्चमी षष्ठी द्वितीया वापि सप्तमी।

पक्षयोरुभयोश्चैव विशेषेणैव पूजिताः ॥
कृष्णे त्रयोदशीं केचित् इच्छन्ति मुनयस्तथा ॥
संग्रहे—
रिक्ताष्टमीपर्वतिथीननध्यायांश्च वर्जयेदिति ॥
अनध्याया नित्या नैमित्तिकाश्च । अत्र क्वचित्प्रतिप्रसवमाह भरद्वाजः—
या चैत्रवैशाखसिते तृतीया माघे च सप्तम्यथ फाल्गुनस्य ।
कृष्णे द्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वाजमुनीन्द्रमुख्यैरिति ॥
वसिष्ठसंज्योतिःफलोदये—
ज्येष्ठे द्वितीयासितजाश्विने तु दशम्यथो माघसिता चतुर्थी ।
सद्वादशी सामगबव्हृचाभ्यां त्याज्यास्त्विमाःसोपपदा व्रतादाविति॥
अपरार्के—
नष्टे चन्द्रेऽष्टमे शुक्रे निरंशे चैव भास्करे ।
कर्त्तव्यं नोपनयनं नानध्याये गलग्रहे ॥
निरंशलक्षणम्—
राहोः प्रथमराशिस्थो निरंशः सूर्य उच्यते इति ।
गलग्रहश्च ज्योतिर्निबन्धे—
त्रयोदशीचतुष्कं तु सप्तम्यादित्रयं तथा ।
चतुर्थी चैव सम्प्रोक्ता अष्टावेते गलग्रहा इति ॥
गलग्रहस्यापवादमाह भरद्वाजः—
विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे ।
उपनीतस्त्वनध्याये पुनः संकारमर्हतीति ।
वसन्ततौं ऋत्वन्तरीयशुक्लपक्षे च गलग्रहो न दोषायेति फलितोर्थः॥
संस्कार्यविशेष उक्तः स्मृत्यर्थसारे—
षण्ढान्धबधिरस्तब्धजडगद्गदपङ्गुषु ।
कुब्जवामनरोग्यार्त्तशुष्कांङ्गिविकलाङ्गिषु ॥
मत्तोन्मत्तेषु मूकेषु शनयस्थे निरिन्द्रिये ।

ध्वस्तपुंस्त्वेपि चैतेषु संस्काराः स्युर्यथोचितम् ॥

मूकोन्मत्तौ न संस्कार्यावित्येके । कर्मस्वनधिकारात्पातित्यं नास्ति तदपत्यं संस्कार्यम् । अन्ये संस्कार्या इत्याहुः ॥ होमं तावदाचार्यः करोति । उपनयनं च विधिना आचार्यसमीपनयनं वा अग्निसमीपनयनं वा सावित्रीवाचनं वा । अन्यदङ्गं यथाशक्ति कार्यम् । विवाहश्च कन्यास्वीकारः, अन्यदङ्गमिति ॥

केचिदाहुर्द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ ।
अमृते च मृते पत्यौ जारजौ कुण्डगोलकाविति ॥

ब्रह्मपुराणे—षण्ढादीनुपक्रम्योक्तम् ।

ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् ।
संस्कारमन्त्रहोमादीन् करोत्याचार्य एव तु ॥
उपनेयांश्च विधिवदाचार्यः स्वसमीपतः ।
आनीयाग्निसमीपं वा सावित्रीं संस्पृशन् जपेत् ॥
कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेदिति ।

अत एव तेषां विवाहप्रसक्तिसत्त्वात्तत्कनीयसां परिवेदनदोषापवादो वक्ष्यते ।

उपनेतृक्रममाह वृद्धगर्गः—

पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः ।
उपायनेधिकारी स्यात्पूर्वाभावे परः परः ॥

तथा—

पितैवोपनयेत्पुत्रं तदभावे पितुः पिता ।
तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥

आश्वलायनः—

एकमातृप्रसूतानां कन्या वा पुत्रकौ तयोः ।
सहोद्वाहं न कुर्वीत तथैव व्रतबन्धनमिति ॥

अधिकारसिद्धये प्रायश्चित्तमाह विष्णुः—

कृच्छ्रत्रयं चोपनेता त्रीन् कृच्छ्रांश्च वटुश्चरेत् ।
सावित्रीमभ्यसेदग्निपवित्राणि च संस्मरन् ॥
सहस्रं द्वादशाख्यं च सावित्रीं प्रजपेत् बुधः ।
स्वाधिकारार्थमेवास्य प्रदानार्थं हि तत्स्मृतमिति ॥

तथा

नान्दीश्राद्धे कृते पश्चादनध्यायस्त्वकालिकः ।
मौञ्जीबन्धं ततः कुर्याद्वेदारम्भं न कारयेत् ॥

अकालिकः गर्जनिर्घातादिनिमित्तकः यदि भवेदिति शेषः । आश्वलायनानामुपनयनादिने वेदारम्भाभावाद्वेदारम्भाकरणं यजुर्वेदिविषयम् । आश्वलायनस्तु वृद्धिश्राद्धदिनादिनषट्कमध्ये मुहूर्त्तान्तरे सति तेनैव नान्दीश्राद्धेन तत्र उपनयनं कुर्यात् । तदुक्तम्–

एकविंशत्यहो यज्ञे विवाहे दश वासराः ।
त्रिषट् चौलोपनयने नान्दीश्राद्धं प्रचक्षत इति ।

तदूर्ध्वे तु मुहूर्त्ते श्राद्धान्तरपूर्वकमुपनयनं यथाकालं कुर्यात् । यदा गर्जाद्यनध्यायशङ्का तदा नैव अनुप्रवचनीयचरुं श्रपयेत् । होमस्तु सायंसंध्योत्तरमेव । तथा सति नानध्यायदोषः । तदुक्तं संग्रहे–

न संध्यागर्जिते काले न वृष्ट्युत्पातदूषिते ।
ब्रह्मौदनं पचेदग्नौ पक्वं चेन्न निवर्त्तते ॥

तथा

ब्रह्मौदनं पचेदह्नि पक्वमन्नं न दुष्यति ॥

तथा चोपनयनानुप्रवचनीयचरुश्रपणयोरन्तरानध्याये पुनरुपनयम् । पुनरुपनयने निमित्तान्तराण्याह मनुः–

अज्ञानात्प्राश्य विण्मूत्रं सुरां संस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातय इति ॥

विष्णुरपि–

विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु च प्रायश्चित्तान्ते पुनः संस्कारं

कुर्यादिति ।

तथा बौधायनः—

सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हतीति ॥

शाखारण्डोपि स्वशाखाग्रहणकाले पुनरुपनेयः । इममर्थं पुनरुपनयने विधिविशेषञ्च कारिकाकार आह—

वेदान्तरमधीत्यैव ऋग्वेदं ये त्वधीयते ।
उपनीतिरियं तेषामलङ्करणवर्जिता ॥
यद्वैतदुपनीतस्य प्रायश्चित्तं यदा पतेत् ।
कृताकृतं च वपनं मेधाजननमेव च ॥
मेधाजननसद्भावे व्रतचर्या भवेदिह ।
अनुप्रवचनीयश्च तदभावे द्वयं नच ॥
परिदानं न कार्यं स्यान्निमित्तानन्तरं त्विदम् ।
पूर्वस्याः वाचयेत्स्थाने तत्सवितुर्वृणीमहे इति ॥

पूर्वस्याः गायत्र्याः । तथाच गृह्यम्—तत्सवितुर्वृणीमहे इति सावित्रीमिति ॥

अथ ब्रह्मचारिधर्माः ।

यमः—

मेखलासहितं दण्डमुपवीतं च नित्यशः ।
कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥
अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम् ।
आसमावर्त्तनात्कुर्यात्कृतोपनयनो द्विज इति ॥

यद्यपि कौपीनं कुत्सित इति पाणिनिसूत्रे कौपीनशब्दस्य लिङ्गे शक्तिरुक्ता तथापि तदाच्छादनवाससि निरूढलक्षणेति भाष्यादौ स्थितम् ॥ उपाकरणपर्यन्तं वटुः सावित्र्या ब्रह्मयज्ञकमिति कारिकावचनात् ।

मनुः—

वर्जयेन्मधुमांसं च गन्धमाल्यरसान् स्त्रियः ।
शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् ॥
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधं च लोभं च नर्त्तनं गीतवादनम् ॥
द्यूतं च जनवादं च परिवादं तथाऽनृतम् ।
एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् इति ॥

मधु क्षौद्रमिति विज्ञानेश्वरः । मांसं छागादेरपि । रसो हर्षः । शुक्तानि निष्ठुरवाक्यानि । उपानद् यानस्याप्युपलक्षणम् ॥ यानोपानच्छत्रेत्यादि गौतमवचनात् । नारायणस्तु— रसा उत्कटरसा गुडादयः शृङ्गारादयो वा । यद् द्रव्यमनम्लं सत् कालवशेन द्रव्यान्तरयोगेन वा अम्लतां गतं तच्छुक्तम् । सर्वाणि शुक्तानि दध्यादीन्यपि ॥ नत्वत्र शुक्ता वागिति व्याचख्यौ ॥

याज्ञवल्क्योपि—

भास्करालोकनाऽश्लीलपरिवादांश्च वर्जयेदिति ।

गौतमोपि— नादित्यमीक्षेतेति ॥ ब्रह्मचारिणोऽयं सदा आदित्यदर्शनप्रतिषेधः । स्नातकस्य तु नेक्षेतोद्यन्तमादित्यमित्यादिमनूक्तो विशेषनिषेधो बोद्धव्य इति हरदत्तः । विज्ञानेश्वरस्तु—उदितास्तमितादित्यविषयकतामेव ब्रह्मचारिणामपि मन्यते । तदुत्सर्गे त्विति सूत्रे मीमांसाग्रन्थेष्वप्येवमेव स्थितम् ।

कूर्मपुराणे—

नादर्शं चैव वीक्ष्येत नाचरेद्दन्तधावनम् ।
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत, न कामत इति ॥

गुरूच्छिष्टमिति । पितुर्ज्येष्ठभ्रातुश्चेत्यर्थः । तथाचापस्तम्बः— पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यमिति ॥

गुरोर्गुरौ सन्निहिते गुरुवद् वृत्तिमाचरेत् ।
गुरुपुत्रेषु पत्नीषु गुरोश्चैव स्वबन्धुषु ॥

इति वचनात् । यद्यपि भेषजार्थमिति । तदेकापनोद्ये व्याधौ माक्षिकं मांसादि च गुरूच्छिष्टं भक्षणीयमित्यर्थः । इदं च माधवीये स्मृत्यर्थसारादौ च स्फुटम् ।

वशिष्ठोपि—स चेद्व्याधीयीत कामं गुरोरुच्छिष्टशेषमौषधार्थं सर्वं प्राश्नीयादिति । व्याधीयीत व्याधिमान् स्यादिति मदनपारिजाते । गुरुवद् गुरुपुत्रेषु वर्त्तितव्यमिति तदुच्छिष्टभक्षणमपि प्राप्तं तथापि तन्निषेधति मनुः—

उन्मर्दनं तु गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥

तथा

अभ्यञ्जनं स्नापनं च गात्रोद्वर्त्तनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनमिति ॥

व्यासः–

जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनि ।
यच्च शिष्येण कर्त्तव्यं यच्च दासेन वा पुनः ॥
कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत्तु पार्श्वत इति ॥

प्रचेताः–

ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् इति ॥

हारीतः–लौहे मृन्मये वा पात्रे भुञ्जीतेति ॥

मेखलायां विशेषमाह मनुः–

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवीति ॥

मुञ्जास्तृणविशेषाः तत्कृता मौञ्जी । मूर्वा लताविशेषस्तत्प्रभवा मौर्वी ।

मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥

अत्र ग्रन्थिविकल्पः प्रवरसंख्याभेदेन व्यवस्थितः ।

दण्डानाह मनुः—

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैप्पलोदुम्बरौ वैश्यो दण्डानर्हति धर्मत इति ॥

अनुकल्पमाह यमः—

एतेषामप्यभावे तु सर्वेषां सर्वयज्ञिया इति ।

दण्डपरिमाणमाह मनुः—

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।
ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विश इति ॥

गौतमोऽपि—मूर्द्धललाटनासाग्रप्रमाण इति ॥

दण्डलक्षणमाह मनुः—

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिता इति ॥

यज्ञोपवीतमाह मनुः—

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्वकृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकम् ॥

शणसूत्रमयं क्षौमम् । पैठीनसिः—कार्पासमुपवीतं ब्राह्मणस्य क्षौमं राजन्यस्य आविकं वैश्यस्येति ॥ क्षुमा अतसी तस्याः शणः क्षौमम् । उक्तोपवीतानामलाभे गोवालादिकं ग्राह्यम् ॥

तदाह देवलः—

कार्पासक्षौमगोवालशाणवल्कतृणादिकम् ।
सदा संभवतः कार्यमुपवीतं द्विजातिभिरिति ॥

ऋष्यशृङ्गः—अपिवाससी यज्ञोपवीतार्थे कुर्यात्तदभावे त्रिवृता सूत्रेणेति । तच्च नवतन्तुकं कार्यम् ।

तदाह देवलः—

यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम् ।

नवतन्तुकं नवगुणम् ।

कात्यायनः–

त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतमिति ।

ऊर्ध्ववृतलक्षणमाह संग्रहकारः—

करेण दक्षिणेनोर्ध्वं गतेन त्रिगुणीकृतम् ।

वलितं मानवे सूत्रं शास्त्र ऊर्ध्ववृतं स्मृतमिति ॥

ऊर्ध्वं स्थितेन दक्षिणेन करेण यद्वलितं तदूर्ध्ववृतमित्यर्थः ॥

कात्यायनः–

त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यत इति ।

यज्ञोपवीतपरिमाणमाह सएव–

पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।

तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितमिति ॥

देवलः—

स्तनादूर्ध्वमधो नाभेर्न कर्त्तव्यं कथञ्चन ।

स्तनादूर्ध्वं श्रियं हन्ति नाभ्यधस्तात्तपःक्षयः ॥

एतच्च न प्रमाणपरम् । अपिधारणपरेण परमतो न पूर्ववचनेन विरोध इति गौडनिबन्धे ॥

धारणीयोपवीतसंख्यामाह भृगुः—

उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते ।

एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ॥

एतच्च नित्याभिप्रायम् ॥ बहुषु कामनाश्रवणात् ॥

तदाह देवलः–बहूनित्यायुष्कामस्येति ॥

स्मृत्यन्तरे–

यज्ञोपवीते द्वे धार्ये दैवपित्र्योश्च कर्मणि ।

तृतीयमुत्तरीयार्थे आयुष्कामो बहून्यपीति ॥

कात्यायनः, भृगुश्च–

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतमिति ॥
अत्र पूर्वार्द्धेन पुरुषार्थता अपरार्द्धेन क्रत्वर्थता लभ्यते ।
उपवीतधारणमन्त्रमाह देवलः—
यज्ञोपवीतमिति वा व्याहृत्या वापि धारयेदिति ॥
शिखायां विशेषमाह कौथुमिः—
शिखिवच्छिखया भाव्यं ब्रह्मावर्त्तनिबद्धया ।
प्रदक्षिणं द्विरावर्त्त्य पाशान्तः संप्रवेशनात् ॥
प्रथमं द्विगुणं कृत्वा ब्रह्मावर्त्तमितीरितम् ।
गायत्रीजपनं कुर्याच्छिखायाश्च निबन्धने इति ॥
उपवीते विशेषमाह देवलः—
सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् ।
सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत् ॥
विच्छिन्नं चाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेदिति ॥
यज्ञोपवीतादीनां त्रोटनादौ प्रतिपत्तिमाह मनुः—
मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रत इति ॥

अथोत्तरीयम् ।

मनुः—
कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥
बास्तं छागीयम् । कार्ष्णादीन्युत्तरीयाणि शाणादीन्यन्तरीयाणि ।
तथाच शङ्खः —कृष्णरुरुबस्ताजिनान्युत्तरीयाणीति । बासिष्ठोपि— कृष्णाजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्य । गव्यं बस्ताजिनं वा वैश्यस्येति । तथा पारस्करः— ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्य । आजं गव्यं वा वैश्यस्य । सर्वेषां वायव्य-

मिति । यद्यप्येण्या ढञिति स्त्रीप्रत्ययान्तादेव ढञ् विहितः

तथा चामरः–

ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु इति ॥

तथापि एणचर्मणा सह एणीचर्मणि विकल्प इति केचित् ।

यमः– सर्वेषां वा रौरवाजिनमिति । रुरुश्चित्रमृगः ।

आग्नेये–

मार्गवैयाघ्रवास्तानि चर्माणि ब्रह्मचारिणामिति ॥

बस्तश्छागः ।

अन्तरीयाण्याह गौतमः–वासांसि शाणक्षौमचीरकुतपाः सर्वेषामिति। शणस्य विकारः शाणः। क्षुमा अतसी तद्विकारः क्षौमम् । श्वेतपट्ट इत्यन्ये। दर्भादिनिर्मितं चीरम्। ऊर्णानिर्मितः कम्बलः कुतपः । चत्वार्येतानि वासांसि सर्वेषामिति हरदत्तः ।

पक्षान्तरमाह गौतमः– कार्पासं वा अविकृतमिति । अविकृतं कुसुम्भादिना अरक्तम् । वासः सर्वेषामित्यनुवर्तते। मतान्तरमाह गौतमः– काषायमप्येके । तत्रापि नियममाह सएव । वार्क्षं ब्राह्मणस्य ॥ माञ्जिष्ठहारिद्रे इतरयोः । वृक्षकषायेण रक्तं वार्क्षं ब्राह्मणस्य । माञ्जिष्ठ्या रक्तं हरिद्रया च रक्तमितरयोः क्षत्रियवैश्ययोरित्यर्थः ॥

मनुः–

वसीरन्नानुपूर्व्येण शणक्षौमाविकानि चेति ॥

वासिष्ठः—शुक्लमहतं वासो ब्राह्मणस्य कार्पासं माञ्जिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्येति ॥

अहतलक्षणमाह प्रचेताः—

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।

अहतं तद्विजानीयात्सर्वकर्मसु पावनमिति ॥

अथाग्नीन्धनम्—

तदकरणे प्रत्यवायमाह हारीतः–

अकृत्वा भैक्ष्यचरणं असमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति ॥

पावकसमिन्धनं समिद्धोमः । सायंप्रातः समिधमादध्यादिति गृह्यवचनात् ॥ केचित्तु सायमेवेच्छन्ति । तथाच लौगाक्षिः– सायमेवाग्निमिन्धत इत्येके इति ॥

तत्र समिल्लक्षणमाह कात्यायनः–

नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका नोना तथा न स्याद्विशाखिका ॥

वायुपुराणे–

पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः ।
शमीरोहितकाश्वत्थास्तदभावेऽर्कवैतसाविति ॥

अग्निकार्याकरणे प्रायश्चित्तमुक्तमृग्विधाने–

मानस्तोके जपेन्मन्त्रं शतसंख्यं शिवालये ।
अग्निकार्यं विना भुक्तौ न पापं ब्रह्मचारिण इति ॥

तत्र कालमाह कारिकाकारः–

अग्निकार्यं च भिक्षायाः प्रागूर्ध्वं वा तदिष्यत इति ॥

याज्ञवल्क्यः–

प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु ।
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ॥
संध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ।
अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपीति ॥

अथोपसंग्रहणाभिवादनप्रपञ्चः ।

तत्र मनुः–

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥

असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ।
भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोभिवादने इति ॥

अमुकगोत्रो देवदत्तशर्माहं भो अभिवादयइत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां गुरोः पादौ गृहीत्वा शिरोवनमनमुपसंग्रहणम् । अभिवादने तु पादग्रहणं नास्ति ॥ पादस्पर्शनमात्रमपि कृताकृतामिति स्मृत्यर्थसारः । अभिवादनवाक्ये चाभिवादये इत्यस्यान्ते प्रयोगो गाय-त्र्यभिवाद[illegible]ः । तथाच तदेवाधिकृत्याह भरद्वाजः—

सगोत्रनामशर्माहं भवत्यन्तेभिवादये ।
इत्येतद्भाषणं यत्तन्मन्त्रेस्यादभिवादनमिति ॥

अन्यत्र अभिवादये देवदत्तनामाहमस्मि भो इति प्रयोक्तव्यम् ॥

तदाह मनुः—

अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ।
असौनामाहमस्मीति स्वनाम परिकीर्त्तयेत् ॥
भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोभिवादन इति ॥

अभिवादात्परम् अभिवादयेशब्दस्योपरीत्यर्थ इति पारिजात-कारादयः

मनुः—

निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥
अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तयेति ॥

याज्ञवल्क्यः—

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय ददद्वेदमाचार्यः स उदाहृतः ॥
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथा पूर्वमेभ्यो माता गरीयसीति ॥

गौतमस्तु मतान्तरमप्याह—आचार्यः श्रेष्ठो गुरूणां मातेत्येके इति। गुरूणां पित्रादीनां मध्ये आचार्यः उक्तलक्षणः श्रेष्ठः ॥ स हि विद्यातस्तं जनयति । तच्च श्रेष्ठं जन्म तेनानेकगुरुसमवाये स एव प्रथमं पूज्यः । एके स्वाचार्या माता पूज्येत्याहुः ॥

तथाच वासिष्ठः—

उपाध्यायाद्दशाचार्या आचार्याणां शतं पिता ।
पितुर्दशशतं माता गौरवेणातिरिच्यते इति ॥

मातेत्यादि द्विरुक्तिरध्यायपरिसमाप्त्यर्थमिति हरदत्तः ।

मनुः —

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
ब्राह्मस्य जन्मनः कर्त्ता स्वधर्मस्य च शासिता ॥
बालोपि विप्रो वृद्धस्य पिता भवति धर्मतः ।
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ॥
असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ।
मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ॥
भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि ॥
मातृवद् वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥

माता ताभ्यइति । तेन तासामुपकारे क्रियमाणे यदि मातुरनिष्टं स्यात्तदा न कार्यमित्युक्तं भवति इति नारायणः ।

त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु ॥

त्र्यब्दपूर्वं कालोत्पन्नतया यो ज्येष्ठः तद्विषयत्वादभिवानेऽपि त्र्यब्दपूर्वम् । त्रिवर्षपूर्वः श्रोत्रियोऽभिवाद्य इति फलितोर्थः । स्वयोनिषु । ज्ञातिबन्धुषु । स्वल्पेनापि कालेन एकदिनपूर्वत्वेनापि ज्येष्ठतायामभिवादनमित्यर्थः । तदुक्तं वयस्यः समानेऽह्नि जात इति । संध्या-

कालाभिवादने तु विशेषमाह पारिजाते यमः—

ज्यायानपि कनीयांसं संध्यायामभिवादयेत् ।
विना पुत्रं च शिष्यं च दौहित्रं दुहितुः पतिमिति ॥

अभिवादनवाक्ये विशेषमाह मनुः—

नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोहमिति ब्रूयात् स्त्रियः सर्वास्तथैव चेति ॥

नामधेयस्याभिवादं नामधेयसहिताभिवादनवाक्यार्थं संस्कृतानभिज्ञतया धर्मशास्त्राज्ञानेन च ये न जानते विशिष्य न जानन्ति तान् प्रत्यभिवादनवाक्यज्ञानपि अहमित्येव ब्रूयात् । अभिवादनवाक्यरूपशब्दस्यैवानेन निवृत्तिः सजातीयत्वात् । पादोपसंग्रहणस्य त्वनिवृत्तिः । तथा अभिवादनवाक्यार्थं जानाना अपि मातृष्वस्रादिस्त्रियोऽहमित्येव वदेत् इति नारायणो व्याचख्यौ । संस्कृतादिज्ञानवतोपि प्रत्यभिवादनप्रकाराज्ञानेऽनभिवाद्यतामाह मनुः—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

प्रत्यभिवादनं अभिवादनप्रतियोगिवाक्यम् । तल्लक्षणं च मनुराह-

'आयुष्मान् भव सौम्ये' ति वाच्यो विप्रोभिवादने ।
अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥

आयुष्मान्भव सौम्य शिवशर्म ३न् अ इत्यादि वाच्यमित्यर्थः । यदा तु पूर्वाक्षरं संध्यक्षरं भवति तदा एकारस्य आइ ऐकारस्य चैवम्, ओकारस्य औकारस्य च आउ इत्यादेशं कुर्यात् । हराइअ वटाउअ इति यथा । तथाच पाणिनिः-एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुताविति अधिकृत्य प्रत्यभिवादे शूद्र इति आह । वसिष्ठश्च—आमन्त्रिते स्वरोऽन्त्यः प्लवते । संध्यक्षरमप्रगृह्यम् । आयावुभावं चापद्यते इति । इदं च वाक्ये संहिताया अनित्यत्वादुक्तम् । संहिताविवक्षायां तु तयोर्यावचि संहितायामित्यस्य प्रवृत्तौ, हराय वटाव इत्यादि

बोध्यमिति हरदत्तः । माधवाचार्यास्तु ॥ नाम्नोन्ते स्थित आकारः प्लुतो वाच्य इत्यर्थः । आकार इति अच उपलक्षणम् ॥ पूर्वमक्षरं यस्य स तथा । अक्षरमिह व्यञ्जनं सामार्थ्यात् । तथाच आयुष्मान् भव सौम्य देवदत्ता३ इति प्रयोगः । न त्वकारोप्यपूर्वो विधीयते वाक्यभेदापत्तेरित्याहुः । इदमेव व्याख्याद्वैधमभिप्रेत्य स्मृत्यर्थसारेपि प्रत्यभिवादनवाक्यं द्वेधा दर्शितामिति दिक् । यस्तु त्रिवर्षपूर्वत्वादिगुणशून्यत्वादनभिवाद्यस्तस्मिन् दृष्टे यत्कार्यं तदाह मनुः—

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति ॥

ब्राह्मणादीनां स्वस्वजातीये दृष्टे स्वस्वजात्युक्तं तथा स्वस्वावरजातीये तत्तज्जात्युक्तं न त्वेतदवरजातेरुत्तमं प्रति इति नारायणः । प्रत्यभिवादनाभिधानानन्तरमभिवादितेन गुर्वादिना एतत्प्रष्टव्यामित्यपि केचिदाहुः ॥

मनुः—

न वाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् ॥
परपत्नी तु या स्त्री स्यादसंबद्धा तु योनितः ।
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च ॥

यावद्दीक्षासमाप्तिः तावदेव नाम न ग्राह्यमिति नारायणः । ननु परपत्नीति व्यर्थः स्वपत्नीव्यवच्छेदस्य गार्हस्थ्य एव संभवेन ब्रह्मचारिप्रकरणे ऽनुपयोगादिति चेत् सत्यम् । एतदेव ज्ञापकं एतत्प्रकरणस्था विधयः स्नातकादिषु संभविनस्तैरप्यनुष्ठेया इति नारायणः । अत एव स्मृत्यर्थसारेपि गुर्वादय उपसंग्राह्या इत्याद्युक्त्वा समावृत्तेन चेत्युक्तम् । तथाच गौतमेनापि तृतीयेऽध्याये उक्तम् । उत्तरेषां चैतदविरोधीति । एतद् ब्रह्मचारिणामुक्तम् । द्यूतनिषेधादि उत्तरेषामप्याश्रमाणां भवति । विशेषवचनैर्यन्न विरुध्यते इति हरदत्तः । अत्र हरदत्तकृतमेव व्या-

ख्यानान्तरम् । उत्तरेषां यद्धर्मजातं तदप्येतस्य बोध्यमिति । तेनाविरुद्धा गृहस्थादिधर्मा अपि ब्रह्मचारिणां प्राप्यन्ते । तथा स्मृत्यर्थसारे--

मत्तं प्रमत्तमुन्मत्तं धावन्तमशुचिं नरम् ।
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम् ॥
अभ्यक्तशिरसं स्नानं कुर्वन्तं नाभिवादयेत् ।
जपयज्ञगणस्थं च समित्पुष्पकुशानलान् ॥
उदपात्र्यार्घ्यभैक्षान्नं वहन्तं नाभिवादयेत् ।
अभिवाद्य द्विजश्चैतान् अहोरात्रेण शुध्यति ॥
देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ॥
सर्वे वापि नमस्कार्याः सर्वावस्थासु सर्वदा ।
आशीर्वाच्या नमस्कार्यैर्वयस्यस्तु पुनर्नमेत् ॥
स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ॥ इति ।

याज्ञवल्क्यः--

गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः ।
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥

विष्णुपुराणेपि--

उभे संध्ये रविं भूप ! तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्याद् गुरोरप्यभिवादनम् ॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरः स्थित इति ॥

वेदमिति । स्वशाखामित्यर्थः । तदाह वसिष्ठः--

पारम्पर्यागतो येषां वेदः सपरिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथेति ॥

सपरिबृंहणः साङ्गोपाङ्गः । स्वशाखापरित्यागं स एव निषेधति--

स्वीयशाखोज्झिता येन ब्रह्म तेनोज्झितं परम् ।
ब्रह्महैव स विज्ञेयः सद्भिर्नित्यं विगर्हित इति ॥

स्वशाखाध्ययनानन्तरं तु शाखान्तराध्ययनेऽभ्युदयः ॥ तथाच वसिष्ठः—

अधीत्य शाखामात्मीयां परशाखां ततः पठेदिति ।

तथा कूर्मे—

योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः ।
स वै मूढो न संभाष्यो वेदबाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण संतुष्टो वै भवेद् द्विजः ।
पाठमात्रावसायी तु पङ्के गौरिव सीदति ॥
योधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतान्न प्रपद्यते इति ॥

मूले—

योऽनधीत्य द्विजो मोहादन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
अनभ्यासेन वेदानामाचारस्य च लङ्घनात् ।
आलस्य[अन्न]दोषाच्च मृत्युर्विप्रान् जिघांसति ॥
पठित्वा बोधयेदर्थं वेदानां कर्मसिद्धये ।
पाठमात्रावसायी तु पङ्के गौरिव सीदति ॥
हतं ज्ञानं क्रियाहीनं हतास्त्वज्ञानतः क्रियाः ।
अपश्यन्नन्धको दग्धः पश्यन्नपि हि पङ्गुक इति ॥

स्फुटोर्थः । तथा धर्मशास्त्रमप्यध्येतव्यम् । तदाह बृहस्पतिः—

वेदमध्यापयेत्पश्चाच्छास्त्रं मन्वादिकं तथेति ॥

नारदः—

पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ ।
भ्राजते न सभामध्ये जारगर्भ इव स्त्रिय इति ॥

मनुः—

नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।

न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेदिति ॥

न स्वप्यादित्यर्थः । शिक्षायाम्-

हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुः सामभिर्दग्धो वियोनिमधिगच्छतीति ॥

व्यासः—

अनध्यायेष्वधीतं यद्यच्च शूद्रस्य संनिधौ ।
प्रतिग्रहनिमित्तं च नरकाय तदुच्यते इति ॥

अत्र यद्यपि संपूर्णशाखाध्ययनमावश्यकं तथा आपत्काले एकदेशाध्ययनेनापि निर्वाहः । तदाह मनुः-

यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत् ।
ब्रह्म छन्दस्कृतं चैव द्विजो युक्तो ह्यनापदीति ॥

छन्दस्कृतं मन्त्रभागं । छन्दोबद्धत्वात् ब्रह्म इति ब्राह्मणमित्यर्थः मन्त्राणां साक्षात्कर्माङ्गतयान्तरङ्गत्वात् । यथाविधि गृहीतानामेव च विनियोगार्हत्वात् । ब्राह्मणस्य तूपदेशमात्रार्थतया बहिरङ्गत्वादशक्तेन मन्त्रमात्रमध्येयं शक्तेन तूभयमपीत्यर्थः ॥ पाराशरादावेतत्स्पष्टमेव ॥

अथानध्यायाः ।

ते च द्विविधा नित्या, नैमित्तिकाश्च । तत्र नित्यानाह हारीतः:-

प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः ।
श्वोनध्यायेऽद्यशर्वर्यां नाधीयीत कदाचनेति ॥

नैमित्तिकानाह याज्ञवल्क्यः—

श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिःस्वने ।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥
देशे शुचावात्मनि च विद्युत्स्तनितसंप्लवे ।
भुक्त्वार्द्रपाणिरम्भोन्तः अर्द्धरात्रेऽतिमारुते ॥
पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु ।
धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥

खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ।
सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुरिति ॥
साम सामवेदघोषः । तथाच मनुः—
ऋग्वेदो देवदेवत्यो यजुर्वेदश्च मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिरिति ॥
तेन ह्यन्नं क्रियत इतिवद्धेत्वर्थवादपुरःसरमाह—
सामध्वनावृग्यजुषी नाधीयीत कदाचनेति ॥

बाणो वंश इति विज्ञानेश्वरः । बाणशब्दे बाणमोक्षाशिक्षादशाद्युत्पन्ने शब्दे इति तु सर्वज्ञनारायणः । एवं वीणादिस्वनेपि बाणभेरीमृदङ्गगदार्त्तशब्देषु इति गौतमवचनव्याख्यावसरे बाणो वीणाविशेषे बाणः शततन्तुरिति महाव्रते दर्शनादिति हरदत्तेनोक्तम् । गर्दः शकटमिति विज्ञानेश्वरः । हरदत्तस्तु गर्त्तशब्देष्विति पठित्वा गर्त्तो रथः । "आरोहथोवरुणमित्रगर्त्तम् स्तुहि श्रुतं गर्त्तसदं युवानमि" त्यादौ गर्त्तो हि रथमुच्येत इति निरुक्ते च तथा दर्शनादिति व्याचख्यौ । अमेध्याः सूतिकादयः । तथाच वसिष्ठः—पतितचण्डालशवसूतिकाश्रावणे तु त्रिरात्रं वाग्यता आसीरन् इति प्रायश्चित्तं स्मरति । विद्युत्संप्लवे । पुनः पुनर्विद्योतमानायां विद्युति । स्तनितसंप्लवे । पुनः पुनर्मेघघोषे च तात्कालिकोऽनध्याय इति विज्ञानेश्वरः । नारायणस्तु—

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीदिति ।

मूलमुदाहृत्य विद्युदादित्रयस्य संध्याकालादन्यस्मिन् काले मिलितानां त्रयाणामुत्पत्तौ, तथा महोल्कानां च संप्लवे विद्युदाद्यतरेण सह युगपदुत्पादे आकालिकं यत्र काले निमित्तमुत्पन्नं दिनान्तरीयतत्कालोत्पत्तिपर्यन्तम् । एतच्च वर्षाव्यतिरिक्तकाले द्रष्टव्यमिति व्याचख्यौ । युक्तं चैतत् अन्यथा प्रादुष्कृतेष्वाग्निषु तु इत्याद्याग्रिममनुग्रन्थाऽसङ्गतिप्रसङ्गादिति संध्यागर्जितेप्याकालिकोऽनध्यायः । तदाह गौतमः—

स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निष्विति।

आकालिका इत्यनुवर्त्तते। स्तनयित्नुर्मेघशब्दः। प्रादुष्कृतेष्वग्निषु अग्निहोत्रहोमकाले, संध्यायामिति यावत्। प्रत्येकमाकालिका अनध्यायहेतव एते। यस्मिन् काले एते भवन्ति अपरेद्युस्तत्पर्यन्तकाल आकालः तत्र भव आकालिकोऽनध्यायः। एतच्च प्रातःसंध्यास्तनिते। सायंसंध्यास्तनिते तु रात्रिमात्रं नाधीयीत। तदाह हारीतः— सायंसंध्यास्तनिते रात्रिं; प्रातःसंध्यास्तनितेऽहोरात्रमिति। इदमप्यपर्त्तौ वर्षाकाले तु प्रातश्चेद् गर्जवर्षादयः तदाहर्मात्रमनध्यायः। तदाह गौतमः— अहन्यृतौ इति सायं तु सूर्योदयपर्यन्तं तदाह मनुः—

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने।

सज्योतिः स्यादनध्याय इति।

सज्योतिरिति। प्रातश्चेद्यावदादित्यदर्शनं सायं तु यावन्नक्षत्रस्थितिः। विद्युत्तु यदि नक्तं दृश्यते न संध्यायां तदाऽपररात्रपर्यन्तमनध्यायः॥ तदाह गौतमः—विद्युति नक्तं चापरात्रादिति। यद्यह्नः तृतीयाद्भागादारभ्य विद्युत्प्रवर्त्तते न संध्यायां नापि नक्तं तदा सर्वरात्रमनध्यायः। एतदाह गौतमः— त्रिभागादिप्रवृत्तौ सर्वं, सर्वमासर्वरात्रम् गौतमः-उल्का विद्युत्समेत्यैकेषाम्। यथा विद्युत्यनध्यायस्तथोल्कायामपीत्येकेषां मतमित्यर्थः। गौतमः— स्तनयित्नुरपराह्णे। अपराह्णे यो गर्जः स विद्युत्समः। अपि प्रदोषे। प्रदोषे भवन् स्तनयित्नुर्विद्युत्समः अपररात्रादनध्यायहेतुः सर्वं नक्तमार्द्धरात्रात्। प्रथमाद्रात्रिभागादारभ्य आर्द्धरात्रात्प्रवृत्तः स्तनयित्नुस्सर्वं नक्तमनध्यायहेतुः। अहश्चेत्सज्योतिः। अहनि चेत्स्तनयित्नुर्भवति तदा सकलं दिनमनध्याय इत्यर्थः। इदं च प्रागपराह्णादूर्जे सति बोध्यमिति हरदत्तः। एवं च विज्ञानेश्वरोक्तं तात्कालिकत्वमुक्तविशेषानाक्रान्तेऽपराह्णोत्तरकालीनगर्जे विद्युदाद्यमिलिते बोद्धव्यम्॥ भुत्त्कार्द्रपाणिरिति॥ नाधीयीतेति शेषः। अर्द्धरात्रे मध्यमप्रहरद्वये इति विज्ञानेश्वरः॥ रात्रेर्मध्यमदण्डदशके इति तु उदके

मध्यरात्रे चेति मनुव्याख्यायां नारायणः । निर्णयामृते तु द्वितीययामस्यान्त्यघटिकाद्वयं तृतीययामस्याद्यघटिकाद्वयं चेति चतस्रो घटिका महानिशाख्या अर्द्धरात्रः । तथाच बौधायनः—

महानिशा तु विज्ञेया मध्यं मध्यमयामयोः ।
तस्यां स्नानं न कुर्वीत स्वाध्यायं पितृतर्पणमिति ॥
मध्यं च कियदित्याकाङ्क्षायां स एवाह—
महानिशा तु विज्ञेया चतस्रो घटिकास्तथेति ॥

तथाच दण्डचतुष्टयमेव नाध्येयमिति सिद्धान्तितम् । अतिमारुत इति ॥ अत्र विशेषमाह गौतमः— नाधीयीत वायौ दिवा पांसुहरे कर्णश्राविणि नक्तमिति । पांसून् हरतीति पांसुहरः । अपांसुहरे तु दिवा न दोषः । पांसुहरेऽपि रात्रौ न दोषः । कर्णाभ्यां श्रूयते इति कर्णश्रावी । एवं भूते महाघोषे वायौ नक्तं नाधीयीतेत्यर्थः । एतेन

कर्णश्रावेऽनिले रात्रौ दिवा पांसुसमूहने ।

इति मनुरपि व्याख्यातः । सन्ध्यानीहारभीतिष्विति । संध्ययोर्नाधीयीत । तथा नीहारे भीतौ चेत्यर्थः । तथाच मनुः—

नीहारे बाणशब्दे च संध्ययोरेव चोभयोरिति ।

धावतइति । त्वरितं गच्छतोऽनध्याय इत्यर्थः । शिष्टे चेति । तदनुज्ञावधिरनध्यायः । तथाच मनुः— अतिथिं चाननुज्ञाप्येति । खरेत्यादि । खरादीनामारोहणे प्रत्येकमनध्याय इति विज्ञानेश्वरः । खरोष्ट्रयुक्तं यद्यानं शकटादीति मनौ नारायणः । इरिणं शून्यम् । उषरं मरुभूमिर्वेति । तात्कालिकान् निमित्तसमकालीनान् । गौतमः— अभ्रदर्शने वापत्तौ वर्षर्त्तोरन्यत्र सोदकमेघस्य दर्शने नाधीयीतेत्यर्थः । मूत्रित उच्चारितः । सञ्जातमूत्रेच्छो, निरुद्धमूत्रः । तथा उच्चारितः निरुद्धपुरीषः । कृतमूत्रपुरीषे तु विशेषं वक्ष्यति । वर्षति च । वर्षति देवे तावन्नाधीयीत । एके वलीकं सन्तानम् । वलीकं गृहपटले । तत्र वर्षधारा संतन्यते यथा तथा वर्षति सति नाध्येयमित्येके ॥ अन्या

नपि नित्यानाह नारदः—

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिष्विति ॥

अयने मकरे, कर्कटे च । विषुवे तुलामेषयोः शयने आषाढशुक्लद्वादश्यां बोधने कार्त्तिकशुक्लद्वादश्याम् । मन्वादिषु—

अश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी तथा ।
आषाढस्यापि दशमी माघमासस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
मन्वन्तरादयश्चैते दत्तस्याक्षयकारका

इति मत्स्यपुराणोक्तास्वि त्यर्थः । अत्राष्टमी कृष्णेत्युपादानात् द्वादस्यादयः शुक्ला गृह्यन्ते । युगादिष्विति ।

वैशाखमासस्य च या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पञ्चदशी च माघे ॥
इति विष्णुपुराणे ।
शुक्ला तृतीया वैशाखे प्रेतपक्षे त्रयोदशी ।
कार्त्तिके नवमी शुक्ला माघे दर्शश्च पूर्णि मेति ।
चोक्तास्वित्यर्थः ।

मनुः—

उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणे स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिष्विति ॥

उपाकर्मणि त्र्यहमनध्यायः । उत्सर्गे तु त्र्यहम् । पक्षिण्यहोरात्राभ्यां सह विकल्प्यते । तथाच मनुरेव—

यथाशास्त्रं च कृत्वैवमुत्सर्गं छन्दसां बहिः ।

विरमेत्पक्षिणीं रात्रीं यद्वाप्येकमहर्निशम् ॥
अतऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु संपठेदिति ॥

उपाकर्मानन्तरं विशेषमाहापस्तम्बः—श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीतेति । प्रदोषे रात्रेः प्रथमयामे । तथाच **गौतमः**— प्राधीतस्यं च निशायां चतुर्मुहूर्त्तमिति । उपाकृत्याध्येतुं प्रावृत्तः प्राधीतः“आदिकर्मणि क्तः कर्त्तरि च” इति क्तः । तस्य निशायां चतुर्मुहूर्त्तं अष्टौ नाडिका अनध्याय इत्यर्थः । अष्टकास्विति । यद्यपि हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति मार्गशीर्षप्रभृतिमासचतुष्टये कृष्णाष्टमीनामष्टकाश्राद्धदिनत्वं सूत्रे उक्तं तथापि सप्तमी नवमीयुतास्ता एव तिस्रोऽष्टका इह ग्राह्याः । तथाच **गौतमः**— तिस्रोष्टकास्त्रिरात्रकमन्त्यामेकेइति ॥ त्रिष्वपरपक्षेषु तिस्रोष्टकास्त्रिरात्रमनध्यायहेतवः । तदहः पूर्वेद्युरपरेद्युश्च । एके तु फाल्गुनस्थामपि मन्यन्ते इत्यर्थः । हेमन्ताशिशिरयोरित्युदाहृताश्वलायनसूत्रादिति भावः । यद्वा अन्त्यामन्त्यामेवेत्यर्थः । तथाचाश्वलायनः । एकस्यां वेति । आपस्तम्बोपि या माघ्याः पौर्णमास्या उपरिष्टादष्टमी ज्येष्ठी या संपद्यते तामेकाष्टकेत्याचक्षत इति । ऋत्वन्तास्विति । यद्यपि चान्द्रमासघटितानामृतूनामन्त्यासु रात्रिषु अनध्ययनं पर्वत्वादेव सिद्धं तथापि सौरमासद्वयकृतानामृतूनामन्त्ये दिनेऽनध्ययनसिध्यर्थमिदमिति **नारायणः**। **गौतमः**— कार्त्तिकी फाल्गुन्याषाढी पौर्णमासीति । त्रिरात्रमिति वक्ष्यमाणमनुषज्यते । उक्तपौर्णमासीरारभ्य त्रिरात्रमनध्यायः । तथाच तदुत्तरद्वितीयायामपि नाध्येतव्यामिति फलितमिति **माधवः** । **स्मृत्यर्थसारे** च—आषाढीकार्त्तिकीफाल्गुनीसमीपस्थाद्वितीयासु चेति ॥ चातुर्मास्यद्वितीयास्वित्यादिना उदाहरिष्यमाणेन वचनेनाप्ययमर्थो लभ्यते ॥ **हरदत्तस्तु**— तिस्रः पौर्णमास्योऽनध्यायहेतवः । पौर्णमास्यनन्तरे तु अनध्याये मूलान्तरं द्रष्टव्यमिति व्याचख्यौ ॥ **याज्ञवल्क्यः**—

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।
उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा ॥
संध्यागर्जितनिर्घाते भूकम्पोल्कानिपातने ।
समाप्य वेदं द्युनिशं आरण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये इति ॥

स्वशाखेति ॥ स्वशाखाध्यायिनि प्रेते त्र्यहमनध्याय इत्यर्थः । निर्घाते उत्पातध्वनौ । समाप्य वेदमिति । मन्त्रब्राह्मणयोरन्यतरसमाप्ताविर्त्यर्थ इति **विज्ञानेश्वरः** । शाखासमाप्ताविति तु **हरदत्तः** । द्युशब्दो दिवसपर्यायोपीति द्युद्रुभ्यां म इति सूत्रे **न्यासकारः** । राहुसूतके चन्द्रसूर्योपरागे द्युनिशमनध्यायः । यत्तु त्र्यहं न कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके इति **मनूक्तं** तद् ग्रस्तास्तमयविषयमिति **विज्ञानेश्वरः** । राज्ञः चन्द्रस्य चकारो भिन्नक्रमः तेन सूर्यस्य च राहोः सकाशात् । सूते प्रसवे । राहुच्छायाभिभूतस्य पुनरुद्भव इति यावत् । नतु राज्ञः सूतकमिति नृपमरणमुच्यते । लक्षणाप्रसङ्गात् । विषयस्थे च राजनि प्रेते इति **गौतमेन** तत्र सज्योतिरनध्याय इत्युक्तत्वाच्च । यद्यपि तत्र गृहस्थानामाशौचादेवानध्यायः सिद्धस्तथापि ब्रह्मचार्यर्थमिदम् । स्मृत्यर्थसारे तु ग्रहणे रात्रौ मोक्षे त्रिरात्रम् । दिवा मोक्षे त्रिरात्रम् । दिवा मोक्षे त्र्यहमित्युक्तम् । **गौतमस्तु**—आकाशनिर्घातभूमिकम्पराहुदर्शनोल्काइत्याह । अत्र **हरदत्तः**—निर्घातोऽशनिपातः राहुदर्शनं ग्रहणमिति व्याचख्यौ । ऋतुसंधिष्विति । ऋत्वन्तासु च रात्रिष्विति प्राग्व्याख्यातेन मनुवचनेन समानार्थमिदम् । **विज्ञानेश्वरस्तु**—ऋतुसंधिगतासु प्रतिपत्स्विति व्याचख्यौ । भुक्त्वा चेति । इदं चोत्सवविषयकम् । तथाच **गौतमः**—ऊर्ध्वं भोजनादुत्सवे इति । उपनयनादावुत्सवे भो-

जनादूर्ध्वं तदहरनध्याय इति हरदत्तो व्याचख्यौ । श्राद्धभोजने तत्प्रतिग्रहे चेति विज्ञानेश्वरः । गौतमस्तु—श्राद्धिनामाकालिकमकृताश्राद्धिकसंयोगेपीति । अत्र हरदत्तः—श्राद्धी श्राद्धकर्त्ता नतु भोक्ता । तत्र श्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रमिति अहोरात्रस्योक्तत्वात् । यद्वा श्राद्धे केवलं भुक्तवन्ते नतु पित्र्याद्यर्थं पात्रतया । तेषां पूर्वोक्तोऽहोरात्रः ॥ पित्राद्यर्थानां तु आकालिको बोध्यः । अकृतान्नम् आमान्नं तदेव श्राद्धिकं श्राद्धे दीयमानं तत्प्रतिग्रहेपीत्यर्थं इति । एकोद्दिष्टे तु त्रिरात्रम् । तदाह मनुः—

प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेत् ब्रह्म राज्ञो राहोश्च सूतके इति ॥

इदं च महैकोद्दिष्टविषयमिति स्मृत्यर्थसारे नारायणीये च ॥ यदा तु त्रिरात्रादूर्ध्वमपि गन्धलेपावनुवर्त्तेते स तदा तत्क्षयपर्य्यन्तमनध्याय इत्याह मनुः—

यावदेकानुद्दिष्टस्य लेपो गन्धश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद् ब्रह्म न कीर्त्तयेदिति ॥

पशुमण्डूकेति ॥ यत्पुनर्गौतमेनोक्तम् श्वनकुलसर्पमण्डूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्चेति, तत्प्रथमाध्ययन एव बोध्यमिति विज्ञानेश्वरः । हरदत्तोपि—

पशुमण्डूकमार्जारश्वसर्पनकुलेषु च ।
अन्तरागमने विद्यादनध्यायमहर्निशमिति ।

मनुवचनमुदाहृत्य इदं च धारणाध्ययनविषयम् । गौतमीयं तु ग्रहणाध्ययनविषयमित्याह । शक्रपात इति । शक्रध्वजस्यावरोपणदिवसे उच्छ्रयदिवसे चेत्यर्थः । कूर्मपुराणे—

श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोरिति ॥

गौतमः—नित्यमेके नगरे इति—मतभेदेनानध्ययनमाह । मनुस्तु

व्यवस्थामाह–

नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च ।

धर्मनैपुण्यकामानामिति ॥

व्रतसमापनमात्रेण विद्यामसमाप्यैव ये स्नास्यन्ति ते विद्यानिरपेक्षब्रह्मचारिधर्ममात्रानुरोधकत्वाद्धर्म्मनैपुण्यकामाः । ये तु विद्यां समाप्यैव स्नास्यन्ति ते विद्यानैपुण्यकामाः । तत्र प्राथमिकानां ग्रामेऽनध्यायो न तु द्वितीयानामिति **नारायणः** ॥ **मनुः**–

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने ।

एतानाकालिकान् विद्यादनध्यायानृतावपीति ॥

उपसर्जने उपसर्गसूचके विकारे । युद्धच्छिद्रादावित्यर्थः । **गौतमः**–आचार्यपरिवेषणे ज्योतिषोश्चेति । आचार्यौ गुरुशुक्रौ तयोः परिवेषे ज्योतिषोः चन्द्रसूर्ययोश्च परिवेषे च तावत्कालं नाधीयीत । यद्वा परिवेषणमन्नोपहरणम् । आचार्यस्य गुरोः परिवेषणे नाधीयीतेति **हरदत्तः** । **मनुः**–

शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।

नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव चेति ॥

प्रौढपादइति पादे पादान्तराधायी । पीठाद्यासनार्पितपादो वेति **हरदत्तः** । वसक्थिकाम् उत्तरीयादिना पृष्ठेन सह जानुद्वयस्य वेष्टनम् । सूतकान्नाद्यं सूतकसंबन्ध्यन्नम् । एतच्चानध्ययनमाप्रायश्चित्तकरणादिति **नारायणः** । अन्नजरणान्तमिति तु **स्मृत्यर्थसारे** । **मनुः**—

न विवादे न कलहे न सेनायान्न संगरे ।

न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके ॥

रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षतेइति ।

विवादे ऋणदानादिविप्रतिपत्तिशब्दश्रवणे । भुक्तमात्र इति । भुक्त्वार्द्रपाणिरिति **याज्ञवल्क्योक्तेन** तुल्यार्थम् । अजीर्ण इति । जरणोचितकालेप्यन्नस्याजरणे सतीत्यर्थः इति **नारायणः** । सोपपद-

तिथावनध्यायः । तथाच नारदीये—

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो या च सोपपदा तिथिरिति ॥

सोपपदास्तिथयस्तु—

सिता ज्येष्ठद्वितीया च आश्विने दशमी सिता ।
चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृता इति ॥

स्मृत्यर्थसारे—ऐन्द्रश्रवणद्वादशीमहाभरण्योश्च । अपरपक्षान्ते प्रेतद्वितीयायां रथसप्तम्यां च । शवानुगनपरिचरणेषु । आकाशे शवदर्शने वाहोरात्रम् । महागुरौ मृते द्वादशरात्रम् । असपिण्डे गुरौ त्रिरात्रम् । आचार्ये उपाध्याये च पक्षिणी । समानविद्ये सब्रह्मचारिणि च । आचार्यभार्यापुत्रशिष्येष्वहोरात्रम् । ऋत्विग्याज्यस्वयोनिसम्बन्धेषु चैवम् । अग्न्युत्पाते गोविप्रमृतौ त्रिरात्रम् । अयने विषुवे च पक्षिणी । अकालवृष्टौ । आर्द्रादिज्येष्ठान्तादन्यत्राकालवृष्टिः । आरण्यमार्जारसर्पनकुलपञ्चनखादेरन्तरागमने त्रिरात्रम् । आराण्यश्वशृगालादिवानररजकादौ द्वादशरात्रम् । खरवराहोष्ट्रादिचण्डालादिस्सतिकोदक्याशवादौ मासम् । गोगवयाजब्रह्मनास्तिकादौ त्रिरात्रम् । शशमेषश्वपाकादौ षण्मासम् । गजगण्डसारससिंहव्याघ्रमहापापिकृतघ्नादावब्दमनध्यायः । शोभनगृहे शोभने दिने चानध्यायः । विवाहमौञ्जीबन्धनप्रतिष्ठोद्यापनादिष्वासमाप्तेः सापिण्डसगोत्राणामनध्यायः । यज्ञे चानुबन्ध्यान्तमृत्विजामाचार्याणां च । एकानध्याययुग्मत्वे त्वन्त्यापररात्रेऽनध्यायः । अनध्याययुग्मे पूर्वदिनापररात्रौ चेत्येके ।

अभ्यङ्गस्नानकाले च महास्वेदेऽतिकम्पने ।
गोविप्ररोधने सर्वशब्देषु श्राद्धपङ्क्तिषु ॥
उदयेऽस्तमये चापि मुहूर्त्तत्रयगामि यत् ।
तद्दिनं तदहोरात्रं चानध्यायविदो विदुः ॥
केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः ।

तावदेव त्वनध्यायो न तन्मिश्रे दिनान्तरे इति ॥

निर्णयामृते श्लोकभीष्मः—

चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु ।
पक्षाधिकत्रयोदश्यां तस्या एवोत्तरा तिथिः ॥
दर्शस्पृक् चेद्दिवैव स्यादनध्यायः श्रुतावपीति ॥

पक्षेत्यादेरयमर्थः । द्वितीयादित्रयोदश्यन्तानामेकादशस्वाध्यायानां यदि तिथिवृद्ध्या त्रयोदश्यधिका भवति तस्यां नाध्येयम् । किञ्च यस्यास्त्रयोदश्या उत्तरा चतुर्दशी दिवैव दर्शं स्पृशति साप्यनध्यायः । श्रुतौ । श्रवणद्वादश्याम् । चातुर्मास्यद्वितीयाश्च **गर्गेणोक्ताः—**

शुचाऊर्जे तपस्ये च या द्वितीया विधुक्षये ।
चातुर्मास्यद्वितीयास्ताः प्रवदन्ति महर्षय इति ॥

विधुक्षये कृष्णपक्षे ।

अथ प्रदोषाः ।

उपाकरणानन्तरं मासं प्रदोषे नाधीयीतेति प्रागुक्तम् । प्रदोषश्च पूर्वरात्रिर्विवक्षिता इति **माधवः** । तथा **माधवीये** पुराणम्—

मेधाकामस्त्रयोदश्यां सप्तम्यां च विशेषतः ।
चतुर्थ्यां च प्रदोषेषु न स्मरेन्नच कीर्त्तयेदिति ॥

चतुर्थ्यादितिथिद्वैविध्ये त्वाह प्रजापतिः—

षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिका ।
प्रदोषे न त्वधीयीत तृतीया नवनाडिकेति

निर्णयामृते । **गर्गोऽपि—**

रात्रौ यामत्रयादर्वाक् सप्तमी या त्रयोदशी ।
प्रदोषः स तु विज्ञेयः सर्वकर्मविगर्हित इति ॥
रात्रौ नवसु नाडीषु चतुर्थी यदि दृश्यते ।
प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हित इति ।

स्मृत्यर्थसारे ॥

अनध्यायेष्वध्ययने प्रज्ञामायुः प्रजां श्रियम् ॥
ब्रह्मवीर्यं श्रियं तेजो निकृन्तति यमः स्वयम् ॥
मन्त्रवीर्यक्षयभयादिन्द्रो वज्रेण हन्ति च ।
ब्रह्मराक्षसता चान्ते नरकश्च भवेद् ध्रुवमिति ॥
पूर्वोक्तेष्वनध्यायेषु उच्चारणमेव निषिद्धं नतु चिन्तनमपि। अतएव
उदके चार्द्धरात्रे च विण्मूत्रस्य विसर्जने ।
उच्छिष्टश्राद्धभुक् चैव मनसापि न चिन्तयेद् ।

इति मनुवचनव्याख्यायां नारायण आह–अत्र मनसा चिन्तनस्य निषेधादन्यत्र मनसा चिन्तने दोषाभावो गम्यत इति । तथा मानसमप्यशुचिरिति गौतमवाक्यं हरदत्तो व्याचख्यौ । अप्रयतः सन् मानसमप्यध्ययनं न कुर्यात् । एवं चान्येष्वनध्यायहेतुषु मानसमनिषिद्धं भवतीति ॥ मनुः—

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोस्त्यनध्याये होममन्त्रेषु चैव हीति ॥

वेदोपकरणमङ्गोपाङ्गादि । अत्र विशेषः कूर्मपुराणे

अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेदिति ॥

स्मृत्यर्थसारे च–

चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु तु ।
वेदाङ्गन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेदिति ॥

तथा दुर्मेधसां विस्मृतिशीलानां च बहुवेदपाठिनां च वेदेऽप्यनध्यायसंकोच उक्तः ।

स्मृत्यर्थसारे —

चतुर्दश्यष्टमीपर्वप्रतिस्त्स्वेव सर्वदा ।
दुर्मेधसामनध्यायस्त्वन्तरागमनेषु च ॥
तथा विस्मृतिशीलानां बहुवेदप्रपाठिनामिति ॥

स्वाध्येये चेति । ब्रह्मयज्ञ इत्यर्थः । तथाच शौनकः–

नित्ये जपे च काम्ये च क्रतौ पारायणेपि च ।
नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृत इत्यर्थः ॥

नित्यादावनध्यायो न किन्तु ग्रहणादावेवेत्यर्थः ।

स्मृत्यर्थसारे—

नित्ये नैमित्तिके कार्ये व्रतयज्ञक्रतौ तथा ।
प्रवृत्ते काम्यकार्ये च नानाध्यायाः स्मृतास्तथा ॥
देवतार्चनमन्त्राणां नानध्यायः कदा चनेति ॥

मनुः—

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विज इति ।

नित्यं नित्ये कर्त्तव्ये ब्रह्मयज्ञे । तथाच श्रुतिः–तस्य वा एतस्य ब्रह्मयज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देश इति । इत्यनध्यायप्रकरणम् ॥

अथ भिक्षाचर्या ।

याज्ञवल्क्यः—

ब्राह्मणेषु चरेद्भैक्ष्यमनिन्द्येष्वात्मवृत्तये ।
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ॥
ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रममिति ॥

ब्राह्मणेष्विति स्वस्वजातीयोपलक्षणम् । तथाच व्यासः–

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्ष्यमन्वहम् ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव चेति ॥

अत्र सार्ववर्णिकमापद्विषयम् । तथाच माधवीये भविष्यत्पुराणम्—

चातुर्वर्ण्यं चरेद्भैक्ष्यमलाभे कुरुनन्दनेति ॥

आपद्यपि शूद्रात्पक्वं न ग्राह्यम् । तदाहाङ्गिराः—

तस्मादामं ग्रहीतव्यं शूद्रादप्यन्ततोऽब्रवीदिति ।

अनापदि तु स्वजातिप्रशस्तेष्वेव भैक्ष्यमाहरेत् । तदाह मनुः—

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।

ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः प्रयतोऽन्वहमिति ॥

क्वचिदपवादमाह स एव—

गुरोः कुले च भिक्षेत न ज्ञातिकुलबन्धुषु ।

अलाभे त्वन्यगेहानां पूर्वं पूर्वं परित्यजेत् ॥

सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसंभवे ।

नियम्य प्रयतो वाचमभिशस्तांश्च वर्जयेदिति ॥

यत्तु

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।

याचेत भिक्षां प्रथमं या चैनं न विमानयेदिति ॥

तदुपनयनाङ्गभिक्षाविषयम् । तच्च भैक्ष्यं भोजनपर्याप्तमेवाहर्त्तव्यं नत्वधिकम् । तदाह यमः—

आहारमात्रादधिकं न क्वचिद् भैक्ष्यमाहरेत् ।

युज्यते स्तेयदोषेण कामतोऽधिकमाहरन्निति ॥

हारीतः—लोहे मृन्मये वा पात्रे भुञ्जीतेति ॥ आपस्तम्बः—भुक्त्वा स्वयममत्रं प्रक्षालयेदिति । तच्च भैक्ष्यं गुर्वनुज्ञापुरःसरं भोक्तव्यम् । तदाहतुर्मनुयमौ—

समाहृत्य तु तद्भैक्षं यावदर्थममायया ।

निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिरिति ॥

गुर्वसंनिधौ तद्भार्यादिभ्यो निवेदयेत् । तदाह गौतमः—निवेद्य गुरवेऽऽनुज्ञातो भुञ्जीतासंनिधौ गुरोः तद्भार्यापुत्रसब्रह्मचारिभ्य इति ॥

याज्ञवल्क्यः—

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया ।

अपोशानाक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् इति ॥

यद्यपि प्रागेव उभयोरग्निकार्यं विहितम् । “ अग्निकार्यं ततः

कुर्यात्संध्ययोरुभयोरपी" ति । तथापि संध्याकाले कथंचिदग्निकार्यस्य कालान्तरविधानार्थमिदम् । न पुनस्तृतीयप्राप्त्यर्थम् । सत्कृत्येति । सत्कारश्च हारीतेन दर्शितः— भैक्ष्यमवेक्षितं पर्यग्निकृतमादित्यदर्शितं गुरवे निवेदितमनुज्ञातं अमृतसंमितं प्राहुर्यदश्नाति ब्रह्मचारी ब्रह्मसिद्धिमवाप्नोतीति ॥

याज्ञवल्क्यः—

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ।
ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन् ॥

अनापदि व्याध्याद्यभावे । ब्राह्मण इति । क्षत्रियादेः श्राद्धभोजनव्युदासार्थम् ।

तथाच **मनुः**—

राजन्यवैश्ययोश्चैव न तत्कर्म प्रचक्षत इति ॥

श्राद्ध इत्युपलक्षणम् । तथाच **मनुः**—

व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवदिति ।

ऋषिवद् वानप्रस्थवत् । एते मुन्यन्नाशनमभिप्रैतीति **नारायणः** । व्रतमिति । मधुमांसादि परिहरन्नित्यर्थः । ब्रह्मचर्यकालावधिमाह **याज्ञवल्क्यः**—

प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ॥
ग्रहणान्तिकमित्येकइति ॥

यमः—

वसेद् द्वादशवर्षाणि चतुर्विंशतिमेव वा ।
षट्त्रिंशतं वा वर्षाणि प्रतिवेदं व्रतं चरेदिति ॥

मनुः—

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिमेकमेव चेति ।

वेदत्रयाध्ययनार्थं व्रतं ब्रह्मचर्याश्रमधर्मरूपं चर्यं चरणीयम् ।

तथाच प्रतिवेदं द्वादशाब्दानामिति फलितम् ॥ यस्तु चतुरो वेदानध्येतुं शक्तः तस्याष्टचत्वारिंशदिति बाध्यम् ॥ यथाऽऽपस्तम्बः—उपेतस्याचार्यकुले ब्रह्मचारी वासोष्टाचत्वारिंशद्वत्सरान् इति । एवं चाथर्वणस्त्रयीनिष्कर्षत्वादेतद्व्रतेनैव व्रतसिद्धिरिति । नारायणोक्तौ मूलं मृग्यम् । तदधिकमित्यादि । प्रतिवेदं षाड्वार्षिकं त्रैवार्षिकं वेत्यर्थः । तदेतत्संगृहितं दीपिकायाम्—

प्रतिवेदं ब्रह्मचर्यं वर्षाणि द्वादशाथवा ।
षट्त्रीणि ग्रहणान्तं वेति ॥

ब्रह्मचारी द्विविधः । उपकुर्वाणको, नैष्ठिकश्च ॥ उपकुर्वाणकस्य धर्मा उक्ताः । नैष्ठिकस्य तूच्यन्ते । तत्र मनु—

यदि त्वात्यन्तिको वासो रोचेत स्वगुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद् वृत्तिमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ॥
प्रयुञ्जानोग्निशुश्रूषां साधयेद्देहमात्मन इति ॥
एतच्च सद्वृत्तब्राह्मणगुर्वादिविषयम् ।

तथा च मनुः—

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं चरेत् ।
ब्राह्मणे वाननूचाने काङ्क्षन् गतिमनुत्तमामिति ॥

स्थानासनविहारवानिति । स्थानमङ्गुष्ठाग्रादिना नियतमूर्धावस्थानम् । आसनं नियमेनोपवेशनम् । विहारो भ्रमणम् । एतैस्तपोविशेषमभिप्रैतीति नारायणः । अग्निशुश्रूषामिति । सा च हारीतशङ्खलिखितयमैर्निरूपिता । याज्ञियाः । समिध आहृत्य संमार्जनोपलेपनोद्बोधनसमूहनसमिन्धनपर्यग्निकरणपरिक्रमणोदस्थापनहोमस्तोत्रनमस्कारादिभिरग्निं परिचरेन्नाग्निमधितिष्ठन्न पद्भ्यां कर्षेन्न मुखेनोपध-

मेन्नापश्चाग्निं च युगपद्धारयेन्नाजीर्णभुक्तो नोच्छिष्टो वाभ्यादध्यात् ॥ विविधैर्हविर्विशेषैराज्ञे यैरहरहमग्निमिन्धेदामन्त्र्य गच्छेदागत्य निवेदयेत् तन्मनाः शरीरोपरमान्ते ब्रह्मणः सायुज्यं गच्छतीति ॥ स्फुटं चैतन्माधवीये । वसिष्ठः—ब्रह्मचार्याचार्यं परिचरेदाशरीरविमोक्षणात् । आचार्ये च प्रेतेऽग्निं परिचरेत् संयतवाक् चतुर्थषष्ठाष्टमकालभोजी जटिलः शिखा जटो वेत्युपक्रस्य त्रिरन्होभ्युपेयादपइत्याह । त्रिषवणस्नायी स्यादित्यर्थः ॥ यत्तु दक्षवचनम्—

प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः ।

यतेस्त्रिषवणस्नानं सकृत्तु ब्रह्मचारिण इति ॥

तदुपकुर्वाणकविषयम् । यदपि अपामुपस्पर्शनमेके गोदानादिति गौतमवाक्येन गोदानव्रतानन्तरमेव स्नानम् । ततः प्राक् दीक्षितवदिति नित्यस्नानस्यानुष्ठानमुक्तं तदप्युपकुर्वाणकविषयमेव बोध्यम् । यत्तु

कुब्जवामनजात्यन्धक्लीबपङ्ग्वार्त्तरोगिणाम् ।

व्रतचर्या भवेत्तेषां यावज्जीवं न संशयइति ।

विष्णुवचनान्नैष्ठिकत्वं कुब्जादिमात्रविषयकमिति । तन्न । चत्वार आश्रमा इत्युपक्रम्य यमिच्छेत्तमावसेदिति वसिष्ठेनोच्यमानस्य गृहस्थताया ऐच्छिकत्वस्यासंगत्यापत्तेः । भविष्यत्पुराणेपि—

गार्हस्थ्यमिच्छन् भूपाल कुर्याद्दारपरिग्रहम् ।

ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकम् ॥

वैखानसो वापि भवेत्परिव्राडथवेच्छयेति ॥

वैखानसो वानप्रस्थः । तस्माद्रागिविषयकं गार्हस्थ्यम् ॥ विष्णुवाक्यं तु नीरागमात्रोपलक्षकमिति । नैष्ठिकत्वं तु ब्राह्मणस्यैव नतु क्षत्रियादेः ।

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ।

स गच्छत्युत्तमं स्थानं नचेह जायते पुनरिति ।

मनुवाक्ये विप्रपदेन क्षत्रियादिव्युदासादिति नारायणः ।

एतच्च नैष्ठिकब्रह्मचर्यं कलौ न कार्यम् । कलिवर्ज्येषु परिगणनात् । कलिवर्ज्यानि च प्रसङ्गात्प्रदर्श्यन्ते । तत्र माधवीये ब्रह्मपुराणम्–

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः ।
गोत्रान्मातृसपिण्डात्तु विवाहो गोवधस्तथा ॥
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिरिति ॥

दीर्घकालमिति । नैष्ठिकब्रह्मचर्यमित्यर्थ इति दीपिकाकारः । अन्ये तु अष्टाचत्वारिंशद्वर्षाणि इत्याद्यपि कलौ निषिध्यत इत्याहुः । कमण्डलुधारणम् । अथ कमण्डलुचर्यामुपदिशन्तीत्यादिबौधायनोक्तेतिकर्त्तव्यताकम् । सोदकं च कमण्डलुमित्यनेन स्नातकस्य विहितं मृन्मयकरकधारणम् । गोत्रात् स्वगोत्रोत्पन्नायाः पितृष्वसुः । मातृसपिण्डाद् मातुलात् । यः श्रुतिस्मृतिसदाचारैर्मातुलकन्यापारिणयः प्राप्तः सोऽनेन कलौ निषिध्यते । तेन मातुलस्य सुतामूढ्वेत्यादीनि वचनानि कलिविषयाण्येव । अत एव व्यासेन कलिनिन्दाप्रक्रमे–

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः–

इत्युक्तम् । मातृतो मातृपक्षे । कूटस्थात्तृतीयां मातुलसुतां पितृतः पितृपक्षे तृतीयां पैतृष्वस्रेयीमित्यर्थः । एतेन कृष्णार्जुनादीनां मातुलकन्यापारिणयोऽपि युगान्तरीयत्वान्न विरुध्यते । आधुनिकानां तु तदाचारोऽनाचार एव । अतएव बौधायनेन पञ्चधा विप्रतिपत्तिर्दक्षिणत इत्युपक्रम्य यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनं इत्यनाचारत्वमेव प्रतिपादितमिति । गोवधो मधुपर्कादौ । मद्यं गौडीमाध्व्यादिरूपं क्षत्रियवैश्ययोर्निषिध्यते । न ब्राह्मणस्य । नित्यं तन्निषेधात् । न पैष्टी । सर्वेषु तन्निषेधात् । क्रतुरपि ।

देवराच्च सुतोत्पत्तिः दत्ता कन्या न दीयते ।

देवरात् । चकारात्सपिण्डात् सगोत्राद्वा सुतोत्पत्तिः । " अपुत्रां

गुर्वनुज्ञात " इत्यादिवाक्यैर्विहिता। कलौ नेत्यनुषज्यते। देवरात् सुतोत्पत्तेश्च वाग्दत्ताविषयता। यावद्वक्ष्यमाणत्वात् निषेधोऽपि तद्विषयक एव बोध्यः। दत्तेति

पुरा पुरुषसम्भोगान्मृते देयेति केचन।

ऋतावदृष्टे कन्यैव पुनर्देयेत्यादिना पुनर्देयतयोक्ता संस्कृता कन्या अक्षतयोनिः पुनः कलौ न देयेत्यर्थः। दत्ताशब्दस्य ऊढापरत्वं च वचनान्तरादध्यवसीयते। तथाच माधवीये पुराणम्—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुमिति॥

ज्येष्ठांशमिति। ज्येष्ठस्य विंश उद्धारः। सर्वद्रव्याच्च यद्वरमित्यादिनोक्तमित्यर्थः। बृहन्नारदीये—

समुद्रयातुः स्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपगतं तथा॥
देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः।
इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिण इति॥

समुद्रे नौकादिना यो याति तस्य समुद्रयानम्, ब्राह्मणस्य न्यासापहरणमित्यादिबौधायनोक्तप्रायश्चित्तकरणेपि अन्यैः स्वीकारः व्यवहारः। तदुक्तम्—

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रह इति।

उपगतं विवाहः।

असवर्णासु कन्यासु विवाहश्च द्विजातिषु।

इति वचनात्। मांसदानं मांसपरिवेषणम्।

शौचञ्च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धे एतत्खलु नचामिषम् ॥
यस्तु प्राणिवधं कृत्वा मांसैस्तर्पयते पितॄन् ।
सोऽविद्वांश्चन्दनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥
क्षिप्त्वा कूपे यथाकिंचिद्बालऽत आदातुमिच्छति ।
पतत्यज्ञानतः सोपि मांसेन श्राद्धकृत्तथा । इति
बृहत्पराशरस्मरणात् ॥
अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेदिति ।

निगमवचनाच्च महाप्रस्थानगमनम् । आशरीरपातमुत्तरादिग्गमनम् । तथान्येपि धर्मज्ञसमयप्रमाणकत्वेन माधवदीपिकाकारादिभिः संगृहीताः

विहितान्यपि कर्माणि धर्मलोपभयाद् बुधैः ।
समापने, निवृत्तानि साध्वभावात्कलौ युगे ॥
आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ।
अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः ॥
वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा ।
प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम् ॥
संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः ।
वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ॥
दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः ।
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ॥
अयोनौ सङ्ग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ।
परोद्देशात्मसन्त्याग उच्छिष्टस्यापि वर्जनम् ॥

प्रतिमाभ्यर्चनार्थाय सङ्कल्पश्च सधर्मकः ।
अस्थिसंचयनादूर्ध्वं अङ्गस्पर्शनमेवच ॥
शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥
षड्भक्तानशने चान्नहरणं हीनकर्मणः ।
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ॥
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः ।
शिष्यस्य गुरुदारेषु गुरुवद् वृत्तिशीलिता ॥
आपद्वृत्तिर्द्विजाग्र्याणां अश्वस्तनिकता तथा ।
प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ॥
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ।
बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः ॥
यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ।
नवोदके दशाहं च दक्षिणा विधिचोदिता ॥
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ।
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥
गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ।
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ॥
यत्र सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः ।
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥
निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ।
समयश्चापि साधूनां प्रमाणं वेदवद्भवेदिति ॥

अस्यार्थः, जनमेजययज्ञसमापने सति विहितान्यपि कानि चित्कर्माणि कलौ निवर्त्तितानि । तदनुष्ठानयोग्यसाधुपुरुषाभावात् । आततायिनामुद्यतशस्त्रादीनां द्विजाग्र्याणां विप्राणां "ब्राह्मणं वा बहुश्रुतमाततायिनमायान्तं हन्यादेवे" त्यादिना विहितं संमुखमकूटशस्त्रेण मारणम् । सत्रे आसनोपायिचोदिते सप्तदशावराश्चतुर्विंशति-

परमाः सत्रमासीरन्नित्यादिना विहिते दीक्षाः । सुराग्रहणस्य सुराग्रहणकर्तुः, संग्रहो व्यवहारः । अग्निहोत्रं हूयते यया स्रुचा सा वैकङ्कती अग्निहोत्रहवणी, तस्या नित्यं होमानन्तरं हुतावशिष्टप्राशनार्थं लेहः जिह्वया आस्वादनम् । कथंचिल्लीढायाः पुनः परिग्रहः ।

वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते ।

इत्यादिना देवलादिभिरुक्त आशौचसंकोचः । कामकृते महापातकादौ मरणान्तिकं यत्प्रायश्चित्तम् ।

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ।

इत्यादिनोक्तं तस्य विधानमुपदेशः । तदाह मनुः—

प्रतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिरिति ।

स्वयमेव धर्मशास्त्राद् ज्ञात्वाऽन्यापदेशेन पृष्ट्वा वा तदनुष्ठानं न निवार्यत इति भावः । संसर्गदोषः पतितसंसर्गेण पातित्यम् । "संवत्सरेण पतति पतितेन सहाचर" न्नित्यादिना प्रतिपादितम् । तथाच पराशरः— कलौ पतितकर्मणेति । एतेन संसर्गः शोधितैरपीत्यादिना शोधितसंसर्गस्यापि निषेधमधिगम्य पतितसंसर्गे दोषाभावोक्तिर्विरुद्धयेतेति परास्तम् । पातित्यानभ्युपगमेपि दोषाभ्युपगमात् । एतच्च

आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् ।

संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसीति ।

पराशरवचनव्याख्यावसरे माधवाचार्यैः स्फुटीकृतम् । स्तेयान्यस्मिन् महापातके निष्कृतिः ॥ इदं च रहस्यप्रायश्चित्तविषयकमिति केचित् । अतएव पराशरे नवमाध्याये तस्मात्प्रकाशयेत्पापमित्युक्तिरपि संगच्छत इत्याहुः । वरातिथिभ्यां मधुपर्के, पितृभ्यः श्राद्धे । दत्तः— मातृपितृभ्यां, तदन्यतरेण वा । " पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्ट एव प्रतिगृह्णीयात्" इत्यादिवसिष्ठोक्तविधिना पुत्रीकृतः । औरसो धर्मपत्नीजः । ताभ्यामितरेषाम् । सवर्णान्या असवर्णा या अङ्गनास्ता-

भिर्दुष्टैः तत्संपृक्तैः कृतप्रायश्चित्तैरपि संसर्गः। अयोनाविति । युगान्तरे तु योनौ अयोनौ वा संसर्गे सति परित्याग इति गम्यते । परेषां गोब्राह्मणस्त्र्यादीनामुद्देशेन तदापद्विमोक्षार्थं प्राणत्यागः "गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजे" दित्यादिनोक्तः। उच्छिष्टस्यापि वर्जनमिति। स्वमुच्छिष्टमुच्छिष्टोपहतं चेत्यादिवसिष्ठाद्युक्तम्। इयमेव प्रतिमा यावज्जीवं पूजनीयेत्येवमादिः संकल्पः ।

ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते

इत्यादिना विहितोऽङ्गस्पर्शः । शामित्रं यज्ञे स्वयं पशुप्रमाणम् । षण्णां भक्तानामनशनम् । उपवासत्रयम् । तस्मिन्

बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्

इत्यादिस्मृत्या ।

तथैव सप्तमे काले भक्तानि षडनश्नता ।

अश्वस्तनविधानाय हर्त्तव्यं हीनकर्मणः

इति मनुस्मृत्या च विहितमन्नहरणम्॥ आपद्वृत्तिरिति॥ आपदि क्षत्रादिवृत्तिभिर्जीवनम् । विप्राणां संततिजीवनाय जातारणिपरिग्रहः । प्रवासित्वम्, सर्वदा प्रवासशीलता । मुखेनोपधमेदग्निमित्यादिना विहितं मुखेनाग्निधमनम् । अभिनवोदके दशाहवर्जनम् ।
"दशरात्रेण शुध्येत भूमिष्ठं च नवोदक" मित्यादिनोक्तं दशाहमित्युक्त्या ।

काले नवोदकं शुद्धं न पिबेच्च त्र्यहं च तत् ।

अकाले तु दशाहं स्यात्पीत्वानाद्यादहर्निशम् ॥

इति स्मृत्युक्तस्य दशाहप्रतिषेधस्यैवम्प्रतिप्रसवो नतु त्र्यहप्रतिषेधस्येति दर्शयति। "गुरवे तु वरं दत्त्वे" त्यादिनोक्ता स्नानार्थं गुरुदक्षिणा। आर्याधिष्ठिता वा शूद्राः संस्कर्त्तारः स्युः इत्याद्यापस्तम्बोक्तं ब्राह्मणगृहे शूद्रस्य पाचकत्वम्। गोतृप्त्यधिके जले शिष्टानामाचमनकरणम् शुचिगोतृप्तिकृत्तोयामिति प्राप्तम् । पितृपुत्रविरोधे तु साक्षिणां त्रिपणो दम इत्युक्तम्। संन्यासिनां यत्र सायङ्कालस्तत्रैवावस्थानम् । यत्र

सायं गृही मुनिरित्यनेनोक्तम्। एतानि सर्वाणि निवर्त्तितानि इत्यन्वयः। सन्यासिपद्धतौ व्यासः—

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः॥
संन्यासस्तु न कर्त्तव्यो ब्राह्मणेन विजानतेति।
अत्र त्रेतापरिग्रह इति वदता सर्वाधानमेव निषिध्यते।
अतएव लौगाक्षिः—
अर्धाधानं स्मृतं श्रौतस्मार्त्ताग्न्योस्तु पृथक्कृतिः।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति॥

युगस्य पूर्वं पूर्वयुगं कलेः पूर्वभाग इत्यर्थः। अर्धाधानमपि यावद्वर्णवेदविभागं कार्यम्। तदाह देवलः—

यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्त्तते।
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे इति॥

यद्यपि संन्यासस्य चतुश्चत्वारिंशच्छताब्दाऽवधिकत्वं व्यासेनोक्तं तथापि गौणकालोऽनेन समर्प्यत इति केचित्। त्रिदण्डैकदण्डाभिप्रायेण व्यवस्थेत्यपरे। सामान्यतः श्रुतस्य व्यासवाक्येनोपसंहार इत्यन्ये इति कलिनिषिद्धानि। तदेवं नैष्ठिकब्रह्मचर्यस्य कलौ निषिद्धत्वादुपकुर्वाणत्वमेवाश्रित्य वेदाध्ययनं कर्त्तव्यमिति स्थितम्॥

तच्चाध्ययनमुपाकर्मप्रभृत्येवेति प्रसङ्गात्तन्निर्णय उच्यते। तत्र गृह्यम्—अथाध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेन वेति। अस्यार्थः, अधीयन्त इत्यध्याया वेदाः तेषामुपाकरणं प्रारम्भः श्रावणमासस्य श्रवणेन श्रवणायुक्ते काले "नक्षत्रेण युक्तः कालः" इत्यणो "लुबविशेष" इति लुप्। "नक्षत्रे च लुपी" ति सप्तम्यर्थे तृतीया। पञ्चम्यामिति। श्रावणस्येति सम्बध्यते। श्रावणमासस्य पञ्चमी यदा हस्तसंयुक्ता भवति तदा वेत्यर्थः। इदं च कालद्वयम् ओषधिप्रादुर्भावे सति बोध्यम्॥ याज्ञवल्क्यः—

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥

ओषधिप्रादुर्भावे सति श्रावणमासस्य श्रवणं पूर्णिमा हस्तश्च शाखाभेदेन व्यवस्थिताः । यदि तु तत्र ग्रहसंक्रान्ती स्यातां तदा श्रावणस्य शुक्लपञ्चम्यां कार्यम् । अथवा श्रावणशुक्लपक्षवर्त्तिन्यां यस्यां कस्याञ्चिद्धस्तान्वितायां तिथौ इति दीपिकादिबहुग्रन्थसम्मतोर्थः । अतएव स्मृत्यर्थसारेपि-कस्मिंश्चिद्दिने इत्युक्तम् । अत्र पञ्चम्यामिति पक्षो बह्वृचादिभिर्ग्राह्यः । यजुर्वेदिनां तु मध्ये वाजसनेयिभिरेव ग्राह्यः । संक्रान्तिर्ग्रहणं वेत्यादिवक्ष्यमाणस्मृतिमहार्णववचनबलादिति दीपिकादौ स्थितम् ॥ ओषधिप्रादुर्भावविरहे तु भाद्रपदे कार्यम् । तथा बह्वृचपरिशिष्टकारिका—

अध्यायानामुपाकर्म श्रावणे श्रवणेन तु ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥
अदृष्टयौषधयस्तस्मिन् मासे तु न भवन्ति चेत् ।
तदा भाद्रपदे मासे श्रवणेन करोति तदिति ॥

श्रवणनक्षत्रखण्डे तु विशेषमाह व्यासः–

धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म यद्भवेदिति ।

स्मृतिमहार्णवे–

संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिरिति ॥

गर्गः—

पर्वण्यौदयिके कुर्युः श्रावणीं तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युः ग्रहसंक्रान्तिवर्जित इति ॥

अत्र तैत्तिरीयकपदमन्येषामपि यजुःशाखिनामुपलक्षणम् । तेषां कालान्तराविधानादिति निर्णयामृते । दीपिकायान्तु–यदि पौर्णमासीपूर्वाह्णरूपमात्रं कर्मकालं दिनद्वयेपि न व्याप्नोति व्याप्नोति

वा तदा निर्णयार्थं प्रवर्त्तमानमिदं वचनं तैत्तिरीयका इति विशेषोपादानात्तन्मात्रपरम्। इतरे तु याजुषाः पूर्वत्रैव कुर्युरिति सिद्धान्तितम्। यत्तु

श्रावणी दुर्गनवमी दुर्वा चैव हुताशनी।
पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनम्।

इति वचनं तद्दीपिकाकारमते—तैत्तिरीयकभिन्नयाजुषपरमिति स्पष्टमेव। निर्णयामृतकारमते—तु श्रावण्यां विधीयमानं हिरण्यगर्भपवित्रारोपणमेतस्य विषयः। उपाकर्माङ्गभूतमाभ्युदयिकश्राद्धं वेति तैरेव व्याख्यातम्। सिंहस्थिते सवितरि या अमावास्या तदन्ते चान्द्रमासे या पौर्णमासी सा श्रावणी। तथाच हरदत्तः—

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्त्तते।
चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः।
तेषु या या पौर्णमासी सा सा चैत्र्यादिका स्मृता॥
कादाचित्केन योगेन नक्षत्रस्येति निर्णय इति॥

कात्यायनः—

अर्धरात्रादधस्ताच्चेत् संक्रान्तिर्ग्रहणं तदा।
उपाकर्म न कुर्वीत परस्ताच्चेन्न दोषकृदिति॥

बृहस्पतिः—

नर्मदोत्तरभागे तु कर्त्तव्यं सिंहयुक्तके।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति॥

इदं सर्वशाखासाधारणमिति केचित्। अन्ये तु यान् प्रति सिंहे विधानमस्ति तान् प्रत्येव नर्मदोत्तरभागरूपदेशविधिपरं पूर्वार्द्धम्। तैरेव तर्हि दक्षिणे कथं कर्त्तव्यमित्याकाङ्क्षायां उत्तरार्द्धप्रवृत्तिरित्याहुः। एतेन

वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ।
उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके॥

इति माधवोदाहृतं स्मृत्यन्तरमपि व्याख्यातम्। आद्यमते सर्वशाखासाधारण्येन नर्मदोत्तरभागे कर्कटनिषेधाभिप्रायत्वात्। द्वितीयमते

तु छन्दोगान् प्रति सिंहे कर्त्तव्यमिति विधिः, कुलीरे न कर्त्तव्यमित्यनुवादः। तथाच गर्गः—

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वच्छन्दसाम्।
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति।
सिंहे रवावित्येतद् उत्सर्गोपाकर्मभ्यां संबध्यते।
यत्तु कश्यपवचनम्—
गुरुशुक्रतिरोधाने वर्जयेच्छ्रुतिचोदितम्।
इत्याह भगवानत्रिः श्रावणं तु विशेषत इति॥
तत्प्रथमोपाकर्मविषयम्। तदुक्तं संग्रहे—
गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धकेऽपि वा।
तथाधिमाससंसर्गमलमासादिषु द्विजाः॥
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृदिति॥
अधिमासादिष्विदं कर्मोत्तरत्र कर्त्तव्यमित्याह पराशरः—
उपाकर्म तथोत्सर्गं प्रसवाहोत्सवाष्टकाः।
मासवृद्धौ परे कार्याः वर्जयित्वा तु पैतृकामिति॥
परे उत्तरे मासि कार्या इत्यर्थः। प्रसवाहोत्सवो जातेष्टिः॥
कात्यायनः—
उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि।
अभिषेकाब्दवृद्धीनां न तूत्कर्षो युगादिष्विति॥
यत्तु ऋष्यशृङ्गवचनम्—
दशहरासु नोत्कर्षः चतुर्ष्वपि युगादिषु।
उपाकर्म महाषष्ठ्याद्येतादिष्टं वृषादित इति॥

तच्छन्दोगाविषयम्। तेषां हि कालवृद्धावपि सिंहार्क एवोपाकर्म। तथाच तद्विषये सिंहे रवावित्यादिगर्गवचनं प्रागुदाहृतम्। यदा पुनः श्रावणीप्रौष्ठपद्योः शुक्रास्तमयादिना प्रतिबन्धः तदानीमाषाढ्यां कर्त्तव्यम्।

तदुक्तं कूर्मपुराणे–

श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं स्मृतमिति ॥

अत्र च सर्वशाखाधिकरणन्यायेन कर्मैक्ये स्थिते वेदोपाकरणमनूद्य मासमात्रं विधीयते, पौर्णमास्यामित्यवयुत्यानुवाद इति निर्णयामृते, माधवीये च । दीपिकादौ तु–बौधयानीयैरेवाषाढी ग्राह्या, श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्येति बौधायनोक्तेर्गृह्यानुसारेण व्यवस्थौचित्यादिति स्थितम् । माधवस्तु–आषाढादिषु त्रिष्वपि मासेषु पूर्णिमाश्रवणहस्ताः शाखाभेदेन व्यवस्थिताः ॥

तदाह गोभिलः–

पर्वण्यौदयिके कुर्युः श्रावणीं तैत्तिरीयकाः ।
बह्वृचाः श्रवणर्क्षे तु हस्तर्क्षे सामवेदिन इति ॥

अत्रौदयिक इति पर्वादिषु सर्वत्र सम्बध्यते । पर्वण औदयिकत्वे विशेषमाह स एव–

श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि ।
तदा त्वौदयिकी ग्राह्या नान्या त्वौदयिकी भवेदिति ॥

परिशिष्टे—

धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीत ऋग्यजुःसामपाठका इति ॥

त्वाष्ट्रऋक्षसमन्वितमिति । चित्रासंयुक्तहस्त इत्यर्थः ।

गोभिलः–

अध्यायानामुपाकर्म कुर्यात्काले ऽपराह्णके ।
पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति ॥

याजुषाणां तु विशेषमाह प्रचेताः—

भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव त्विति ॥

इदं च ब्रह्मचारिधर्मः । उपाकृत्याधीयीतेति ग्रहणाध्ययनाङ्गत्व-

प्रतीतेः। ग्रहणाध्ययने च ब्रह्मचारिण एव। "वेदमधीत्य स्नाया" दिति स्नानात् प्राचीनत्वावगमात्। यदा तु व्रतानि वा पारं नीत्वेति स्मृतिबलाद्वेदमसमाप्यैव स्नाति तदा गृहस्थस्यापि ग्रहणाध्ययनेऽधिकारसंभवादस्त्येवोपाकर्म। अत एव शौनकः—समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेत इत्येक इति। अधीयीतेत्यनुवर्त्तते। येन नियमविशेषेण युक्तो ब्रह्मचार्यधीते तेनैव नियमेन समावृत्तोऽप्यधीयीत। समावृत्तादितरे ब्रह्मचारिणस्तु यथान्यायं स्वविध्युक्तप्रकारेणाधीयीरन्। तथा जायोपेतो गृहस्थोपि ब्रह्मचारिवन्नियमोपेतोऽयीधीतेति। अतएव मनु,याज्ञवल्क्यस्मृत्योर्गृहस्थधर्मप्रकरणे उपाकर्मणः पाठः संगच्छते इति माधवाचार्याः। एवं च ब्रह्मचारी, तथा समावृत्तोऽप्यकृतविवाहः, तथा कृतविवाहोऽपीति, त्रयो ग्रहणाध्ययनं कुर्वन्तस्तदङ्गभूते उपाकर्मण्यधिकारिण इति माधवनिबन्धे फलितोऽर्थः। दीपिकाविवरणे तु—समावृत्तशौनकवचनं जायोपेयीत्येके इति पठित्वा समावृत्तः सन् जायोपेयी गृहस्थः, इतरे ब्रह्मचारिणः, तथा चोभयेधिकारिण इति व्याख्यातम्। हरदत्तस्तु—उपाकृत्याधीयीतेत्यत्र न ग्रहणाध्ययनमात्रस्य ग्रहणं किंतु वेदोच्चारणस्याध्यापनपारायणादिसाधारणस्य। तदन्तं चेदं प्रतिसंवत्सरमनुष्ठेयम्। श्रवणादिवार्षिकमिति गौतमस्मरणात्। तथा च सकलब्रह्मचारिगृहस्थसाधारणमिदम्। तत्र न मांसं भुञ्जीतेत्यादिगौतमोक्तनियमःअध्यापकस्य, व्रतमात्रस्नातकस्याध्येतुश्च। तत्राप्यध्यापकस्य ऋतुद्वयं मासद्वयं चाशक्त्यपेक्षं वैकल्पिकं ब्रह्मचर्यम्। प्रवचनयुक्तो वर्षाशरदि मैथुनं वर्जयेदित्यापस्तम्बोक्तेः। द्वैमास्यो वा नियम इति गौतमोक्तेश्च। व्रतस्नातकस्याध्येतुस्तु ग्रहणान्तं ब्रह्मचर्यम्। ऋतुगमनं तु पाक्षिकमिति सिद्धान्तयित्वा तत्र प्रमाणत्वेन समावृत्त इत्यादिवाक्यं जायोपेयीत्येके इति पठित्वा ब्रह्मचारिकल्पेनेति प्रसक्तस्य स्त्रीसङ्गनिषेधस्य प्रतिप्रसवोऽयं पाक्षिक ऋतौ जायोपेयीति व्याचख्यौ। "उपाकृत्य यथाविधि

युक्तश्छन्दांस्यधीयीतेति" ति मनुग्रन्थव्याख्यायां नारायणोऽप्येवम् । युक्तं चैतत् ।

समावृत्तोऽप्यधीयानो मधुमांसादि वर्जयेत् ।
ऋतुस्नातोपगनं समावृत्तस्य मन्वते ॥

इति कारिकानुगुण्याच्च । तथाच नृसिंहकृते प्रयोगरत्ने गोभिलः—

उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।
धारणाध्ययनाङ्गत्वाद् गृहिणां ब्रह्मचारिणामिति ॥

कात्यायनः—

प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद् द्विजैः ।
क्रियते च्छन्दसां तेन पुनराप्यायनं भवेत् ॥
अयातयामैश्छन्दोभिः यत्कर्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारणम् ॥
उत्सर्जनं च वेदानामुपाकरणकर्म च ।
अकृत्वा वेदजप्येन फलं नाप्नोति मानव इति ॥

तस्मादाश्रमत्रयेऽपीदमावश्यकमिति स्थितम् । इदं च कर्म वृद्धिश्राद्धपूर्वकं कर्त्तव्यमिति वृद्धिश्राद्धप्रकरणे वृत्तिकृन्नारायणः ।

अत्रेतिकर्त्तव्यतामाह कार्ष्णाजिनिः—

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य तु ।
ऋषीन् दर्भमयान् कृत्वा पूजयेत्तर्पयेत्तत इति ॥

व्यासः—

ऋषीणामर्चनं सर्वं कर्त्तव्यं च निवीतिनेति ॥

गालवः—

कृत्वा यज्ञोपवीतानि नवानि वसुधाधिप ! ।
हुत्वाग्नौ गुरवे दत्वा पितृभ्यो धारयेत्तत इति ॥

पितृभ्यो दत्वा स्वयं धारयेदित्यर्थः ॥

काष्णाजिनिः-

वेदारम्भणतः पूर्वं सक्तुप्राशनतः परम् ।

नवयज्ञोपवीतानि दद्याद्वै धारयेत्तत इति ॥

दानफलं चोक्तं वायुपुराणे-

उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् ।

आयुस्मान् जायते तेन कर्मणा मानवो भुवीति ॥

ब्रह्मचारिणं प्रति विशेष उक्तः कालादर्शे-

मौञ्जीं यज्ञोपवीतं च नवं दण्डं च धारयेत् ।

कटिसूत्रं चैव नवं नवं वस्त्रं तथैव चेति ॥

कारिकायाम्-

पश्चादग्नेस्तु दर्भेषु प्रागग्रेषूपविश्य च ।

आसिच्याऽपः शरावादौ दर्भास्तत्र निधाय च ॥

प्रागग्रदर्भगर्भास्ते कुर्युर्ब्रह्माञ्जलीनथ ।

सव्याहृतिं जपत्युच्चैः सावित्रीं ब्रह्मयज्ञवत् ॥

त्रिरभ्यस्येयुरोङ्कारं व्याहृतीश्चात्र कर्मणीति ॥

नित्यब्रह्मयज्ञे हि यद्यपि सावित्र्या एवाभ्यासः, नतु व्याहृतीनाम्

ओंपूर्वा व्याहृतीस्तिस्रः समस्तास्तु सकृद्वदेत् ।

पच्छस्त्वर्धर्चशः सर्वां सावित्रीं त्रिर्वदेत्तथा ॥

इति कारिकाकारवचनात् । तथापीह कर्मणि व्याहृतीरप्यभ्यस्येयुरिति ब्रह्मयज्ञाद्विशेषो बोध्य इत्यर्थः ॥ इत्युपाकर्मनिर्णयः ॥

अथोत्सर्जनम् ।

मनुः-

पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।

माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनीति ॥

यदा श्रावण्यामुपाकर्म तदा पुष्यमासस्य शुक्लप्रतिपदि पूर्वाह्णे, यदा प्रौष्ठपद्यामुपाकर्म तदा माघस्येति व्यवस्थितो विकल्पः ।

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्

इति मनुनैवोक्तत्वात् ॥

याज्ञवल्क्यः—

पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिरिति ॥

अष्टकायां कृष्णाष्टम्याम् । बहिः ग्रामाद्बहिः । जलान्ते जलसमीपे । गोभिलः–

छन्दोगा मिलिताः कुर्युः प्रातरौत्सर्गिकीं क्रियाम् ।
अपराह्णे त्वुपाकर्म पुष्यहस्तर्क्षयोर्द्विजा इति ।

हस्तर्क्षेऽपराह्णे उपाकर्म पुष्ये प्रातरुत्सर्जनं छन्दोगाः कुर्युरित्यर्थः । इदं च सिंहस्थे सवितरि बोध्यम् । सिंहे रवौ तु पुष्यर्क्षे इत्यादिपूर्वोदाहृतगर्गवचनात् । कदाचित् भाद्रपदेपि । तथाच परिशिष्टे—

मासे प्रौष्ठपदे हस्तात्पुष्य* पूर्वो भवेद्यदा ।
तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विज इति ॥

बौधायनः–श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेदिति ॥ कात्यायनः—

उपाकृत्योदगयने ततोऽधीयीत धर्मवित् ।
उत्सर्गश्चेत्तथा तिष्यतिथ्यां प्रौष्ठपदेऽपि चेति ॥

आश्वलायनैस्तु माघ्यामुत्सर्जनं कार्यम् । तथाच गृह्यम्–मध्यमाष्टकायामिति ॥ कारिका च–

अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते इति ॥

अनुकल्पः स्मर्यते खादिरगृह्ये–

पुष्ये तूत्सर्जनं कुर्यादुपाकर्म दिनेऽथवेति ॥

श्रुतिश्च–

"यः स्वाध्यायमधीतेब्द"मिति । एवमुत्सृष्टस्यापि पुनरध्ययनं प्रागु-

पाकरणात् कालविशेषे विदधाति मनुः—

अतः परं तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि समस्तानि कृष्णपक्षेषु संपठेदिति ॥

कारिकायाम्—

अत आरभ्य षण्मासान् षडङ्गानि त्वधीयते ।
शुक्ले वेदमधीयीत कृष्णेऽङ्गानीति केचन ॥

इत्युत्सर्जनम् ।

प्रासङ्गिकं समाप्य क्रमप्राप्तं व्रतचतुष्टयं प्रस्तूयते । तच्च यद्यपि प्रतिशाखं गृह्येषूक्तं तथाप्याश्वलायनानां दिङ्मात्रमुच्यते । तत्र श्रीधरीये नृसिंहः—

तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणम् ।
चौलवत्सर्वमाख्यातं सगोदानव्रतेषु च ॥
द्विजानां व्रतबन्धस्तु स्वाध्यायेषु प्रशस्यते ।
रिक्ताविष्टिविवर्ज्येषु महानाम्निकमेव चेति ॥

अत्र महानाम्नीमहाव्रतोपनिषद्व्रतगोदानाख्यं चतुष्टयं महानाम्निकशब्देन विवक्षितं प्राणभृदुपदधातीतिवदिति तद्व्याख्यातारः । तत्र जन्मप्रभृति त्रयोदशे वर्षे महानाम्नीव्रतम् । चतुर्दशे महाव्रतम् । पञ्चदशे उपनिषद्व्रतम् । षोडशे गोदानम् । महानाम्न्यादिव्रतेषु लुप्तेषु तारतम्येन त्रीन् षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतं प्रारभेतेति स्मृत्यर्थसारे ॥

अथ समावर्त्तनम् ।

तत्र याज्ञवल्क्यः—

गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥

वरम्, अभिलषितं यथाशक्ति दत्वा स्नायात् । अशक्तं प्रत्याह तदनुज्ञयेति । अदत्तवरोपीति भावः । तथाच गृह्यम्—विद्यान्ते गुरुमर्थेन

निमन्त्र्य कृतानुज्ञस्य वा स्नानमिति । वेदं व्रतानि वेत्यनेन स्नातक-त्रैविध्यं दर्शितम् । वेदं पारं नीत्वेत्यत्रार्थावगतिरपि विवक्षिता । तथाच कूर्मपुराणम्—

वेदं, वेदौ, तथा वेदान्, वेदान् वा चतुरो द्विजः ।
अधीत्य चाधिगम्यार्थं ततः स्नायाद्यथाविधीति ॥

व्रतमात्रस्नातकेनाप्यारण्यकमधीत्यैव समावर्त्तितव्यम् ।
तथाच कारिकाकारः—

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
व्रतपक्षेपि शब्दार्थमारण्याध्ययने कृते इति ॥

शब्दार्थमक्षरग्रहणार्थं न त्वर्थज्ञानापेक्षापि अनुष्ठानानुपयोगात् । विरक्त्युत्तरकालं साधनचतुष्टयसंम्पन्नं प्रत्युत्तरमीमांसाप्रवृत्तेः । पूर्वोक्तं कूर्मपुराणवचनं तु कर्मकाण्डार्थज्ञानपरमिति भावः । तदेतदभिसंन्धायाहुर्मूले—

वेधानधीत्य यत्नेन पाठतो ज्ञानतस्तथा ।
समावर्त्त्य सवर्णां तु लक्षण्यां स्त्रियमुद्वहेदिति ॥

ज्ञानत इति । षडङ्गेतिहासपुराणादिष्वपि नियमविधिसत्त्वात्तदुपष्टम्भेन कर्मकाण्डार्थं निश्चित्येत्यर्थः । पाद्मे मदालसाप्रसङ्गे—

साङ्गं च सव्रतं चैव वेदमावर्त्तयेद् द्विजः ।
एतन्मुख्यमतो न्यूनं तद्गौणमिति कथ्यते इति ॥

ब्रह्मचारिधर्मलोपे तु तत्प्रायश्चित्तं कृत्वा समावर्त्तनं कार्यम् । प्रायश्चित्तं च ऋग्विधाने शौनकेनोक्तम्—

'तं वोधिया' जपेन्मन्त्रं लक्षं चैत्रे शिवालये ।
ब्रह्मस्वकीयधर्मेषु न्यूनं चेत्पूर्णमेव तदिति ॥
महानान्म्यादिव्रतचतुष्टयलोपे त्वाह शौनकः—
व्रतानि विधिवत्कृत्वा स्वशाखाध्ययनं चरेत् ।
अकृत्वाभ्यस्यते येन स पापी विधिघातकः ॥

प्रत्येकं कृच्छ्रमेकैकं चरित्वाज्याहुतीः शतम् ।
हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनक इति ॥

यस्य ब्रह्मचर्यावस्थायां सपिण्डादिमरणं तेन समावर्त्तनानन्तरं त्रिरात्रमाशौचं कार्यम् । तदाह मनुः—

आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति ॥

आदिष्टी व्रतादेशयोगाद् ब्रह्मचारी। उदकं तिलाञ्जलिम्। एतच्च पित्रादिव्यतिरिक्तविषयकमित्यादि आशौचप्रकरणे वक्ष्यते ।

इति समावर्त्तनम् ॥

अथ स्नातकव्रतानि ।

तत्राश्वलायनः—तस्यैतानि व्रतानि भवन्ति । न नक्तं स्नायात् न नग्नं स्नायात् न नग्नां स्त्रियमीक्षेत अन्यत्र मैथुनात् । वर्षति न धावेत् । न वृक्षमारोहेत् । न कूपमवरोहेत् । न बाहुभ्यां नदीं तरेत् । न संशयमभ्यापद्येतेति । तस्यैतानीति वचनं न नक्तं स्नायामिति संकल्पयेदित्येवमर्थम् । अत एव कारिकायाम्—

ततः संकल्पयेन्नक्तं न स्नायीत्युत्तराण्यपीत्युक्तम् । ततः होमसमाप्त्यनन्तरं मेखलाविसर्गात्प्राक् व्रतान्तराण्याह याज्ञवल्क्यः—

न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः ।
न विरुद्धप्रसङ्गेन संतोषी च भवेत्सदा ॥
राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा।
दम्भिहैतुकपाखण्डिवकवृत्तींश्च वर्जयेत् ॥ २ ॥
शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः ।
न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ॥ ३ ॥
न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् ।
नाहितं नानृतं चैव न स्तेनः स्यान्न वार्द्धुषी ॥ ४ ॥
दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः ।

कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन् ॥ ५ ॥
नतु मेहेन्नदीच्छायावर्त्मगोष्ठाम्बुभस्मसु ।
न प्रत्यग्न्यर्कगोसोमसंध्याम्बुस्त्रीद्विजन्मनः ॥ ६ ॥
नेक्षेतार्कं न नग्नां स्त्रीं नच संसृष्टमैथुनाम् ।
नच मूत्रं पुरीषं वा नाशुची राहुतारकाः ॥ ७ ॥
'अयं मे वज्र'इत्येव सर्वं मन्त्रमुदीरयन् ।
वर्षत्यप्रावृतो गच्छेत् स्वपेत्प्रत्यक्शिरा नच ॥ ८ ॥
ष्ठीवनासृक्सकृन्मूत्ररेतांस्यप्सु न निक्षिपेत् ।
पादौ प्रतापयेन्नाग्नौ न चैनमपि लङ्घयेत् ॥ ९ ॥
जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत् ।
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् ॥ १० ॥
विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम् ।
केशभस्मतुषाङ्गारकपालेषु च संस्थितिम् ॥ ११ ॥
नाचक्षीत धयन्तीं गां नाऽद्वारेण विशेत् क्वचित् ।
न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः ॥ १२ ॥
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ।
दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् ॥ १३ ॥
देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः ।
नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनानि च ॥ १४ ॥
विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदा चन ।
आमृत्योः श्रियमाकाङ्क्षेन्न कंचिन्मर्मणि स्पृशेत् ॥ १५ ॥
दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् ।
श्रुतिस्मृत्युदितं कर्म नित्यं कर्म समाचरेत् ॥ १६ ॥
गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत् ।
न निन्दाताडने कुर्यात् पुत्रं शिष्यं च ताडयेत् ॥ १७ ॥
कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।

अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु ॥ १८ ॥
मातृपित्रातिथिभ्रातृजामिसंबन्धिमातुलैः ।
वृद्धबालातुराचार्यैः वैद्यसंश्रितबान्धवैः ॥ १९ ॥
ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः ।
विवादं वर्जयित्वा तु सर्वान् लोकान् जयेत् गृही ॥ २० ॥
पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिषु ।
स्नायान्नदीदेवखातन्हृदप्रस्रवणेषु च ॥ २१ ॥
परशय्यासनोद्यानगृहयानानि वर्जयेत् ।
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ॥ २२ ॥
कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम् ।
वैणाभिशस्तवार्द्धुष्यगणिकागणदीक्षिणाम् ।
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् ।
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम् ॥ २४ ॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् ।
शस्त्रविक्रयिकर्मारतुन्नवायश्ववृत्तिनाम् ॥ २५ ॥
नृशंसराजरजककृतघ्नवधजीविनाम् ।
चैलधावसुराजीवसहोपपतिवेश्मनाम् ॥ २६ ॥
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ २७ ॥
शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेदिति ॥ २८ ॥
अस्यार्थः,स्वाध्यायाविरोधिनमर्थं नेहेत । एतेन
सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ।

इति मूलमपि व्याख्यातम् । यतस्ततः अविदिताचाराच्च । विरुद्धमयाज्ययाजनादि । प्रसंगो गीतादिः । विरुद्धं च प्रसंगश्चेति समाहारद्वन्द्वः । तथाच मनुः—

नेहेतार्थान् प्रसङ्गेन न विरुद्धेन कर्मणा ।
न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततं इति ॥

अत्र प्रसङ्गेन प्रकृष्टसङ्गेन । अत्यन्ततत्परतया नेहेतेति **नारायणः** । अत्र प्रकरणे नञ् पर्युदासार्थः । व्रतानीमानि धारयेदिति **मनुना** व्रतशब्देनोपक्रमात् । सदा अर्थालाभेपि । क्षुधा सीदन्नित्यनेन विभागादिप्राप्तकुटुम्बपोषणपर्याप्तधनो न कुतश्चिदर्थमन्विच्छेदिति गम्यते। किञ्च दम्भिहैतुकादीन् लौकिकशास्त्रीयेषु सर्वकार्येषु वर्जयेत् । लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी। युक्तिबलेन सर्वत्र संशयकारी हैतुकः। त्रैविद्यविद्यावृद्धाऽपरिगृहीताश्रमिणः पाखण्डिनः । बकवद् वृत्तिरस्य तल्लक्षणं च **मनुराह**—

अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृत इति ॥

नीचेति । नीचं कर्त्तनाद्ध्रस्वम् । एतेन मुण्डनं न कार्यमित्यभिप्रैति । तथाचापस्तम्बः । न समावृत्ता मुण्डयेरन् अन्यत्र विहारादिति ॥ **मनुरपि**—

क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिरिति ।

क्लृप्तं कर्त्तनादिना ह्रस्वतां नीतं नतु मुण्डितमिति **नारायणः**। **हरदत्तश्च**—एतेन श्मश्र्वादिप्ररोहणमपि निषिद्धं भवति। तथाच **गौतमः**—न रूढश्मश्रुकः स्यादिति । न संस्थितइति । उत्थितः सन् नाश्नीयादित्यर्थः । व्याघ्राद्युपहतदेशाक्रमणादिरूपं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत । न कुर्यात् । स्तेनः अदत्तादायी । वार्धुषी प्रतिषिद्धवृद्ध्युपजीवी । किञ्च, दाक्षायणी सुवर्णकुण्डलधारी ।

यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ।

इति **मनुस्मरणात्** । अत्र हि धारयेदित्यनुवर्त्तते। वेदम् ऐष्टिकवेदप्रकृतिं कुशमयीं मुष्टिमितिं **नारायणः** । ब्रह्मसूत्रीति द्वितीययज्ञोपवीतप्राप्त्यर्थम् । तथाच **वसिष्ठः**—

स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम् ।
यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुरिति ॥

अयं च कमण्डलुः कलौ निषिद्ध इत्युक्तं प्राक् । देवम् देवताप्रतिमाम् । मृदं तीर्थादुद्धृत्य स्थापिताम् । वनस्पतीन् अश्वत्थादीन् । दक्षिणतः कृत्वा व्रजेदित्यर्थः । तथाच मनुः—

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् इति ॥

प्रज्ञातान् प्रसिद्धान् । किं च नद्यादिषु न मेहेत् मूत्रपुरीषोत्सर्गं न कुर्यादित्यर्थः । तथा अग्न्यादीन् प्रति अग्न्यादीनामभिमुखं न मेहेत् । नाप्येतान् पश्यन् । यथाह गौतमः—न वाय्वग्निविप्रादित्यापो देवता गाश्च प्रतिपश्यन् वा पुरीषामेध्यान्युदस्येदिति । अमेध्यं ष्ठीवनादि । मूत्रपुरीषयोः पृथग्ग्रहणं तु तयोरतिशयेन वर्जनार्थमिति हरदत्तः । किञ्च अर्कं नेक्षेत । अत्र विशेषमाह मनुः—

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपसृष्टं नवारिस्थं न मध्यं नभसो गमिति ॥

उपसृष्टं राहुणा गृहीतम् । स्नानार्थं सकृद्दर्शने तु न दोषः । दृष्ट्वा स्नायादिति विधानादिति नारायणः । वस्तुतस्तु दर्शनं न विधेयमिति वक्ष्यामि । संसृष्टमैथुनाम् कृतोपभोगाम् । अनग्नामपि उपभोगान्ते न पश्येदित्यर्थः । अशुचिः सन् राहुं तारकाश्च न पश्येत् । किञ्च वर्षति सति "अयं मे वज्रः पाप्मानमपहन्तु" इति मन्त्रं पठन् सन् अवृतशिरा गच्छेत् नतु धावेत् । "न प्रधावेच्च वर्षती"ति निषेधात् । नच प्रत्यक्शिराः स्वप्यात् । किञ्च ष्ठीवनादीन्यप्सु न निक्षिपेत् । एनम् अग्निम् । किञ्च अञ्जलिना संहताभ्यां पाणिभ्यां न पिबेत् । जलग्रहणं पेयमात्रस्योपलक्षणमिति विज्ञानेश्वरः ।

तथाच मनुः—

नैकः स्वप्याच्छून्यगेहे श्रेयांसं न प्रबोधयेदिति ।

अक्षैः अक्षादिभिः । धर्मघ्नैः पशुलङ्घनादिभिः न क्रीडेत् । व्याधित इति सहार्थे तृतीया । किञ्च, जनपदादिविरुद्धं वर्जयेत् । नदीतरम्, बाहुभ्यां नदीतरणम् । नदीतडाकादि उपलक्षणमिति हरदत्तः, नारायणश्च । बाहुभ्यामिति तु विवक्षितम् । तेनोडुपादिना परिगमने न दोषः । इह जलं पिबेदित्यत्र जलस्य नदीतरमित्यत्र नद्याश्च विवक्षा तत्रैव बाहुभ्यामित्यस्य श्रेयांसं न प्रबोधयेदित्यत्र श्रेयस्त्वस्य चोद्देश्यविशेषणत्वेपि विवक्षेति वैषम्यम् । व्याख्यातृवचनमेव शरणम् । एवमग्रेपि । किञ्च परस्य क्षीरादि पिबन्तीं गां तस्मै नाचक्षीत । कर्तृप्रत्ययः । वत्सेन धीयमानां गां स्वामिने न ब्रूयादित्यर्थ इत्याहुः । वस्तुतस्तु धयन्तीं धापयन्तीम्, अन्तर्भावितण्यर्थाच्छतृप्रत्ययः । नाचक्षीतेत्युपलक्षणम्, नापि निवर्त्तयेत् । तथाच मनुः—

न वारयेद् धयन्तीं गां न चाचक्षीत कस्य चिदिति ॥

क्वचित् ग्रामे गृहादौ च कुद्वारेण न विशेत् । तथाचापस्तम्बः—न कुसृत्या ग्रामं प्रविशेत् । यदि प्रविशेत् "न मोमो रुद्राय वास्तोष्पत" इत्येतामृचं जपेदन्यां वा रौद्रीमिति । राज्ञ इति सकाशादिति विशेषः । सूनी प्राणिहिंसा सास्यास्तीति सूनी चक्री तिलनिष्पीडकः । ध्वजी सुराविक्रयी । नराधिपः समनन्तरोक्तो लुब्धः शास्त्रातिक्रमकारी च । यथाक्रमं दुष्टाः । एतेन

दशसूनासमश्चक्री दशचक्रिसमो ध्वजः ।
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥

इति मूलस्थश्लोकोपि व्याख्यातः । गोब्राह्मणेति गवादीनि उच्छिष्टः सन् न स्पृशेत् । पदा तु अनुच्छिष्टोपि न स्पृशेत् । प्रमादात् स्पर्शे तु प्रायश्चित्तं मनुना स्मर्यते—

स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् ।
गात्राणि चैव सर्वाणि नाभिं पाणितलेन त्विति ॥

पुत्रं शिष्यं चेति । अत्र विशेषं मनुराह—

पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चनेति ॥

शिष्ट्यर्थं ताडयेच्च ताविति च । तस्माद्विवादान्तरप्रसङ्गेन शिष्यादिरपि न ताडनीयः । अस्वर्ग्यमिति । लोकैर्विद्विष्टं पञ्च पञ्चनखा भक्ष्या इत्यादिस्मृतिबलाद्यद्यपि धर्मादनपेतं तथापि नाचरेत् यतोऽस्वर्ग्यम् । अपूर्वसाधनं न किन्तु अभ्यनुज्ञातमात्रम् । नचैवं मधुपर्कगोवधादेः स्वर्गसाधनतयानुष्ठानापत्तिः अग्नीषोमीयादिसमकक्षत्वादिति वाच्यम् । कलिनिषिद्धेषु तस्य गणितत्वात् । ये तु अग्नीषोमीयादेः स्वर्गसाधनत्वमस्ति नतु मधुपर्के गोवधस्येत्याहुः, तेषां हृदयं चिन्त्यम् । किंच मात्रादिभिः विवादं वर्जयित्वा लोकान् जयेत् । भ्राता भिन्नोदरोपि । जामयः विद्यमानभर्तृका भगिन्यः । वैद्यो विद्वान् भिषग्वा । बान्धवाः पितृपक्षा मातृपक्षाश्च । मातुलस्य पृथग्ग्रहणमादरार्थम् । सनाभयः सोदराः । अजामिभगिनीप्राप्त्यर्थमेतत् भ्रातृणां जामिनां च पृथग्ग्रहणात् पञ्चेति । परवारिषु सर्वसत्त्वोद्देशेनात्यक्तेषु तडागादिषु अनेनात्मीयेषु उत्सृष्टे च पिण्डोद्धरणं विनापि स्नानमभ्यनुज्ञायते । देवखातम् पुष्करादि । पर्वताद्युच्चप्रदेशात्प्रसृतमुदकं प्रस्रवणम् । नद्यादिषु पञ्चपिण्डानुद्धरणेनैव स्नायादित्यर्थः । किंच परकीयानि शय्यादीनि । अदत्तानि अननुज्ञातानि वर्जयेत् । नोपयुञ्जीत । अग्निहीनस्येति । श्रौतस्मार्त्ताग्न्योरधिकाररहितस्य शूद्रादेः । अधिकारवतोप्यग्निरहितस्य च । नाद्यादित्युपलक्षणम् । न प्रतिगृह्णीयादित्यपिबोध्यम् । "प्रशस्तानां स्वकर्म तस्माद् द्विजातीनां ब्राह्मणो भुञ्जीत प्रतिगृह्णीयाच्चे" ति गौतमवचनात्, कदर्येति

अत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ।

लोभाद्यः पितरो भृत्यान् स कदर्य इति स्मृतः ॥

इति लक्षितः कदर्यः । बद्धो निगडादिना, वाचा संन्निरुद्धश्च ॥ रङ्गावतारी नटचारणमल्लादिः वैणो वेणुच्छेदनजीवी । उलोपश्छान्दसः । माधवस्तु वैणो वीणावादनजीवीति व्याचख्यौ ॥ गणदीक्षी । बहु-

याजकः । एतेषामन्नं नाद्यादित्यनुवर्त्तते । एवमग्रेपि ॥ माधवस्तु-गणिकान्नम् गणान्नं दीक्षितान्नं चेति वा । तथाच मनुः—

गणान्नं गणिकान्नं चेति । दीक्षितस्य कदर्यस्येति च । अत्र दीक्षितान्नस्याग्नीषोमीयवपायागात् प्रागेव निषेधः । "असंस्थितेऽग्नीषोमीये यजमानस्य गृहे नाशितव्य" मिति श्रुतेः ॥ क्रीतराजको भोजनमित्याथर्ववैदिकं वाक्यं तु आपदि अभ्यनुज्ञानार्थम् । तदाहुर्भट्टाः—

तथैव प्राणपीडायां क्रीतराजकभोजनमिति ।
सामान्येनाभ्यनुज्ञानाद्विशेषश्च विशिष्यते ।
विशेषात्यन्तनिर्दोषस्तोकदोषेतरक्रियेति च ॥

आतुरः कुष्ठादिमहारोगोपसृष्टः । मत्तो विद्यादिना गर्वितः । क्रूरः दृढाभ्यन्तरकोपः । उग्रः वाक्कायव्यापारेणोद्वेजकः ।

वैश्याशूद्र्योस्तु राजन्यान् माहिष्योग्रौ सुतौ स्मृताविति ॥

लक्षित उग्र इति नारायणः । व्रात्यः पतितसावित्रीकः । अवीरा स्वतन्त्रा । पतिपुत्ररहितेत्यन्ये । पुंवत्कर्मधारयेति पुंवद्भावाभाव आर्षः । ग्रामयाजी ग्रामस्य शान्त्यादिकर्त्ता । बहूनामुपनेता वा । कर्मारो लोहकारः । तक्षणादिकर्त्ता वा । तुन्नवायः सूचीशिल्पोपजीवी । श्वभिर्वृत्तं जीवनमस्यास्तीति श्ववृत्ती । अत इनिठनाविति इनिः । एकाक्षरात्कृतो जातेरित्यस्यानित्यत्वात् । नृशंसो निर्दयः । राजा तत्पुरोहितोपि, राजपुरोहितोपि । राजपुरोहितान्नानि वर्जयेदिति शङ्खवचनात् । रजकः । वस्त्रादीनां नीलादिरागकारः । चैलधारो वस्त्रनिर्णेजनकृत् । सुराजीवी मद्यविक्रयी । उपपतिर्जारः तेन सह वेश्म यस्य । चाक्रिकस्तैलिकः शाकटिको वा । अभिशस्तपतितचाक्रिकतैलिकेति भेदेनाभिधानात् । सर्वे चैते कदर्यादयो द्विजा एव बोध्याः । अर्धसीरी हलपर्यायसीरोपलक्षितकृषिफलभागग्राही । आत्मानं निवेदयेत् त्वदीयोहमस्मीति । एते दासादयः शूद्रेषु भोज्यान्नाः । चकारात्कुम्भकारः । गोपनापितकुम्भकारेत्यादिवचनात् । शूद्रविशेषस्य भो-

ज्यान्नत्वं चात्यन्तापद्विषयमिति हरदत्तः । नारायणस्तु—

कन्दुपक्कं शूलपक्कं पायसं दधिसक्तवः ।
एतानि शूद्राद् ग्राह्याणि भोज्यानि मनुरब्रवीत् ।

इतिवचनमुदाहृत्य अन्नाविशेषपरतामाह । वस्तुतस्तु कलिनिषिद्धेषु शूद्रेषु दासगोपालकुलमित्रार्धसीरिणां भोज्यान्नतेति गणितत्वान्नैतस्य निष्कर्षे यत्यते । तथा माधवीये कूर्मपुराणम्—

नाधार्मिकैर्वृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेन्न पाखण्डिजनैर्वृते ॥
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावतः ।
पुण्याश्च विश्रुता नद्यस्तत्र कामं वसेद् द्विजः ॥
परस्त्रियं न भाषेत नायाज्यं याजयेद्बुधः ।
न देवायतनं गच्छेत्कदाचिच्चाऽप्रदक्षिणम् ॥
न वीजयेद्वा वस्त्रेण समवायं च वर्जयेत् ।
नैकोऽध्वानं प्रपद्येत नाऽधार्मिकजनैः सह ॥
न निन्द्येद्योगिनः सिद्धान् व्रतिनो वा यतींस्तथेति ॥

माधवीये मार्कण्डेयोपि—

असत्प्रलापमनृतं वाक्पारुष्यं विवर्जयेत् ।
असच्छास्त्रमसद्वादमसत्सेवां च पुत्रक ॥
न म्लेच्छभाषां शिक्षेत न पश्येदात्मनः शकृत् ।
नाधितिष्ठेत्सकृन्मूत्रं केशभस्मकपालिकाः ॥
तुषाङ्गारास्थिशीर्णानि रज्जुवस्त्रादिकानि च ।
वर्जयेन्मार्जनीरेणुं नापेयं च पिबेद् द्विज इति ।

मनुरपि—

स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् ।

इत्युपक्रम्याह—

वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।

वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह ॥
बुद्धिवृद्धिकराण्याशु धान्यानि च हितानिच ।
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥
न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथंचन ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
न लङ्घयेत् वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥
नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम् ।
क्षुवतीं जृम्भमाणां वा नचाऽऽसीनां यथासुखम् ॥
नाञ्जयन्तीं स्वके नेत्रे नचाऽभ्यक्तामनावृताम् ।
न पश्येत् प्रस्नुवन्तीं च तेजस्कामो द्विजोत्तमः ॥
नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥
न फालकृष्टे न जले न चित्यां नच पर्वते ।
न जीर्णदेवायतने न वल्मीके कदाचन ॥
न ससत्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः ।
न नदीतीरमासाद्य नच पर्वतमस्तके ॥
नोदक्ययाभिभाषेत यज्ञं गच्छेन्नचावृतः ।
अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च संनिधौ ॥
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ।
नदीमिन्द्रायुधं दृष्ट्वा कस्य चिद्दर्शयेद्बुधः ॥
न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् ।
न नृत्येदथवा गायेद् न वादित्राणि वादयेत् ॥
न पादौ धावयेत्कांस्ये कदाचिदपि भोजने ।
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ॥
उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।

उपवीतमलङ्कारं स्रजं करकमेव च ॥
बालातपः प्रेतधूमो वर्ज्यो भिन्नं तथाऽऽसनम् ।
न मृल्लोष्टं विमृद्नीयान्न च्छिन्द्यात्करजैस्तृणम् ॥
न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम् ।
न विगर्ह्य कथाः कुर्यात् बहिर्माल्यं न धारयेत् ॥
गवां पृष्ठेन यानं तु सर्वथैव विगर्हितम् ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ॥
सर्वं च तिलसंबद्धं नाद्यादस्तमये प्रति ।
नच नग्नः शयीतेह नचोच्छिष्टः क्वचिद्व्रजेत् ॥
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ।
अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः ॥
न कार्पासस्यास्थि तुषान् दीर्घमायुर्जिजीविषुः ।
न शूद्राय मतिं दद्यात् नोच्छिष्टं न हविष्कृतम् ॥
नचास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ।
न संहताभ्यां पाणिभ्यां कण्डूयेतात्मनः शिरः ॥
न स्पृशेच्चैतदुच्छिष्टो नच स्नायाद्विना ततः ।
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्जयेत् ॥
शिरःस्नातस्तु तैलेन नाङ्गं किंचिदपि स्पृशेत् ।
न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि ॥
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ।
देवतानां गुरोराज्ञां स्नातकाचार्ययोस्तथा ॥
नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च ।
मध्यंदिनेऽर्धरात्रे वा श्राद्धं भुक्त्वा च सामिषम् ॥
संध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ।
भद्रं भद्रमिति ब्रूयाद् भद्रमित्येव वा वदेत् ॥
शुष्कवैरं विवादं च न कुर्यात्केन चित्सह ।

नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते ॥
नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ।
अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः ॥
रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ।
मङ्गलाऽऽचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः ॥
जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ।
मङ्गलाऽऽचारयुक्तानां नित्यं च नियतात्मनाम् ॥
जपतां जुह्वतां चैव विनिपातो न विद्यते ।
वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः ॥
सावित्रान् शान्तिहोमांश्च कुर्यात्पर्वसु नित्यशः ।
पितॄंश्चैवाष्टकास्वर्चेत् नित्यमन्वष्टकासु च ॥
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् ॥
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ।
द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ॥
परस्य दण्डं नो यच्छेत् क्रुद्धो नैनं निपातयेत् ।
अन्यत्र पुत्राच्छिष्याच्च शिष्ट्यर्थं ताडयेच्च तौ ॥
प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।
अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः ॥
अम्भस्यश्मप्लवेनैव सह तेनैव मज्जति ।
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ॥
परकीयनिपानेषु न स्नायाद्धि कदाचन ।
सप्तोद्धृत्य ततः पिण्डान् कामं स्नायाच्च पञ्च वा ॥
उदपानात्स्वयंगृह्य बहिः स्नात्वा न दुष्यति ।
यमान् सेवेत सततं न नित्यं नियमान् बुधः ॥
आनृशंस्यं, क्षमा, सत्यम्, अहिंसा, दम, मस्पृहम् ।

ध्यानं, प्रसादो, माधुर्य्यं, मार्जवं, च यमा दश ॥
शौच,मिज्या, तपो, दानं, स्वाध्यायो,पस्थनिग्रहौ ।
व्रतो,पवासौ, मौनं, च स्नानं च नियमा दश ॥
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥
उत्तमैरुत्तमैर्नित्यं सम्बन्धानाचरेत्सदा ।
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥
गुरून् भृत्यांश्चोज्जिहीर्षन् आर्चिष्यन् देवताऽतिथीन् ।
सर्वतः प्रतिगृह्णीयाद् नतु तृप्येत्स्वयं ततः ॥
येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन् न रिष्यति ॥
एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः ॥
अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् ।
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते इति ॥

स्वर्ग्यायुष्येत्यादेर्मनुग्रन्थस्यायमर्थः । वयसो बाल्यादेः । कर्मणो यागादेः। अर्थस्य धनस्य । वेषं सारूप्यम् । तदनुरूप आत्मन्युत्कर्षप्रत्ययः। शास्त्राणि विद्यास्थानानि । नियमान् व्याख्यानानि । नियम्यते एभिरर्थ इति व्युत्पत्तेः । शक्तः अर्जनसमर्थः । वत्सतन्त्रीं गोवत्सबन्धनं, दामेति नारायणः । वत्सशब्दो जातरूपलक्षणमिति हरदत्तो नोपरिवत्सतन्त्रीं गच्छेदिति गौतमस्मृतेर्व्याख्यायाम् । धारणा निश्चयः । नाऽश्नीयादिति । सार्धमेकपात्रे इति नारायणः । एकस्मिन् काले भोजनं निषिध्यत इति व्याख्यानान्तरं हरदत्तेन कृतम् । यत्तु माधवीये अङ्गिरोवचनम्—

ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन ।
न तस्य दोषमिच्छन्ति नित्यमेव मनीषिण इति ॥

तद्विवाहविषयमिति विज्ञानेश्वरस्मृत्यर्थसारप्रभृतयः। एतेन

ब्राह्मण्या भार्यया सार्द्धं क्वचित् भुञ्जीत वाऽध्वनि।

अधोवर्णस्त्रिया सार्द्धं भुक्त्वा पतति तत्क्षणात्।

इति माधवोदाहृतमादित्यपुराणवचनमपि व्याख्यातम्। क्वाचिद्विवाहे अध्वनि वेत्यर्थात्। इदमपि सर्वथा दोषाभावपरं न भवति। किन्तु दोषाल्पत्वपरमिति माधवाचार्याः। क्षुवतीं क्षुतंकुर्वतीम्। टुक्षु शब्दे। नाञ्जयन्तीमिति। एतच्च न भार्यामात्रविषयं किन्तु स्त्रीमात्रपरम्। भार्यया सहभोजनम्, अञ्जयन्त्यवेक्षणं च वर्जयेदिति गौतमस्वरसादिति मतान्तरं हरदत्तेनोक्तम्। प्रस्नुवन्तीं पुत्रं पाययन्तीमित्यर्थः। नुम् छान्दसः। ष्णुप्रस्रवणे। एकवासा नग्नो वा नाद्यान्न च स्नायादिति नारायणः। जीर्णे शीर्णे प्राकारादौ तथा देवतायतने चेत्यर्थः। अवृतो यजमानेनाऽनामन्त्रितः। इदं चार्त्विज्यादिलोभेन न गच्छेदित्येवं परम्। दिदृक्षया गमने तु न दोषः। तथाच गौतमः—

न यज्ञमवृतो गच्छेद्दर्शनाय तु कामत इति।

गोष्ठे स्थाने। उद्धरेदिति उत्तरीयाद्बहिः कुर्यादित्यर्थः। उद्धृतस्नेहं पिण्याकादि। तक्रे तु वचनाददोष इति नारायणः। हरदत्तस्तु—उद्धृतस्नेहविलयनपिण्याकमथितप्रभृतीनि चानन्तवीर्याणि नाश्नीयादिति गौतमवचनमुपादाय उद्धृतस्नेहे उपात्ताग्रमण्डे दधिपयसी, विलयनं नवनीतमलम्। यस्य मथनमात्रं नाम्बुसंसर्गः तद्दधिमथनम्। उद्धृतनवनीतं तक्रं तु आश्यमनाश्यं वेति चिन्त्यम्। आचारस्त्वशनमेवेति।

तक्रं त्युदश्विन्मथितं पादाम्ब्वर्धाम्बुनिर्जलमिति।

नैघण्टुका इति व्याख्यत्। अतिसौहित्यम् अत्यशनम्। करकं मृत्कमण्डलुम्। बालातपः सङ्गवकालातपः, शरदि पुनःसंधुक्षणादादित्यस्य बाल्यं तदातपो बालातप इत्यन्ये। करजैर्नखैः। कर्म कारीर्यादिकाम्यम्। निष्फलं फलसंकल्पशून्यं न कुर्यात्। वृथाचेष्टा त्व-

स्मिन्नेव प्रकरणे पृथङ्निषिद्धा ।

न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेदिति ।

बहिर्माल्यं शिखावेष्टनेन । सर्वथैवेति रथादियोजनेन तु गोभिर्यानम् ईषद् गर्हितमिति तात्पर्य्यम् । तिलसंबद्धं तिलप्रकृतिकं तैलाद्यपि । अस्तमयं प्रति । तदनन्तरम् । संविशेत् शयीत । कपालिका घटाद्यंशः । कार्पासस्यास्थि बीजम् । मतिं दण्डनीतिशास्त्रादिविषयम् । अयं च साक्षादुपदेशे निषेधः

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इति ।

ब्राह्मणद्वारकोपदेशस्याभ्यनुज्ञानात् । नोच्छिष्टमिति । अत्र हरदत्तः-गृहस्थशूद्रविषयकोयमुच्छिष्टदाननिषेधः । उच्छिष्टमन्नं दातव्यं शूद्रायागृहमेधिने । गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने इति व्याघ्रवचनात् । एवं च गौतमीये दशमेऽध्याये उच्छिष्टासनं शिल्पवृत्तिश्चेति शूद्रधर्मेषु यत्पठ्यते तदपि अगृहस्थशूद्रपरमेवेति बोध्यम् इति आस्थितवान् । हविष्कृतामिति यत आकृष्य हुतं हविस्तं पुरोडाशादिहविःशेषम् । नचास्येति पूर्ववत् । पूर्वं दण्डनीत्यादिविषयिणी मतिर्न देयेत्युक्तम् । सम्प्रति धर्मादिविषयिणीत्यपौनरुक्त्यम् । एतदिति शिर इत्यर्थः । ततः शिरसो विना । इदन्तु शक्तविषयम् । "आशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणा" मिति स्मरणात् । केशग्रहान् परेण स्वशिरःकेशग्रहान् । अङ्गं स्वाङ्गं न स्पृशेन्न प्रक्षयेत् । बभ्रुणः कपिलस्य प्राणिनश्छायाम् । श्राद्धं भुक्त्वा तथा सामिषं भुक्त्वा न सेवेत चिरं तत्र न तिष्ठेत् । भद्रं वस्तुतो यच्छोभनम् । भद्रमित्येवेति अभद्रमपीति भावः । तथाच गौतमः—अधेनुं धेनुभव्येति ब्रूयादभद्रं भद्रमिति । कपालं भगालमिति मणिधनुरिन्द्रधनुरिति । धेनुः पयस्विनी गौः अधेनुस्तद्विपरीता । तामधेनुभव्येति ब्रूयात् । न पुनरधेनुरिति । धेनोर्भव्ये इति वार्त्तिकोक्तो मुम् आर्षत्वान्नेति बोध्यम् । अभद्रमपि वस्तु भद्रमित्येव ब्रूयात् । कपालं ब्रुवन् भगालमिति ब्रूयात् । इन्द्रधनुरिति ब्रुवन् मणि-

धनुरिति ब्रूयादिति हरदत्तो व्याख्यत् । अतिकल्पम् उदयास्तमये मैत्रं विष्ठोत्सर्गम् । मित्रदेवताप्रसाध्यत्वात् । वक्ष्यति हि मनुः—मित्रमुत्सर्ग इति । अञ्जनं तैलाभ्यङ्गम् । अहिंसादममिति समाहारद्वन्द्वः । स्पृहाया अभावः अस्पृहम् अर्थाभावेऽव्ययीभावः । स्वाध्यायसहित उपस्थनिग्रह इति मध्यमपदलोपी समासः । अश्राद्धिनः श्रद्धारहितस्य । येनास्येति । यत्र व्याख्यातॄणां श्रुत्यर्थे विप्रतिपत्तिस्तद्विषयकमेतत् । सतां मार्गं सदाचारविषयम् । न रिष्यते न हिंस्यते । रुषरिषहिंसायां कर्मणि लट् । अनेन विप्र इति । ब्रह्मचारिणोपि अविरुद्धानि स्नातकव्रतान्येतेन प्राप्यन्ते । अत एव नेक्षेतोद्यन्तमित्यनेन स्नातकप्रकरणस्थेन विशेषेण भास्करालोकननिषेधस्य ब्रह्मचारिप्रकरणे सामान्यतः श्रुतस्याप्युपसंहारमाह विज्ञानेश्वरः । मनुग्रन्थस्य भास्करालोकसामान्यनिषेधस्य तद्ग्रन्थस्थेनैव विशेषेणोपसंहारे सामान्ये वा वैयर्थ्यं स्यादिति नात्रोपसंहार इति तु हरदत्तादयः । एतद्व्रतप्रकरणे च मनु, याज्ञवल्क्याभ्यामुपाकर्मानध्यायावुक्तौ । अत एव ग्रहणाध्ययनप्रकरणाभावाद्धारणाध्ययनेप्यङ्गमुपाकर्म । गोभिलवाक्यं च धारणाध्ययनाङ्गत्वादित्यादि प्रागेवोदाहृतम् । एवं चानध्याया अपि धारणाध्ययनादिसाधारणाः । अतएव ब्रह्मयज्ञाध्ययनादौ अनध्यायाध्ययनप्रतिप्रसवाः पूर्वोक्ताः सङ्गच्छन्ते । अत एव च श्वनकुलादीनामन्तरागमने त्र्यहैकाहयोर्ग्रहणाध्ययनधारणाध्ययनपरत्वेन व्यवस्था विज्ञानेश्वरहरदत्तादिभिरुक्ता सङ्गच्छते । यत्तु प्रसङ्गलक्षणे तृतीयचरणे 'मन्त्राणां कर्मसंयोगे स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वा' दित्यधिकरणे पर्वणि नाध्येतव्यमित्यादीनां प्रकरणाद् ग्रहणाध्ययनाङ्गतेत्युक्तं तत्तु धारणाध्ययनाङ्गताग्राहकं नास्तीति कृत्वाचिन्तामनुरुध्य । उपयोक्ष्यते च समानन्यायेषु भिक्षाचर्यादिषु न चैवं सिद्धान्ते कर्मकालेप्यनध्याये मन्त्रप्रयोगानुपपत्तिः । वाचनिकस्य प्रतिप्रसवस्य प्रागेवोदाहृतत्वादिति दिक् ।

इदानीं गौतमोक्तानि प्रागुक्तेष्वन्तर्भूतानि स्नातकव्रतान्युच्यन्ते नवमे ऽध्याये। न रक्तमुल्वणमन्यधृतं वा वासो बिभृयात्। रक्तं कुसुम्भादिना। उल्वणं बहुमूल्यम्। अन्येन गुरुभिन्नेन धृतमिति हरदत्तः। न स्रगुपानहौ अन्यधृते इति विपरिणमय्य सम्बध्यते। निर्णिक्तमशक्तौ। अशक्तौ अन्यालाभे अन्यधृतं वासः स्रजमुपानहौ च निर्णिज्य धारयेत्। 'नपुंसकमनपुंसकेने' त्येकशेषैकवद्भावौ। न तिष्ठन्नुद्धृतोदकेनाचामेत्। एतेन जानुदघ्ने जले तिष्ठतोप्याचमनमनुज्ञातमिति हरदत्तः। न शूद्राशुच्येकपाण्यावर्जितेन। शूद्रेण शुचिनापि, तथा अशुचिना ब्राह्मणेनापि, तथा एकेन पाणिना शुचिब्राह्मणेनापि यदुदकमावर्जितं तेन नाचामेत्। यद्यपि यत्स्वयं वामहस्तेनावर्जितं दक्षिणेनाचम्यते तथा तत्र हस्तद्वयस्याप्याचमने सम्बन्धाददोष इति हरदत्तः। नाकल्पां नारीमभिरमयेत्। अकल्पाम् अस्वस्थां न गच्छेत्। पादपादधावना सन्दीस्थभोजनादीनि वर्जयेत्। पादेन पादेन पादप्रक्षालनं, पीठिकास्थभोजनं च वर्जयेदित्यर्थः। न प्रावृत्य शिरोऽहनि पर्यटेत्, प्रावृत्य रात्रौ। रात्रौ प्रावृत्यैव पर्यटेदित्यर्थः। मूत्रोच्चारे च। मूत्रपुरीषं प्रावृतशिराः सन् कुर्यादित्यर्थः। सोपानत्कश्चाशनाभिवादननमस्कारान् वर्जयेत्। उपानच्छब्दः पादुकाद्युपलक्षणमिति हरदत्तः। न पदासनमपकर्षेन्न शिश्नोदरपाणिवाक्चक्षूंषि चपलानि कुर्यात्। अपकर्षणमात्मसमीपप्रापणम्। पाणिचापलं शिल्पकर्मशिक्षा। चक्षुश्चापलं नृत्तादिदिदृक्षयेति हरदत्तः। न कुलङ्कुलः स्यात्। कुलमेव कुलं यस्य स कुलङ्कुलः। मुमागमश्छान्दसः। अन्यत्राध्ययनादौ लभ्यमाने स्वकुल एव न तिष्ठेदित्यर्थः। एते च स्नातकधर्मा अविरुद्धाः शूद्रेणाप्यनुष्ठेया इति केचित्। तथाच याज्ञवल्क्यः—

शूद्रस्य द्विजशुश्रूषा तया जीवन् वणिग्भवेत्।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन्।
भार्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेदिति।

अत्र श्राद्धानि क्रियाश्चेति द्वन्द्वः । क्रियाः स्नातकव्रतानि इति **विज्ञानेश्वरः** । एतेन **गौतमे** दशमेऽध्याये शूद्रश्चतुर्थो वर्ण इत्युपक्रम्य श्राद्धकर्मभृत्यभरणं स्वदारतुष्टिरिति यदुक्तं तत्रत्यं श्राद्धकर्मपदमपि समाहारद्वन्द्वरूपं, कर्मपदं च स्नातकव्रतोपसंग्राहकमिति **विज्ञानेश्वरेण** ध्वनितम् । **हरदत्तस्त्वाह**—श्राद्धाक्रियेति श्राद्धकर्मेति च श्राद्धमेवोच्यते नतु द्वन्द्वः। स्नातकधर्मणामप्रकृतानां क्रियाशब्दमात्रेणाऽऽभात् । प्रत्युत स्मृतिविरोधः

स्नातकव्रतलोपेषु प्रायश्चित्तं विधीयते ।

राजब्राह्मणयोरेव नेतरषां कथञ्चनेति ।

वचनात् । अतएव वैश्यस्यापि नैते धर्माः। किंतु ये वैश्यं प्रति विशिष्य स्मृतिषूक्तास्तावन्त एवेति । **गौतमीयनवमाध्याये मिताक्षरायां** स्फुटतरमिदम् । युक्तं चैतत् । शूद्रधर्मताभ्युपगमे संकीर्णेष्वपि 'शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृता' इत्यपि देशात्तत्प्राप्तौ उदाहृतस्मृतेर्निर्विषयतापत्तेः । यानि तु व्रतेषु पठितान्यपि पुनरन्यत्र पठ्यन्ते तेषां यथायथं शूद्रादिषु प्राप्तिरिष्टैव। "यथा नाहितं नानृतं चैवे" ति व्रतेषु पठितम् । "सत्यं दया दमः शौच"मिति च साधारणधर्मेषु। अनृतप्रतिपक्षभूतं सत्यमुच्यमानं शूद्रादीनां भवत्येव । यथा शूद्रेषु दासगोपालादीनामभोज्यान्नता मन्वादिभिर्व्रतेषु पठिता **गौतमेन** तु नवमे व्रतान्यभिधाय सप्तदशे भक्ष्याभक्ष्यप्रकरणे पठिता वैश्यस्यापि भवत्येव। एवं तत्रैवान्येपि व्रतान्तरगताः पठ्यन्ते। अत एकव्रतव्याख्यानशेषे **नारायणः**-अन्यत्रोक्तानामपीह पुनरभिधानं संकल्पप्राप्त्यर्थं व्रतलोपनिमित्तकऽयहाभोजनादिप्रायश्चित्तप्राप्त्यर्थं चेति। अत्र **याज्ञवल्क्यनोक्तानि** न नक्तं स्नायादित्यादीनि समावर्त्तनप्रकरणपाठात्तदङ्गानि तत्प्रयोगमध्य एवानुष्ठेयानीत्युक्तम् । यानि तु नेक्षेतोद्यन्तमित्यादिना मन्वादिभिरुक्तानि तानि पुरुषार्थानि । तथाच प्रयोजकलक्षणे प्रथमचरणे **जैमिनिसूत्रम्** 'तदुत्सर्गे कर्माणि पुरुषार्थाये' त्यादि ।

उपक्रमे श्रुतं ब्रह्मचारिव्रतपदं यतः ।
तदन्वयबलात्कर्माविशेषोतोत्र चोद्यते ॥
तेन लक्षणयाप्यत्र पर्युदासः सच क्रतोः ।
बहिःश्रुतफलाकाङ्क्षी पुरुषार्थत्वमृच्छति ॥
श्रुत्यादिक्रतुसंबन्धे प्रमाणं नात्र विद्यते ।
पुरुषापेक्षितार्थत्वं विधिना चावबोधितम् ॥
साक्षादपेक्षितं तस्य फलमेव नतु क्रतुः ।
अतः फलार्थता तच्च वाक्यशेषादघक्षयः ॥

इति पार्थसारथिश्च । वाक्यदोषादिति । “एतावताहैनसाऽयुक्तो भवती” त्येवंरूपादित्यर्थः । यद्यप्यस्मिन्नधिकरणे ब्रह्मचारिधर्मभूतप्रजापतिव्रतान्तर्गतं नेक्षेतोद्यन्तमित्येतदुदाहृत्य विचारितं तथापि समानन्यायत्वात् स्नातकव्रतान्तर्गतेप्येतत्सिद्धान्तप्रवृत्तिरित्याशयेनेदमुच्यते । एवञ्च ब्रह्मचारिणं प्रत्यविशेषेण सूर्यदर्शनं निषिध्यत इति हरदत्तोक्तिः पार्थसारथिप्रभृतिग्रन्थैर्विरुध्यत इति चिन्त्यम् । एवंस्थिते कदा संकल्प इत्याकाङ्क्षायां नोद्यन्तमिति शतृप्रत्ययेनादित्योदयस्य निमित्तत्वप्रतिपादनात्तदवस्थे आदित्ये सति तद्वीक्षणाभावः संकल्पयितव्यः । नोद्यन्तमीक्षेन्नास्तं यन्तमित्यादि तन्त्ररत्ने स्थितम् । तत्र प्राचां श्लोकोप्युदाहृतः

त्रिसंध्यं जपतानेन सावित्रीं नेक्षइत्ययम् ।
आदित्यं ध्यायता कार्यः संकल्पः पापनाशन इति ॥

अत्र वदन्ति । शतृप्रत्ययो लटः शतृशानचावित्यनेन लक्षणहेत्वोरित्यादिना च विहितः । तत्रायं हेतावेवेत्यत्र प्रमाणाभावः । किंच हेतुः फलमिति व्याख्यायामर्जयन् वसतीति वैयाकरणैरुदाहृतत्वादर्जनफलकवासवानिति च विवरणात्प्रकृते तदन्वयः । अर्थलक्षणपरिचायकमिति व्याख्याय शयाना भुञ्जते यवना इति चोदाहृत्य शयनोपलक्षितभोजनकर्त्तार इति विवरणात् तद्वदिहापीत्यभिमतम् । तर्हि उदयपरिचायितं

यदीक्षणं तदभावसंकल्पस्य व्रतान्तरसंकल्पकाले सकृदेव चानुष्ठाने को विरोधः। नाप्यत्र शतृबलाद्वर्त्तमानताप्रतीतिः। अजयन्नवात्सीद्वत्स्यति चेत्यादिवत्। तथाच पाणिनिः—"धातुसंबन्धे प्रत्ययाः" इति असूत्रयत् तदा उत्पत्स्यमानेपि सोमयाजी पुत्रो भवितेत्यादि च भाष्यादावुदाहृतम्। वसन् ददर्शेत्यादि प्रयोगाश्चैवं सङ्गच्छन्ते। किंच,

नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम्।
क्षुवतीं जृम्भमाणां च नचासीनां यथासुखम्।
नाञ्जयन्तीं स्वके नेत्रे—

इत्यादावपि तथात्वापत्तौ बहुव्याकुलीस्यात्। तस्मात्समावर्त्तनप्रयोगं समाप्य पुरुषार्थानीमान्यपि व्रतानि संकल्पयेदित्येव युक्तम्। नच प्रत्यहं संकल्प इत्यंशे तदुत्सर्गइत्याद्यधिकरणस्य कश्चिद्व्यापारोस्ति क्रत्वर्थत्वं पूर्वपक्षीकृत्य पुरुषार्थतासमर्थनमात्रेणाधिकरणपर्यवसानात्। व्याख्यातृवचसश्च प्रासङ्गिकस्य व्याकरणादिविरोधे उपेक्षणीयत्वादिति दिक्। इति स्नातकव्रतनिरूपणम्।

अथ क्रमप्राप्तो विवाहः।

सच त्रिविधेनापि वेदव्रतोभयस्नातकेन समावर्त्तनादविलम्बेन कर्त्तव्यः

अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः।

इति दक्षवचनात्। तत्र मूलम्—

समावर्त्त्य सवर्णां तु लक्षण्यां स्त्रियमुद्वहेदिति।

लक्षण्यां बाह्याभ्यन्तरलक्षणान्विताम्।

तत्र बाह्यानि लक्षणान्याह मनुः—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियमिति॥

यस्या अङ्गस्याङ्गेषु अङ्गुल्यादिष्वपि वैगुण्यं नास्ति सा अव्यङ्गाङ्गी।

वर्ज्यान्याह सएव—

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोहिणीम् ।
नालोमिकां नातिलोमां न वाचालां न पिङ्गलाम् ॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रेष्यनाम्नीं नच भीषणनामिकामिति ॥

कपिला रक्ततण्डुलवर्णा । पिङ्गला अग्निवर्णा । अन्त्यनाम्नी म्लेच्छनाम्नीति माधवः। अन्त्यनाम्नी चाण्डालीत्यादिनाम्नी । पर्वतनामिका विन्ध्येत्यादिनामिका । प्रेष्यनाम्नी दासीत्यादिनाम्नी। भीषणनामिका चामुण्डेत्यादिरिति नारायणः । विष्णुपुराणे–

न श्मश्रुव्यञ्जनवतीं नचैव पुरुषाकृतिम् ।
न घर्घरस्वरां क्षामां तथा काकस्वरां नच ॥
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ।
गण्डयोः कूपकौ यस्या हसन्त्यास्तां च नोद्वहेदित्यादि ॥

आन्तराणि तु लक्षणानि आश्वलायनगृह्ये उक्तानि। दुर्विज्ञेयानि लक्षणान्यष्टौ पिण्डान् कृत्वा “ऋतमग्रे प्रथमं जज्ञे ऋते सत्यं प्रतिष्ठितम्। यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यता” मिति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति। क्षेत्राच्चेदुभयतः सस्यात् गृह्णीयादन्नवत्यस्याःप्रजा भविष्यतीति विद्याद्, गोष्ठात्पशुमती, वेदिपुरीषाद्ब्रह्मवर्चस्विनी, अविदासिनो ह्रदात्सर्वसम्पन्ना, देवनात्कितवी, चतुष्पथाद्विप्रव्राजिनी, इरिणादधन्या, श्मशानात्पतिघ्नीति । अस्य वृत्तिकृदुक्तोर्थः । लक्षणानि दुर्विज्ञेयानीति कृत्वा एवं परीक्षते । क्षेत्रादिभ्योऽष्टभ्यो मृदमाहृत्याष्टौ पिण्डान् कृत्वा ऋतमित्यनेन मृत्पिण्डानभिमन्त्र्य कुमारीं ब्रूयात । यदेकस्मिन् वत्सरे द्विः फलति तदुभयतः सस्यं क्षेत्रम् । अपवृत्ते कर्मणि या वेदिः सा वेदिपुरीषम्। अविदासी ह्रदः, न विदस्यति इति व्युत्पत्त्या अशोष्यो ह्रदः । तसुदसुउपक्षये णिनिः । देवनं द्यूतस्थानम् । द्वौ प्रव्रजतीति द्विप्रव्राजिनी । माधवस्तु–विविधं प्रकर्षेण व्रजतीति विप्रव्राजिनी स्वैरिणीत्यर्थ इत्याह। यत्रोप्तं न प्ररोहति तदी-

रिणम्। इयं च लक्षणपरीक्षा कुलपरीक्षानन्तरं बोध्या। तथाचाऽऽश्वला-यनः—कुलमग्रे परीक्षेतेति। कुलपरीक्षा च सदाचारादिगुणवत्तया हीनक्रियत्वादिदोषहीनतया च। तत्र दोषानाह मनुः—

स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत्।
हीनक्रियं निष्पुरुषं निश्छन्दो लोमशार्शसम्॥
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि चेति॥

हीनक्रियं योगादिक्रियारहितम्। निष्पुरुषं स्त्रीमात्रशेषम्। निश्छन्दोऽध्ययनवर्जितमिति माधवः। याज्ञवल्क्यः—

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजामिति॥

अविप्लुतं ब्रह्मचर्यं यस्य सः। विप्लवे सति तु कृतप्रायश्चित्त इति बोध्यम्। अनन्येति। या दानेनोपभोगेन वा पुरुषान्तरपूर्विका न भवति ताम्। अनेन सप्त पुनर्भुवो व्यावर्त्यन्ते। तथाचाह बोधायनः—वाग्दत्ता मनोदत्ता अग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विन्देदिति। अत्र वाग्दत्तामनोदत्तयोर्निषेधः पूर्वस्य निर्दोषत्वे बोध्यम्। अतएव नारदः—

दत्तां न्यायेन यः कन्यां वराय न ददाति ताम्।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवदिति॥

तत्रैव दण्डं विधत्ते। दुष्टे तु पूर्ववरे वाग्दत्तापि वरान्तराय देया। तथाच पराशरः—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयत इति॥

अस्यार्थः, वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतौ सम्भावितोत्पत्तिकपतित्वे पूर्वस्मिन् वरे नष्टे सति लक्षणया दूरदेशगमनेनाऽपरिज्ञा-

तद्वृत्तान्ते सति । तथाच नारदः—

परिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत् ।
त्रीनृतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम् ॥
स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।
वरणाद् ग्रहणम्पाणेः संस्कारोपि विचक्षणैः ॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनादिति ॥

परिगृह्य वाचा दत्तां स्वीकृत्य । त्रीनृतूनिति । इदं च कन्याया अधार्यत्वे बोध्यम् । धार्यत्वे तु

प्रदाय शुल्कं कन्याया गच्छेद्यः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानत इति ॥

नारदेनैव वर्षम्प्रतीक्षाया अभिधानात् । स्त्रीपुंसयोरित्यादेरयमर्थः। स्त्रीपुंसयोः संसर्गात्प्राक् त्रितयं क्रियते । वरणम्, पाणिग्रहणम्, सप्तपदीप्रक्रमश्चेति । तत्र वरणं नाम वरस्य सम्प्रदानत्वाय कन्याया दात्रा प्रार्थनम् । तदेव च वाग्दानम् । एवंस्थिते तयोः पाणिग्रहणसप्तपदप्रक्रमणयोः पूर्वभावि यद्वरणं तदनियतम् अनियामकमित्यर्थः । तयोरेव भार्यात्वोत्पादकत्वादिति भावः । तथाच मनुः—

पाणिग्रहणमन्त्रैस्तु नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे इति ॥

दोषदर्शनादिति वाक्यशेषस्यायमर्थः । वरणस्यानियामकत्वमपि पूर्ववरस्य दोषे सत्येवेति । यदि तु अन्यस्मै दत्तायां पूर्ववरोप्यायाति तदाऽनूढां तां लभते । ऊढायां तु स्वदत्तं द्रव्यमेव लभते नतु कन्याम्। तदाह कात्यायनः—

अनेकेभ्योपि दत्तायामनूढायां तु तत्र वै ।
पुरागतश्च सर्वेषां लभते तादिमां सुताम् ॥
अथाऽऽगच्छेत वोढायां दत्तं पूर्ववरो हरेदिति ।

तदेवं नष्टे इति व्याख्यातम् । एवं मृतेपि । तथाच वसिष्ठः—

अद्भिर्वाचा च दत्ताया म्रियेतादौ वरो यदि ।
नच मन्त्रोपनीता स्यात्कुमारी पितुरेव सेति ॥

मन्त्रोपनयनं पाणिग्रहणादिकं विना वाचा दानमिवाद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः । अत एव यमः—

नोदकेन नवा वाचा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे इति ॥

तथा प्रव्रजिते कृतसंन्यासे । क्लीबे चेति । चकारादन्त्यजातीयादिग्रहणम् । तथाच कात्यायनः—

स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोपि वा ॥
ऊढापि देया साऽन्यस्मै सहावरणभूषणेति ॥

अत्रोढापीत्यपिशब्दः कौमुतिकन्यायेन वाग्दत्ताया एवाऽन्यस्मै दानमाचष्टे नतूढायाः । अन्यथा सगोत्रोढाया अपि पुनर्विवाहप्रसक्तौ मातृवत्परिपालयेदिति शास्त्रं विरुध्यते । यत्तु—

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन द्विजो विन्देत देवर इति ।

मनुनोक्तम् ॥ यच्च—

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ।
आगर्भसम्भवाद्गच्छेदन्यथा पतितो भवेद् ।

इति याज्ञवल्क्येनोक्तम् । तद्देवराच्च सुतोत्पत्तिरिति कलिनिषिद्धेषु प्रागेव गणितम् । यदपि—

उद्वाहितापि सा कन्या नचेत्सम्प्राप्तमैथुना ।
पुनः संस्कारमर्हेत यथा कन्या तथैव सेति ।

नारदेनोक्तम् । तदपि कलौ निषिद्धम् । ऊढायाः पुनरुद्वाह इति । नच कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृत इत्यादिपराशर-

वाक्यं प्रतिपादकमस्त्विति वाच्यम् । कलावनुष्ठेयान् धर्मानेव वक्ष्यामीति प्रतिज्ञाय तद्ग्रन्थप्रणयनादिति दिक् । तदेवमनन्यपूर्विकामिति पदं व्याख्यातम् । कान्तां कमनीयाम्, उद्वोढुर्मनोनयनानन्दकारिणीम् । अत एवापस्तम्बः—यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिरिति। असपिण्डामिति। सपिण्डता च सप्तपुरुषपर्यवसायिनी। तत्रैकः पिण्डदाता । त्रयः पिण्डभाजः पितृपितामहप्रपितामहाः । त्रयो लेपभाजः वृद्धप्रपितामहाद्याः । तथाच मत्स्यपुराणम्—

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति ॥

अयं भावः, सप्तानां पुरुषाणामेकपिण्डक्रियानुप्रवेशः सापिण्ड्यम्। तथाच देवदत्तस्यैकस्य स्वकीयपित्रादिभिः षड्भिः सह सापिण्ड्यम्। तथा पुत्रादिभिः षड्भिरिति । नन्वेवं भ्रातृपितृव्यादावसापिण्ड्यापत्तिरिति चेत्, अत्राह माधवः—

उद्देश्यदेवतैक्येन क्रियैकत्वं विवक्षितम् ।

देवदत्तकर्तृकक्रियायां ये देवतात्वेनानुप्रविशन्ति तेषां मध्ये यः कश्चिद्भ्रातृपितृव्यकर्तृकक्रियायामप्यनुप्रविशत्येवेति साविण्ड्यसम्भवः। एवञ्च भार्याणामपि भर्तृकर्तृकपिण्डदानक्रियायां सहकर्तृत्वात्साविण्ड्यमिति । सोयं निर्वाप्यसापिण्ड्यपक्षः । नन्वस्मिन्पक्षे गुरुशिष्यादिरपि सपिण्डः स्यात् पिण्डनिर्वपणे उद्देश्यत्वादिति चेद् । अत्र केचित्—

गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्द्विजः ।
गुरोश्च कन्यां शिष्यो वा तत्सन्तत्यापि नेष्यते ॥
पुरुषत्रयपर्यन्तं भ्रात्रादेर्नैतदिष्यते ।

इति वचनमुदाहृत्य त्रिपुरुषसापिण्ड्यमिष्टमेवेत्याहुः । वस्तुतस्तु अवयवान्वयपक्षेपि अतिप्रसङ्गस्य तौल्याद्योगरूढिबलेनैव च परिहर्त्तव्यत्वान्नायं दोष उपन्यासार्ह इति दिक् । अपरे त्ववयवान्वयसापिण्ड्यमाहुः । तद्यथा, अवयवानां शरीरसम्बन्धिनां रक्तमज्जादीनां यः शरी-

रान्तरे प्रवेशः स एव सापिण्ड्यम् । पुत्रे पितुरवयवानां साक्षात्प्रवेशः, पितामहाद्यवयवानां तु पितृद्वारा । अतः सापिण्ड्यम् । पितृपितृष्वस्रादिभिरपि पितामहावयवान्वयात्सापिण्ड्यम् । पत्न्या सह एकशरीरारम्भकत्वात् । यात्रोरपि एकशरीरारब्धैः स्वस्वपतिभिः सह एकशरीरारम्भकत्वेन । तदेवम् आधारतयाऽऽधेयतया वा एकशरीरावयवो यत्र न प्रविष्टः सोऽसपिण्ड इति फलितम् । नन्वेवमष्टमादावतिप्रसङ्गः किम्बहुना विधातृशरीरान्वयो दुष्परिहर इत्याशङ्क्य सङ्कोचो मन्वादिभिः, तन्निष्कर्षश्चाभियुक्तैः कृतः ।

वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः ।
पञ्चमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्त्तत इति ॥

कूटस्थो मूलपुरुषः, यतः सन्तानभेदः । एवं च मातृपितृद्वारकसापिण्ड्यवतीनां कन्यकानामियं सङ्ख्यासङ्कलना ।

उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्मकृद्दम्पती
द्वन्द्वं तस्य चतुष्कमष्टकमतोऽप्यस्य क्रमात् षोडश ॥
वंशारम्भकदम्पतिप्रभृतिरित्यासप्तकक्ष्यन्तदा
एकैकान्वयकन्यकाः पितृकुले त्वासप्तकक्ष्यं ब्रुवे ॥ १ ॥
यद्यप्येकस्य बह्व्योऽपि सुताः स्युस्तदपीह तु ।
सम्बन्धसाम्यादेकैव गणितेत्यवधार्यताम् ॥ २ ॥
एकस्मान्मिथुनात्सुतोऽथ दुहितो द्वन्द्वद्वयं तद्द्वया-
त्तस्माद्द्वन्द्वचतुष्कमष्ट च ततोऽतः षोडशाऽतो रदाः ।
यावत्सप्तमकक्ष्यमग्निरुत वः कन्या इहैकान्वये
ता दन्तैर्गुणिता रसैकखदृशो वंशे सपिण्डाः पितुः ॥ ३ ॥
मातुर्जन्मददम्पती च मिथुनद्वन्द्वं तयोः सागरा-
स्तस्याः पञ्चमकक्ष्यमश्वमितिरित्येकान्वयः पुंसते ।
द्वन्द्वाद् द्वन्द्वयुगं ततोऽभ्यय इतोऽष्टापञ्चकक्ष्यं शर-
क्षोण्यः सप्त गुणाः शराभ्रविधवो मातुः सपिण्डाः कुले ॥ ४ ॥

कुलद्वयस्य कन्यकायुता मिथः सपिण्डकाः ।
हिमांशुदृग्धराहशो विवाहकर्मवर्जिता इति ॥

अस्यार्थः, सप्तमपर्यन्तं पितृपक्षे वंशारम्भकाणां द्वन्द्वानां सङ्ख्या द्वात्रिंशत् । तथाहि । वरः प्रथमः । तन्मातापितृरूपं द्वितीयकक्ष्यानिविष्टं द्वन्द्वमेकम् । पितुर्मातापितरौ तृतीयकक्ष्यानिविष्टमेकं द्वन्द्वम् । पितामह्याः पितामहस्य च जनकं चतुर्थकक्ष्यानिविष्टं द्वन्द्वद्वयम् । तद्घटकस्य व्यक्तिचतुष्कस्य जनकं पञ्चमकक्ष्याप्रविष्टं द्वन्द्वं चतुष्कम् । तद्घटकस्य व्यक्त्यष्टकस्य जनकं षष्ठकक्ष्यानिविष्टं द्वन्द्वाष्टमम् । तद्घटकस्य व्यक्तिषोडशकस्य जनकं सप्तमकक्ष्याप्रविष्टं द्वन्द्वषोडशकमिति । तदेवमुक्तद्वात्रिंशन्मध्ये एकैकस्य द्वन्द्वस्यान्वये सपिण्डाः कन्याः त्रिषष्टिः । तथाहि उक्तेष्वन्यतममेकं द्वन्द्वं कूटस्थभूते प्रथमकक्ष्यानिविष्टं तत्सुतो दुहिता च द्वितीयकक्ष्यायाम् । ताभ्यामुत्पन्नं द्वन्द्वद्वयं तृतीयकक्ष्यायाम् । तद्घटकीभूतव्यक्तिचतुष्टयादुत्पन्नं द्वन्द्वचतुष्कं चतुर्थकक्ष्यायाम् । तद्घटकव्यक्त्यष्टकादुत्पन्नं द्वन्द्वाष्टकं पञ्चमकक्ष्यान्तर्गतम् । तद्घटकव्यक्तिषोडशकादुत्पन्नं द्वन्द्वषोडशकं षष्ठकक्ष्यान्तर्गतम् । तद्घटकद्वात्रिंशद्व्यक्तिजनितं द्वात्रिंशद्द्वन्द्वात्मकं सप्तमकक्ष्यायाम् । तदेवमुक्तायास्त्रिषष्टेः पूर्वोक्तद्वात्रिंशता गणनायां षोडशभिरधिका द्विसहस्री पितृवंशे फलिता भवति । मातृवंशे तु आरम्भकद्वन्द्वानि सप्त । तथाहि, मातुः पितृरूपमेकं द्वन्द्वम्, वरात्तृतीयकक्ष्यानिविष्टम् । तद्घटकव्यक्तिचतुष्टयस्य जनकं द्वन्द्वद्वयं चतुर्थकक्ष्यानिविष्टम् । तद्घटकव्यक्तिचतुष्टयस्य जनकं द्वन्द्वचतुष्टयं पञ्चमकक्ष्यायामिति । उक्तस्य द्वन्द्वसप्तकस्य मध्ये एकैकस्य द्वन्द्वस्यान्वये सपिण्डाः कन्याः पञ्चदश । तथाहि, उक्तेषु सप्तस्वन्यतमद्वन्द्वकूटस्थभूतं प्रथमकक्ष्यायाम् । तस्मात्पुत्रो दुहिता चेति द्वितीयकक्ष्यायाम् । तज्जन्यं द्वन्द्वयुगं तृतीयं तज्जन्यं चतुष्टयं चतुर्थकक्ष्यायाम् । तज्जन्यमष्टकं पञ्चमकक्ष्यायामिति । तदा सा पञ्चदशानां पूर्वोक्तसप्तभिः गुणनिकायां पञ्चोत्तरं शतं फलितम् । तदेव पितृकुलान्तर्गतायाः षोडशाधिकद्विसहस्र्याः मातृकुलान्तर्गतपञ्चाधिकशतेन

सङ्कलनायाम् २१२१. हिमांशुदृग्धराहशः एकविंशतिसहितशताधिका-द्विसहस्री फलिता भवतीति । सैषा विवाहकर्मणि वर्जनीया । तथाच **नारदः**—

मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमात्तथा ।
गृहस्थ उद्वहेत्कन्यामन्यथा गुरुतल्पग इति ॥

यत्तु **विष्णुपुराणवचनम्**—

पञ्चमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमाम् ।
गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृपेति ॥

तत्र सप्तमीं पञ्चमींप्रतीत्येत्यध्याहार्यम् । अन्यथा
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति
याज्ञवल्क्यवचनविरोधात् ॥

सप्तमे पञ्चमे चैव येषां वैवाहिकाक्रिया ।
क्रियापरा अपि हि ते सर्वत्राऽशुद्धतां गताः ॥

इति **मरीचिवचनविरोधाच्च** । यत्तु **पैठीनसिनोक्तम्**—पञ्चमीं मातृतः परिहरेत्सप्तमीं पितृतः त्रीन् मातृतः पञ्च पितृतो वेति। तत्राद्यः पक्षस्तावदविरुद्ध एव, त्रीन् मातृत इत्यादिर्द्वितीयपक्षस्तु अर्वाङ्निषेधपर इति **विज्ञानेश्वरः** । **माधवस्त्वाह**—अनुकल्पोयमिति । युक्तं चैतत् । चतुर्विंशतिमतस्वरसात् । तथा मूलम्—

समावर्त्य सवर्णां तु लक्षण्यां स्त्रियमुद्वहेत् ।
कुले महति सम्भूतां लक्षणैश्च समन्विताम् ॥
ब्राह्मेण तु विवाहेन शीलरूपसमन्विताम् ।
पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ॥
दशभिः पुरुषैः ख्यातां श्रोत्रियाणां महाकुलात् ।
उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् ॥
पञ्चमीं तदभावे तु पितृपक्षेप्ययं विधिः ।
सप्तमीं च तथा षष्ठीं पञ्चमीं च तथैव च ।

एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः ।
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ॥
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ।
असपिण्डा च या मातुरसगोत्रा च या पितुः ॥
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् ॥
नित्यं संव्यवहार्यः स्याद्वेदाच्चैतत्प्रदृश्यत इति ।
स्मृतिचन्द्रिकायां प्रयोगपारिजाते च । षट्त्रिंशन्मते-
तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यम इति ॥

अत्र हि तदभावे त्वित्युक्त्या अनुकल्पत्वं स्फुटीकृतम् । असपिण्डा-चेति श्लोके पितुरसगोत्रा चेति चकारेणाऽसपिण्डेत्यनुकृष्यते । सा प्रशस्तेत्यनेन च पूर्वोक्तानामनुकल्पत्वमेव स्फुटीक्रियते । यस्त्वित्यादिश्लोकेन तु तृतीयादिविवाहो देशाचारकुलाचाराभ्यां व्यवस्थित इति प्रतिपाद्यते । वेदाच्चैतदिति वाक्यशेषस्यायमर्थः । उक्तव्यवस्था, तृतीयादीनां परिणेयता च वेदे प्रसिद्धेति । तथाच व्यवस्थापरा श्रुतिः-"तेन स्वाध्वन्तेवततरुनो अधिवोचत । मा नः पथः पित्र्यान्मानवादधिदूरं नैष्टपरावत" इति । पित्र्यात्पितुरागतात् पथो दूरं नोस्मान्मा नैष्ट मा नयेति देवान् प्रति प्रार्थना । वेदाच्चेति चकारेण स्मृतिस्थां व्यवस्थां समुच्चिनोति । तथाच मनुः—

येनास्य पितरो याता इत्यादि ।

शातातपोपि-

मातृष्वसृसुतां केचित्पितृष्वसृसुतां तथा ।
विवहन्ति क्वचिद्देशे संकोच्यापि सपिण्डतामिति ।

बृहस्पतिश्च—

उदूह्यते दाक्षिणात्यैर्मातुलस्य च सुता द्विजैरिति ।

तृतीयादिविवाहः शतपथे दर्शपूर्णमासप्रकरणे प्रतीते । तस्माद् "समानादेव पुरुषादत्ता चाद्यश्च जायते।उत तृतीये संगच्छावहै चतुर्थे संगच्छावहै" इति । समानादेकस्मात्पुरुषादत्ता भोक्ता आद्यः संभोग्यः द्वाउत्पन्नौ, तौ च मिथः संकल्पयतः कूटस्थमारभ्य तृतीये चतुर्थे वा संगच्छावहै विवहावहा इत्यर्थः। अत्र हि प्रमाणान्तराविरोधादर्थ-वादाद्विधिः कल्प्यते इति माधवादयः। मन्त्रवर्णाश्च "आयाहीन्द्र-पथिभिरीलितेभिर्यज्ञमिन्द्रस्तुत्यैर्मार्गैर्नोस्माकमिमं यज्ञमायाहि आगत्य च भागधेयं भागं अस्माभिः दीयमानं जुषस्व । तृप्ताम् आज्यादिना संस्कृतां वपां त्वामुद्दिश्य जहुः त्यक्तवन्तः। अत्र दृष्टान्तद्वयम्। यथा मातुलस्य योषा दुहिता योषिति स्त्र्यपत्यानामिति वेदनिघण्टावभि धानात् दौहित्रस्य भागः, यथा पैतृष्वस्रेयी पौत्रस्य भागः, परिणेया तथेति । यत्तु शातातपेनोक्तम्-

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैवच ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेदिति ॥

यच्च। पैठीनसिना-पितृमातृष्वसुर्दुहितरः मातुलसुता धर्मतः भगिन्यस्ता वर्जयेदिति विज्ञायते इति ॥ यच्च व्यासेन-

मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिरिति ।

तदेतत्सर्वं गान्धर्वादिविवाहोढाविषयम् ।

तथा च मनुः-

पैतृष्वसेयीं भगिनीं स्वस्रियां मातुरेव च ।
मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमानिति ॥

अत्र हि भगिनीपदं पैतृष्वसेयादेः विशेषणम् । आप्तस्येति मातु-र्भ्रातुर्विशेषणम् । आप्तस्य संनिकृष्टस्य सपिण्डस्य गान्धर्वादिना ऊढाया मातुर्भ्रातुरित्यर्थः । तथाच मार्कण्डेयपुराणम्-

ब्राह्मादिषु विवाहेषु ऊढा या कन्यका भवेत् ।

भर्तृगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥
गान्धर्वादिविवाहेषु पितृगोत्रेण धर्मविदिति ॥

एवं च भगिनीति विशेषणमपि गान्धर्वादिना ऊढायाः अनिवृत्तिसापिण्ड्याया लाभार्थम् । एवं च ब्राह्मादिविवाहेषु मातुलसुताया इव मातृष्वसृसुताया अपि विवाहो यद्यपि प्राप्नोति तथापि अस्यां लोकविद्विष्टमिति निषेधान्न कार्यः । मातुलकन्यापरिणयस्तु प्रागुक्तश्रुतिस्मृत्युपदिष्टत्वद्दाक्षिणात्यशिष्टाचारात्कर्त्तव्य इति माधवाचार्याः ॥ सोऽप्ययं कलौ निषिद्धः ॥

गोत्रान्मातृसपिण्डात्तु विवाहो गोवधस्तथेति ।

प्राङ्माधवोदाहृतब्रह्मपुराणवचनादिति केचित् । अतएव बोधायनेन पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः यानि तु दाक्षिणतस्तान्यनुव्याख्यास्यामः । यथैतत् अनुपतनं, सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति ॥ तथोत्तरत ऊर्णा विक्रयः, सीधुपानम्, उभयतोदद्भिर्व्यवहारः, आयुधीयकं, समुद्रयानमिति । तत्रेतरदितरस्मिन् कुर्वन् दुष्यतीतरादितरस्मिन् तत्तद्देशप्रामाण्यात् मिथ्यैतदिति तु गौतमः । उभयमेव नाद्रियेत शिष्टस्मृतिविरोधदर्शनादिति ग्रन्थेनाऽनाचारत्वमेव प्रतिपादितम् । बृहस्पतिरपि —

उद्वह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ॥
उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वलाः ।
सजाताश्चापि गृह्णन्ति भ्रातृभार्यां सभर्तृकाम् ॥
सर्वदेशेष्वनाचारो रथ्याताम्बूलचर्वणमिति ॥

तस्मात्कलौ पितृतः सप्तमात् मातृतः पञ्चमाच्चोर्ध्वं विवाहः प्रशस्त इति स्थितम् ॥ सपत्नमातामहकुलेऽप्यातिदेशिकात्सापिण्ड्यादविवाहः । तथाच सुमन्तुः—पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलाः । तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि।

अन्यथा संकरकारिण्यः स्युरिति । अत्र च यावद्वचनं वाचनिकमिति न्यायेन परिगणितेष्वेवातिदेशिकं सापिण्ड्यं नतु सप्तमपञ्चमपर्यन्तमिति केचित् । यवीयसीमिति । वयसा कायपरिमाणेन च न्यूनाम् । तत्र वयोन्यूनताय । इयत्तामाह मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वर इति ।

बृहस्पतिस्तु—

त्रिंशद्वर्षो दशाब्दान्तु भार्यां विन्देत नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयादिति ।

विष्णुपुराणे—

वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयमिति ॥

अरोगिणीमिति, राजयक्ष्मादिरोगरहिताम् । भ्रातृमतीमिति, पुत्रिकाकरणशङ्काव्युदासार्थम् । अतएव मनुः—

यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कयेति ॥

यस्याः पिता पुत्रिकाकरणाभिप्रायवान्नवेति न ज्ञायेत तां नोपयच्छेदित्यर्थ इति माधवः । अनेनापरिभाषितापि पितुरभिप्रायमात्रेण पुत्रिका भवतीति गम्यते । तथाच गौतमः— अभिसन्धिमात्रात्पुत्रिकेत्येकेषां तत्संशयान्नोपयच्छेदभ्रातृकामिति । अभिसंधेराकारमाह मनुः—

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरमिति ॥

यत्र तु नैषा शङ्का तामभ्रातृकामप्युपयच्छेतेति माधवादयः । वरेण सह संप्रतिपत्तौ तु पुत्रिकाकरणं स्पष्टमेव विज्ञायते । सा च संप्रतिपत्तिर्द्वेधा । केवलमातामहसंबंधित्वेनोभयसंबन्धित्वेन चेति । आद्ये दानमन्त्रमाह वासिष्ठः—

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।

अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति ।

द्वितीये त्वाह **कात्यायनः**–

अपुत्रोहं प्रदास्यामि तुभ्यं कन्यां भवानपि ।
पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति ॥

असमानार्षगोत्रजामिति । ऋषेरिदमार्षम् प्रवरः गोत्रप्रवर्त्तकस्य मुनेर्व्यावर्त्तको मुनिगण इत्यर्थः । तद्यथा । गोत्रप्रवर्त्तकस्य भरद्वाजस्य व्यावर्त्तकावङ्गिरोबृहस्पती । अतएवाङ्गिरसबार्हस्पत्यभारद्वाजगोत्रोहमिति प्रयुञ्जते । गोत्रं तु वंशपरम्पराप्रसिद्धम् । स्वसमाने आर्षगोत्रे यस्य तस्माज्जाता या न भवति तामित्यर्थः । यास्कवाधूलमौनमौकानां भिन्नगोत्राणामपि भार्गववैतहव्यसावेतसेति प्रवरैक्यान्न विवाह इति **माधवादयः** । वस्तुतस्तु वत्सार्ष्टिषेणयोः प्रवरैक्यान्न विवाहः । द्व्यामुष्यायणांसङ्कृतीनां वासिष्ठैः सगोत्रत्वादविवाह इत्यसंकीर्णोदाहरणं बोध्यम् । एवं कपीनां गर्गादिभिरपि । मातृगोत्रापि केषांचिन्निषिद्धा । तथाच सत्याषाढवचनम् । मातृगोत्रं माध्यन्दिनीयानामिति ।

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुत—

इति वचनाद्दत्तकस्य यद्यपि पितृगोत्रा प्राप्ता तथापि नोद्वाह्या असगोत्रा च या पितुरिति **मनुना** पितृशब्दोपादानादिति **स्मृतिचन्द्रिका** । प्रवरैक्ये विशेषमाह **बोधायनः**–

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति ॥

नच गोत्रप्रवरयोर्मिलितयोः पर्युदासनिमित्तत्वं शङ्क्यम् । प्रत्येकं दोषाभिधानात् । तदाह **बोधायनः**– सगोत्रां चेत् मत्योपयच्छेत् मातृवदेनां बिभृयादिति । **गौतमश्च**– असमानप्रवरैर्विवाह इति । **शातातपोपि**–

परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं विशोधनमिति ॥

आपस्तम्बः—

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥

संग्रहे— सगोत्रां समानप्रवरां कामतः परिणीय प्रजामुत्पाद्य गुरुतल्पगव्रतं चरेत् । प्रजां चण्डालेषु निक्षिपेत् । अकामतस्तप्तकृच्छ्रं प्रजाया भरद्वाजगोत्रान्तर्भावः । प्रजानुत्पादने चान्द्रायणम् । विवाहमात्रे कृच्छ्रम् । सर्वत्र व्रतान्तेऽष्टोत्तरशतं होमः । परित्यक्तां तां जननीवद्रक्षेत् ।

स्मृत्यर्थसारेपि—

इत्थं सगोत्रसंबन्धविवाहविषये स्थिते ।
यदि कश्चिदज्ञानतस्तां कन्यामूढ्वोपगच्छति ॥
गुरुतल्पव्रताच्छुध्येद्गर्भस्तज्जोऽन्त्यतां व्रजेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
अज्ञानाच्चैदैन्दवैस्तु शुध्येद्गर्भस्तु कश्यप इति ॥

अथ प्रसंगाद्गोत्रप्रवरनिर्णयः कथ्यते ॥

सप्तर्षीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति बोधायनादयः । एवं च यद्यपि गोत्रप्रवर्त्तकं जमदग्निं प्रति मूलपुरुषं सप्तर्षिबहिर्भूतं भृगुमधिकृत्याम्नातानां केवलभार्गवानामार्ष्टिषेणादीनां स्वस्वगणेपि सगोत्रता न सिध्यति तथा केवलाङ्गिरसानां विष्णुवृद्धादीनां सङ्कृत्यादीनां च । गौतमभरद्वाजौ प्रति मूलभूतमङ्गिरोमात्रमधिकृत्याम्नानात् । तथाप्यत्रेष्टापत्तिरेव । तथाच न स्तएवैषां गोत्रसगोत्रते इति प्रवरमञ्जरीकृतोक्तम् । अतएव स्मृत्यर्थसारेपि केवलभृग्वङ्गिरोगणेषु प्रवरैक्यमात्रनिबन्धनोऽविवाह इत्युक्तम् । प्रवरैक्यतः स्वं स्वं हित्वा गणमिति । अन्येतु यमधिकृत्य प्रवराम्नानं तद्गोत्रम्, ततश्चार्ष्टिषेणादीनाधिकृत्य प्रवराम्नानात् सप्तर्षिबाह्यत्वेपि गोत्रत्वमस्त्येव । तथाच सत्याषाढसूत्रे प्रवरान् व्याख्यास्याम इत्युक्त्वा तैर्गोत्राणीत्युक्तम् । नचैवं भृग्वङ्गिरसो रित्यनुवृत्या जामदग्न्ययोर्वत्सविदयोः परस्परमिवार्ष्टि-

षेणादिभिरपि सगोत्रतापत्तिः । तत्र पर्युदासात् । तथाच बोधायनः- एकएव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते तावत्समानगोत्रत्वमन्यत्र भृग्वङ्गिरसां गणादिति । भृग्वङ्गिरोभिन्नस्यैकस्य ऋषेरनुवृत्तिः सगोत्रता प्रयोजिकेत्यर्थः । एवं च समानगोत्रत्वमित्यस्य समानप्रवरत्वमित्यर्थोऽपि मदनपारिजातोक्तोऽस्मिन्पक्षेऽनादरणीयः । यस्त्वेवं सति सगोत्रत्वेनैव निषेधसिद्धौ समानप्रवरत्वस्यासङ्कीर्णोदाहरणं दुर्लभमिति, तन्न, वत्साष्टिंषेणयोर्विदार्ष्टिषेणयोः पृषदश्वरथीतरयोश्च भिन्नगोत्रयोः समानप्रवरत्वात् । तस्माद्धरितादीनामपि गोत्रत्वमित्याहुः । यद्यपि गोत्राणामवान्तरभेदाः सहस्रशस्तथापि तद्गणा एकोनपञ्चाशत् । तथाच बोधायनः-

गोत्राणां च सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेतेषां प्रवरा ऋषिदर्शनादिति ॥
सप्तेह भृगवः सप्त दशाङ्गिरस एव च ।
ततोऽत्रयश्च चत्वारो बोद्धव्याः कश्यपास्त्रयः ।
चत्वारोत्र वसिष्ठाः स्युर्विश्वामित्रास्ततो दश ।
अगस्तयस्तु चत्वार इति सङ्ग्रहकृद्वचः ॥

तत्र भृगूणां सप्त अन्तर्गणाः तत्र द्वौ जामदग्न्यौ । वत्सा बिदाश्चेति । तत्र वत्सानां पञ्च प्रवराः । भार्गव, च्यवन, आप्नवान, और्व, जामदग्न्येति । भार्गवौर्व,जामदग्न्येति त्रयो वा ॥ १ ॥ विदानां पञ्च प्रवराः । भार्गव,च्यवन,आप्नवान, और्व, विदेति । त्रयो वा, भार्गव, और्व, जामदग्न्येति ॥ २ ॥ इमौ द्वौ सगोत्रौ । जमदग्नेः सप्तर्षिषु पाठात् । इतरे पञ्च, केवलभार्गवाः । आर्ष्टिषेणाः, यस्काः, मित्रयवः, वैन्याः, शुनका इति । तत्र आर्ष्टिषेणानां पञ्च प्रवराः । भार्गव, च्यवन, आप्नवान, आर्ष्टिषेण, अनूपेति । भार्गवा, र्ष्टिषेण, अनूपेतिवा । एषां त्रयाणां परस्परमविवाहः । तदुक्तम्

जामदग्न्यौ वत्सविदौ आर्ष्टिषेणाः परस्परम् ।

नान्वियुः प्रवरैक्येन सगोत्रत्वेन चादिमाविति ॥ ३ ॥

यास्कानां त्रयः प्रवराः । भार्गव, वैतव्य, सावेनसेति ॥ ४ ॥ मित्रयूणां त्रयः । भार्गव, दैवोदास, वाध्र्यूश्वेति । एको वा । वाध्र्यूश्वेति ॥ ५ ॥ वैन्यानां त्रयः । भार्गव, वैन्य, पार्थेति ॥ ६ ॥ शुनकानामेकार्षेयः प्रवरः शौनकेति । गार्त्समदो वा । भृगुगृत्समदौ द्वौ वा । भार्गव, शौनहोत्र, गार्त्समदास्त्रयो वा । भार्गव, शौनक, गार्त्समदास्त्रयो वेति ॥ ७ ॥ एषां चतुर्णां परस्परं विवाहोस्ति । पूर्वोक्तैस्त्रिभिश्च वक्ष्यमाणैश्च । तदुक्तम्—

यास्का मित्रयवो वैन्याः शुनकाः प्रवरैक्यतः ।
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैरिति ॥

भृगोः सप्त वंशा निर्णीताः ।

क्वचित्तु अधिकं गणद्वयमुक्तम् । वेदविश्वज्योतिषाम् । आर्षेयः प्रवरः । भार्गव, वैद, वैश्वज्योतिषेति । शाठरमाठराणां भार्गव, शाठर, माठरेतित्रयः । अङ्गिरसां षोडशान्तर्गणाः । तत्र गौतमाङ्गिरसां सप्त । आयास्याः, शरद्वन्तः, कौमण्डाः, दीर्घतमसः, कारेणुपालयः, वामदेवाः, औशनसाश्चेति । तत्र आयास्यानां त्रयः प्रवराः । आङ्गिरस, आयास्य, गौतमेति ॥ ८ ॥ शरद्वतां च त्रयः । आङ्गिरस, गौतम, शारद्वतेति ॥ ९ ॥ कौमण्डानानां पञ्च । आङ्गिरस, औचथ्य, काक्षीवत, गौतम, कौमण्डेति ॥ १० ॥ दीर्घतमसां पञ्च । आङ्गिरस, औचथ्य, काक्षीवत, गौतम, दैर्घ्यतमसेति । त्रयो वा । आङ्गिरसौ, तथ्य, दैर्घ्यतमसेति ॥ ११ ॥ कारेणुपालीनां त्रयः । आङ्गिरस गौतम, कारेणुपालेति ॥ १२ ॥ वामदेवानां त्रयः । आङ्गिरस, गौतम, वामदेवेति ॥ १३ ॥ औशनसानां त्रयः । आङ्गिरस, औशनस, गौतमेति ॥ १४ ॥ एते सप्त गोत्राः वामदेवा, गौतमा इत्यापस्तम्बः । तेषां आगिरस वामदेव्य, बार्हदुक्थ्येति । त्रय, औतथ्या गौतमा इति केचित् । तेषाम् आङ्गिरसौ, तथ्य, गौतमेति । औशिजा इत्यपि केचित् । तेषाम् आङ्गिरसौ, शिज, काक्षीवतेति ।

भरद्वाजाङ्गिरसश्चत्वारः । भरद्वाजाः, रौक्षायणाः, गर्गाः, कपय इति । तत्र भरद्वाजानां त्रयः प्रवराः । आङ्गिरस बार्हस्पत्य, भारद्वाजेति ॥ १५ ॥ रौक्षायणानां पञ्च प्रवराः । आङ्गिरस, बार्हस्पत्य, भारद्वाज, वान्दन, मातवसेति ॥ १६ ॥ गर्गाणां पञ्च । आंगिरस, बार्हस्पत्य, भारद्वाज, गार्ग्य, शैन्येति । त्रयो वा । आङ्गिरस, शैन्य, गार्ग्येति । भरद्वाज, शैन्य, गार्ग्येति वा ॥ १७ ॥ कपीनां त्रयः प्रवराः । आङ्गिरस, आमहीयव औरुक्षयसेति । पञ्चप्रवरस्तु कपिगर्गान्तर्भूतः । अनेन सगोत्रश्च बोध्यः । अतएवाष्टादशधा गणान्विभजद्भिः संग्रहकारैः कपेः कपिना समं विवाहो निषिद्धः ।

भरद्वाजगणस्यापि तथा कपिगणस्य च ।
विवाहो न विधेयः स्यादन्योन्यं तु कदाचनेति ॥ १८ ॥

एतेषां चतुर्णां परस्परं विवाहो नास्ति । तदुक्तम्—

भरद्वाजाः, सकपयो, गर्गा, रौक्षायणा इति ।
चत्वारोपि भरद्वाजाः गोत्रैक्यान्नान्वियुर्मिथ इति ।

केवलाङ्गिरसः पञ्च। विष्णुवृद्धा, कण्वा, हरिता, रथीतरामुद्गलाश्चेति। तत्र विष्णुवृद्धानां त्रयः प्रवराः । आङ्गिरस, पौरुकुत्स, त्रासदस्यवेति । एषामन्यैः सह विवाहोस्ति । १९ ॥ कण्वानां त्रयः प्रवराः । आङ्गिरस, आजमीढ, कण्वेति । आङ्गिरस, घोर, कण्वेति वा ॥ २० ॥ हरितानां त्रयः प्रवराः । आङ्गिरसा, म्बरीष, यौवनाश्वेति। मान्धात्रा, म्बरीष, यौवनाश्वेति वा ॥ २१ ॥ रथीतराणां त्रयः प्रवराः । आङ्गिरस, वैरूप, रथीतरेति । आङ्गिरस, वैरूप, पार्षदश्वेति वा ॥ २२ ॥ मुद्गलानां त्रयः प्रवराः । आङ्गिस, भार्म्यश्व, मौद्गल्येति । यद्वा तार्क्ष्य, भार्म्यश्व, मौद्गल्येति॥ २३ ॥ विष्णुवृद्धानां पञ्चानामपि केवलाङ्गिरसां स्वस्वगणं हित्वाऽन्यैः सह विवाहोस्ति । तदुक्तम्—

केवलाङ्गिरसश्चैके विष्णुवृद्धाः सकण्वजाः ।
हरिता रथीतराश्च मुद्गलाः प्रवरैक्यतः ॥

स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैरिति ।

तदेवमाङ्गिरसां षोडश वंशा निर्णीताः ।

द्व्यामुष्यायणवर्गे वक्ष्यमाणाः संकृतयस्त्वाङ्गिरस्सु सप्तदशः । क्वचित्तु अन्येपि केवलाङ्गिरसः पठ्यन्ते । यथा कुत्सानां त्रयः । आङ्गिरस, मान्धातृ, कौत्सेति । एषां हरितैराविवाहः । आर्षेयाणां द्व्यार्षेयसंनिपातात् । हरितकुत्सपिङ्गशङ्खदर्भभैमगवानामित्याश्वलायनेन सर्वप्रवरसाम्योक्तेश्च इति पुरुषोत्तमः।। पृषदश्वानाम् आङ्गिरस, पार्षदश्व, वैरूप्येति। अष्टादंष्ट्र, पार्षदश्व, वैरूपेति वा। एषां रथीतरैराविवाहः । प्रवरद्वयसाम्यात् । अत्रेश्चत्वारो भेदाः । आद्यात्रयः, गविष्ठिराः, वाद्भूतकाः, मुद्गलाश्चेति । तत्राद्यात्रीणां त्रयः प्रवराः । आत्रेया, चैनानस, श्यावाश्वेति ॥ २४ ॥ गविष्ठिराणां त्रयः प्रवराः । आत्रेया, चैनानस, गाविष्ठिरेति ।।२५।। वाद्भूतकानां त्रयः । आत्रेया, चैनानस, वाद्भूतकेति । मुद्गलानां त्रयः प्रवराः । आत्रेया, चैनानस, पौर्वातिथेति । एतेषां चतुर्णां न विवाहः । तदुक्तम् —

चत्वारोत्रयः आद्यात्रिवाद्भूतिकगविष्ठिराः ।

मुद्गलाश्चेति गोत्रैक्यात्प्रवरैक्याच्च नान्वियुरिति ॥ २७ ॥

अत्रेश्चत्वारो वंशा निर्णीताः ।

कश्यपानां त्रयो भेदाः । निध्रुव, रेभ, शाण्डिलेति । तत्र निध्रुवाणां त्रयः प्रवराः । काश्यप, वत्सार, नैध्रुवेति ॥ २८ ॥ रैभ्याणां त्रयः प्रवराः । काश्यप, वत्सार, रैभ्येति ॥२९॥ शाण्डिलानां त्रयः । काश्यप, वत्सार, शाण्डिल्येति । काश्यप, वत्सार, दैवलेति वा । काश्यप,वत्सारा, सितेति वा । शाण्डिल, आसित, देवलेति वा, ॥३०॥ निध्रुवादीनां त्रयाणां कश्यपानां परस्परं नोद्वाहः । गोत्रप्रवरयोरैक्यात् । वसिष्ठाश्चत्वारः । वासिष्ठाः, कुण्डिनाः, उपमन्यवः, पराशरा इति । तत्र वासिष्ठानामेकः प्रवरः, वासिष्ठेति ॥ ३१ ॥ कुण्डिनानां त्रयः । वासिष्ठ, मैत्रावरुण,कौण्डिन्येति ॥३२॥ उपमन्यूनां त्रयः । वासिष्ठ,इन्द्रप्रमदा, भरद्वस्विति॥३३॥

पराशराणां त्रयः । वसिष्ठ, शक्ति, पराशरेति ॥ ३४ ॥ एषां परस्परम-विवाहः । तदुक्तम् —

वासिष्ठाः, कुण्डिना, श्चैवमुपमन्यु, पराशराः ।
वासिष्ठा इति चत्वारो गोत्रैक्यान्नान्वियुर्मिथ इति ॥

इति वासिष्ठवंशनिर्णयः ।

अथ विश्वामित्राः । ते च दश । कुशिकाः, रोहिताः, रौक्षकाः, कामकायनाः, कताः, धनञ्जयाः, अजाः, अघमर्षणाः, पूरणाः, इन्द्रकौशिकाः, इति । तत्र कुशिकानां त्रयः प्रवराः । विश्वामित्र, देवरात, औदलेति ॥ ३५ ॥ रोहितानां त्रयः । विश्वामित्र, ष्टका, रोहेति ॥ ३६ ॥ रौक्षकाणां त्रयः । विश्वामित्र, रौक्षक, रैवणेति ॥ ३७ ॥ कामकायनानां त्रयः । वैश्वामित्र, देवश्रवस, दैवतरसेति ॥ ३८ ॥ धनञ्जयानां त्रयः । वैश्वामित्र माधुच्छन्दस, धनञ्जयेति ॥ ३९ ॥ कतानां त्रयः । विश्वामित्र,-कात्या, त्कीलेति ॥ ४० ॥ अजानां त्रयः । विश्वामित्र, माधुच्छन्दसा, जेति ॥ ४१ ॥ अघमर्षाणानां त्रयः । वैश्वामित्रा, घमर्षण, कौशिकेति ॥ ४२ ॥ पूरणानां द्वौ । वैश्वामित्र, पौरणेति ॥ ४३ ॥ इन्द्रकौशिकानां त्रयः प्रवराः । विश्वामित्रे, न्द्र, कौशिकेति ॥ ४४ ॥ एतेषां दशानां परस्परं न विवाहः ।

इति विश्वामित्रवंशनिर्णयः ।

अथागस्तयः । ते च चत्वारः । इध्मवाहाः, सांभवाहाः, सोमवाहाः, यज्ञवाहा इति । तत्रेध्मवाहानां त्रयः प्रवराः । आगस्त्य, दाढर्यच्युत, साम्भवाहेति ॥ ४५ ॥ सांभवाहानां त्रयः । आगस्त्य, दाढर्यच्युत, साम्भवाहेति ॥ ४६ ॥ सोमवाहानां त्रयः प्रवराः । आगस्त्य, दाढर्यच्युत, सोमवाहेति ॥ ४७ ॥ साम्भवाहानां त्रयः । आगस्त्य, दाढर्यच्युत, सांभवाहेति ॥ ४८ ॥ यज्ञवाहानां त्रयः । आगस्त्य, दाढर्यच्यु, तयज्ञवाहेति ॥ ४८ ॥ एतेषां चतुर्णां गोत्रैक्यात्परस्परमविवाहः । तदेवं भृगवः सप्त । अङ्गिरसः सप्तदश । अत्रयश्चत्वारः । कश्यपास्त्रयः । वसिष्ठाश्चत्वारः । विश्वामित्रा

दश । अगस्तयश्चत्वारः ॥ ॥ इत्थमेकोनपञ्चाशद्गणा निर्णीताः ।

क्षत्रियाणां त्रयः प्रवराः । मान, वैल, पौरूरवसेति । वैश्यानां च त्रयः । भालन्दन, वात्स, प्रमङ्गालिकेति बोधायनः । नचैवं क्षत्रियवैश्ययोः सजातीयैर्विवाह एव न स्यादितिवाच्यम् । एतेषां प्रवराणां विवाहनिषेधाप्रयोजकत्वात् । तदुक्तम् ।

गुरोः सगोत्रप्रवरा नोद्वाह्याः क्षत्रविड्जनैरिति ।

समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः ।

प्रवरान्मानवेत्यस्मात्प्रवराच्चान्यगोचर इति च ।

मानवेत्यादिप्रवराद् अस्माच्च भालन्दनेत्यादिप्रवराच्चान्यगोचरो निषेध इत्यन्वयः ।

अथ द्व्यामुष्यायणाः ।

तत्राङ्गिरससङ्कृतीनां वसिष्ठैः सह विवाहो नास्ति । क्रियमाणतयाऽनुवृत्त्यभावेपि उत्पादकतया वसिष्ठस्यानुवृत्तेः । उक्तञ्च—

सङ्कृतीनां द्विवंश्यत्वाद्वसिष्ठैश्च चतुर्विधैः ॥

स्ववर्गीयैः सगोत्रत्वात्प्रवरैक्याच्च नान्वय इति ॥

लौगाक्षीणां त्रयः प्रवराः । काश्यपा, वत्सार, वासिष्ठेति । ते चाहर्वसिष्ठाः, नक्तं कश्यपाः, वसिष्ठकश्यपाभ्यां सह लौगाक्षीणां विवाहो नास्ति । तदुक्तम्—

वासिष्ठैः काश्यपैर्नित्यं लौगाक्षीणामनन्वयः ।

अहर्वसिष्ठतोक्तिस्तु प्रयाजाग्र्यादिगोचरेति ॥

किञ्च

विश्वामित्रात्रिगोत्रेण नोद्वहेयुर्धनञ्जयाः ।

अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ॥

तथैव जातूकर्ण्याश्च वसिष्ठैरात्रिभिः सहेति ॥

धनञ्जया वामरथ्याश्चात्रिविश्वामित्राभ्यां न विवहेयुरित्यर्थः । तथा जातूकर्ण्याश्चात्रिवसिष्ठाभ्यां न विवहेयुः ।

भरद्वाजेन शुङ्गेन विश्वामित्रस्य शैशिरेः ।
क्षेत्रे जातो द्विगोत्रर्षिः प्रोच्यते शौङ्गशैशिरेः ॥
विश्वामित्रभरद्वाजैस्तज्जानां तेन नान्वयः ।

अयमेव कतशैशिरिशौङ्ग इत्यप्युच्यते । तस्य पञ्च प्रवराः । आङ्गिरस, बार्हस्पत्य, भारद्वाज, कात्या, त्कीला इति । कपिलानां भरद्वाजै, र्विश्वामित्रैश्च नान्वयः । अन्यत्रापि ।

काश्यपेयगणस्यापि वासिष्ठस्य गणस्य च ।
सङ्कृतिपूतिमाषाभ्यां विवाहो न परस्परम् ॥
आत्रेयस्य गणस्यापि विश्वामित्रगणस्य च ।
धनञ्जयाख्यगोत्रेण नान्योन्यं पाणिपीडनम् ॥
जमदग्निगणस्यापि विश्वामित्रगणस्य च ।
न देवरातगोत्रेण विवाहः स्यात्परस्परम् ॥

इति द्व्यामुष्यायणप्रकरणम् ।

क्वचिन्नामसाम्येपि गोत्रप्रवरयोर्भेदाद्विवाहो भवति । यथाङ्गिरसामत्रीणां च चरमपठितानां मुद्गलानाम् इत्यादि ज्ञेयम् ॥

इति प्रवरनिर्णयः ॥

असमानार्षेत्यादिवचनेन वरः स्वसमानगोत्रां नोद्वहेदित्युक्तम् ॥ मनुरपि—

असपिण्डा च या मातुरसगोत्रा च या पितुरिति ।

यत्तु शातातपवचनम्—

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेदिति ॥

तदपि मन्वादिभिः समानार्थम् । तथाहि । मातुर्गोत्रं नाम पितृगोत्रमेव, नतु मातामहगोत्रम् ।

स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इति मनुवचनात् । अयन्तु विशेषोनुसन्धेयः । या ब्राह्मादि

विवाहचतुष्टयेनोढा तस्या एव वरगोत्रापत्तिः, पितृगोत्रभ्रंशश्च । या तु गान्धर्वादिचतुष्टयोढा तस्या न वरगोत्रापत्तिः, नापि पितृगोत्रभ्रंशः । दानाभावात् । तथाच मार्कण्डेयः—

ब्राह्मादिषु विवाहेषु या तूढा कन्यका भवेत् ।
भर्तृगोत्रेण कर्त्तव्यास्तस्याः पिण्डोदकक्रियाः ॥
आसुरादिविवाहेषु पितृगोत्रेण धर्मत इति ॥

अत एव स्वगोत्राद्भ्रश्यत इति मनुवचनमपि ब्राह्मादिविषयमेव । तस्माद्ब्राह्मादिविवाहोढासुतः पितृगोत्रां नोद्वहेत् । मातामहगोत्रं तूद्वहेत् अनिषेधात् । गान्धर्वादिविवाहोढासुतस्तु मातामहगोत्रां पितृगोत्रां च नोद्वहेत् । मातृगोत्रां तथैव चेति शातातपवचनात्, असगोत्रा च या पितुरिति मनुवचनाच्च । नच मातृगोत्रामित्यस्य मातुरुत्पत्तिकाले यद्गोत्रं तत्परतैवास्त्विति वाच्यम् । तथासति मातुलस्य सुतामिति वाक्यशेषवैयर्थ्यापत्तेः । नच प्रायश्चित्ताधिक्यार्थं तत् । त्यक्त्वा चान्द्रायणं चरेदिति वाक्यशेषे प्रायश्चित्तस्यैकरूप्यश्रवणात् । यथाश्रुतवादिनां मते इममेवाऽपरितोषमाविष्कुर्वता विज्ञानेश्वरेणाप्युक्तम् । मातृगोत्रामप्यपरिणेयां केचिदिच्छन्तीति । एवं च मातुलस्य सुतामूढ्वेत्येतद्ब्राह्मादिविवाहोढाविषयकत्वेनैव पर्यवस्यति । तस्मान्मातुलसुतामित्येतद्गान्धर्वादिविवाहोढासुतविषयमिति पूर्वोदाहृतं माधवाचार्यादिमतमपि कथङ्कारं सङ्गच्छत इति परिभावनीयं सूरिभिः । नारायणस्त्वाह—मातृगोत्रां कन्यात्वसमये यन्मातुर्गोत्रं न तु मातृत्वसमये तदुत्पन्नामित्यर्थः । अयं च निषेधो यावदस्मान्मातृकुलजादेतन्नाम्नोऽस्याजन्मेति विशष्य ज्ञायते तावत्पर्यन्तमेव । तदूर्ध्वं तु न दोषः । तथाच स्मर्यते—

मातुः सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञाने तूद्वहेदविशङ्कित इति ।

अत्र पूर्वार्द्धेन सामान्यतो मातुः सगोत्रायाः अविवाह्यत्वं मतान्तरत्वेनोट्टङ्क्य उत्तरार्द्धेन विषयनिष्कर्षः क्रियते । यत्तु—

सावित्रीं यस्य यो दद्यात्तत्कन्यां न विवाहयेत् ।
तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृदिति ॥

तत्स्वगोत्राज्ञातविषयमित्याहुः । तत्रापि गायत्रीमात्रदातुः कन्या त्याज्या न तु गोत्रं कुलं वेत्युक्तम् । आचार्यस्य तु शेषः स्मयते ।

गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रवैश्ययोः ।
स्वगोत्राद्यनभिज्ञैश्च विप्रैराचार्यगोत्रजा इति ॥
असंप्रज्ञातबन्धूनामाचार्यप्रवराः स्मृताः ।
पक्षे चास्मिन् विवाहेपि तद्गोत्रैः सह नेष्यत इति च ।

अत्र चासपिण्डामिति निषेधः सार्ववर्णिकः, असमानार्षेति तु त्रैवार्णिकविषयम् । तत्र क्षत्रवैश्ययोराचार्यगोत्रप्रवरपुरस्कारेण निषेध इति स्थितम् । इह सपिण्डासमानगोत्रासमानप्रवरासु भार्यात्वमेव नोत्पद्यते, रोगिण्यादिषु तु दिष्टविरोधवतीषु भार्यात्वमुत्पद्यत एवेति विज्ञानेश्वरः । नारायणस्त्वाह– एवं सति ऋक्षवृक्षनदीनाम्निषु भार्यात्वानुत्पत्तौ तु प्रमाणं न पश्याम इति । क्वचित्तु वचनादेव विवाहनिषेधः । यथा गृह्यपरिशिष्टे विरुद्धसम्बन्धामुपयच्छेतेत्युक्त्वा दम्पत्योर्मिथः पितृमातृसाम्ये विरुद्धसंबन्धः । यथा भार्या स्वसुर्दुहिता पितृव्यपत्नी स्वसा चेति स्वयमेव विवृते विरुद्धसम्बन्धे तथा नारदः—

प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम् ।
नैवैकजन्ययोः पुंसोरेकजन्ये च कन्यके इति ॥
एकमातृजातानामेकस्मिन् वत्सरे विवाहो न कार्यः ।

तदुक्तं सारावल्याम् —

एकमातृप्रसूतानामेकस्मिन् वत्सरे खलु ।
विवाहं नैव कुर्वीत कृते त्वेको विनश्यतीति ॥
यमलयोस्तु न दोषः ।
न समानक्रियां कुर्याद्विना यमलजातयोरिति वचनात् । अत्र विशेषमाह वासिष्ठः–

एकोदरीकरतलग्रहणं यदि स्या-
देकोदरस्थवरयोश्च कुलक्षयः स्यात् ।
एकाब्दके तु विधवा भवतीह कन्या
नद्यन्तरे तु शुभदं पृथुशैलरोधे ।

यत्तु गर्गवचनम्—
भ्रात्रोर्युगे स्वसृयुगे भ्रातृस्वसृयुगे तथा ।
न जातु मण्डनं कुर्यादेकस्मिन् मण्डपेऽहनि ।
पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम् ।
पुत्र्यन्तरस्य कुर्वीत नोद्वाहामिति निश्चयइति ।

तदेतद्भिन्नमातृकविषयकमिति केचित् । ऐकमातृक्येप्यनुकल्पोय-मित्यन्ये । तथा ।

कुले ऋतुत्रयादर्वाग् मण्डनान्नतु मण्डनम् ।
पुत्रोद्वाहान्नैव पुत्रीविवाहोपि ऋतुत्रये इति ॥

तथा—
अब्दान्तरान्मुण्डनञ्च नैकदा मुण्डनद्वयामिति ।
अब्दभेदे तु न दोषः । तदुक्तं सारावल्याम्—
फाल्गुने चत्रमासे तु पुत्रोद्वाहोपनायने ।
भेदादब्दस्य कुर्वीत नर्तुत्रयविलम्बनमिति ।

तथा ज्येष्ठे मासे ज्येष्ठगर्भस्य जन्मभादौ च सर्वेषां मङ्गलकार्यं निषिद्धं रत्नकोशे—
जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत् ।
ज्येष्ठमासाद्यगर्भस्य शुभवर्ज्यं स्त्रिया अपीति ।

अथ वरगुणः ।

तत्र बुद्धिमते कन्यां प्रयच्छेदिति गृह्यम् । याज्ञवल्क्यः—
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रिय इति ।
एतैः कन्यकायामुक्तेषु अन्वययोग्यैस्तत्र भ्रातृमत्त्वं वरे नापेक्षितम् ।

पुत्रिकाकरणशङ्कानिवृत्तिरूपफलाभावात् । असापिण्डत्वं त्वपेक्षितम् । तेन कूटस्थमारभ्य पञ्चम्याः पुत्री यद्यप्यसपिण्डा तथापि पञ्चमस्य पुत्रेण सापिण्डेन नोद्वाह्या । यत्नादिति । परीक्षोपायमाह नारदः-

यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेभिर्विपरीतस्तु षण्ढक इति ।

ह्रादि ध्वनिमत् । वर्ज्यानाह कात्यायनः-

दुरस्थानामविद्यानां मोक्षमार्गानुसारिणाम् ।
शूराणां निर्वृतानां च न देया कन्यका बुधैरिति ।

अथ कन्यादातारः ।

तत्र नारदः—

पितादद्यात्स्वयं कन्यां भ्राता वानुमते पितुः ।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा ।
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते ।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ।
यदा तु नैव कश्चित् स्यात्कन्या राजानमाव्रजेत् ॥

याज्ञवल्क्योऽपि—

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ।
गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् ॥

सकुल्यः प्रत्यासत्तिक्रमेणादौ पितृकुलस्थः तदभावे मातामहकुलस्थः सर्वाभावे जननी । प्रकृतिस्थ उन्मादादिदोषहीनः । गम्यं गमनार्हम् । सावर्ण्यादिगुणयुक्तमित्यर्थः । अप्रयच्छन् भ्रूणहत्यां प्राप्नोतीति वचनात् । गुणाढ्यवरालाभे निर्गुणायापि देया । तदाह बोधायनः-

दद्याद् गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरुध्याद्रजस्वलामिति ।

नग्निका नववार्षिकी रोहिण्यपरपर्याया ।

मनुरपि—

उत्कृष्टायाभिरूपाय वराय सदृशाय च ।

अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षण इति ॥

अप्राप्ताम् अप्राप्तविवाहसमयाम् । बालिकामपीत्यर्थः । कालान्तरे दुर्गुणायापि देयत्वापत्तेरिति भावः । यत्तु यमेनोक्तम्—

काममामरणात्तिष्ठेद्गृहे कन्यर्त्तुमत्यपि ।

न त्वेवैनां प्रयच्छेत गुणहीनाय कर्हिचिदिति ॥

तद्गुणवल्लाभे निर्गुणाय न देयेत्येवं परम्, नतु ऋतुमत्यपि तिष्ठेदित्यस्मिन् स्वार्थे तात्पर्यम् । अपिवा गुणहीनायेति बोधायनोक्तानुकल्पस्य निर्विषयतापत्तेः । वयोविशेषेण दातुः फलविशेषमाह मरीचिः—

गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।

कन्यां ददद् ब्रह्मलोकं रौरवं तु रजस्वलामिति ।

गौर्यादिलक्षणमाह यमः—

अष्टवर्षा भवेत् गौरी नववर्षा तु रोहिणी ।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वलेति ॥

संवर्त्तोऽपि—

अष्टमे तु भवेद् गौरी नवमे नग्निका भवेत् ।

दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृतेति ॥

दृष्टे तु रजसि पित्रादिषु सत्स्वपि कञ्चित्कालं पित्रादिकं प्रतीक्ष्य तदुपेक्षणे स्वयमेव वरं वरयेत् । तदाह बोधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।

ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥

अदीयमाना भर्त्तारमधिगच्छेद्यदि स्वयम् ।

नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥

सा यं भर्त्तारमधिगच्छति सोपि नैनोऽधिगच्छतीत्यर्थः ।

यत्तु विष्णुवचनम्–

ऋतुत्रयमुपास्यैव कन्या कुर्यात् स्वयंवरमिति ।

तद्गुणवद्वरलाभविषयं बोध्यम् । यद्यपि यमेन दशवर्षायां कन्याशब्दः परिभाषितः तथापीह विवाहरहितस्त्रीमात्रपरो बोध्यः । तथाचोमामहेश्वरसंवादे—

ऋतुस्नाता तु या शुद्धा सा कन्येत्यभिधीयते इति ।

अष्टावक्रोपाख्याने च वृद्धस्त्रियां प्रयुक्तः ।

कौमारं ब्रह्मचर्यं मे कन्यैवास्मिन्नसंशय इति ।

स्मृत्यर्थसारे—

विवाहे वितते तन्त्रे होमकाले उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
युञ्जानमाहुतिं हुत्वा ततः कर्म प्रवर्तते ।

यद्वा–

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला ।
त्रिरात्रं दम्पती स्यातां पृथक्शय्याशनासनौ ।
चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि ।
विवाहहोमं कुर्यातामित्यादिस्मृतिसंग्रह इति ।

स्कान्दे–

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्मेण विधिना दातुमसगोत्रोऽपि युज्यते ।

आत्मीकृत्य स्वकीयां कृत्वेत्यर्थः । तत्फलं चोक्तं विष्णुधर्मोत्तरे-

अनाथां कन्यकां दत्त्वा सदृशाभ्यधिके वरे ।
द्विगुणं फलमाप्नोति कन्यादानं यदीरितमिति ।

स्त्रीणां च विवाह उपनयनस्थानापन्नः ।

तदाह मनुः–

वैवाहिको विधिः स्त्रीणामौपनायनिको मत इति ।

यत्तु हारीतेनोक्तम्-द्विविधाः स्त्रियः। ब्राह्मणवादिन्यः, सद्यो वध्वश्च । तत्र ब्रह्मवादिनीनामुपनयन, मग्नीन्धनं, वेदाध्ययनं, स्वगृहे च भैक्षचर्येति ॥ सद्यो वधूनां तूपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्य इति । तदेतत्कल्पान्तरविषये । तथाच यमः—

पुरा कल्पे कुमारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥
पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः ।
स्वगृहे चैव कन्याया भैक्षचर्या विधीयते ॥
वर्जयेदजिनं चीरं जटाधारणमेव चेति ॥

अथ विवाहभेदाः ।

मनुः–

ब्राह्मो, दैव, स्तथा चार्षः, प्राजापत्य, स्तथासुरः ।
गान्धर्वो, राक्षसश्चैव, पैशाचस्त्वष्टमो मत इति ॥
एतेषां लक्षणं फलं चालङ्कृत्य कन्यामिति गृह्यखण्डे स्फुटम् ।

याज्ञवल्क्योपि–

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
यज्ञस्थ ऋत्विजे दैव, आदायार्षस्तु गोद्वयम् ।

मनुः-

सहोभौ चरतां धर्ममिति वाचानुभाष्य तु ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥

यद्यप्यन्येष्वपि विवाहेषु सहधर्मचरणमस्ति तथाप्यत्र यावज्जीवं सहधर्ममेव । नतु मध्ये आश्रमान्तरपरिग्रहः। स्त्र्यन्तरपरिग्रहो वेति विशेष इति प्रयोगरत्ने नृसिंहः, हरदत्तश्च ॥

याज्ञवल्क्यः—

आसुरो द्रविणादानात्, गान्धर्वः समयान्मिथः, ।

राक्षसो युद्धहरणा,त्पैशाचः कन्यकाच्छलादिति ॥

एषां व्यवस्थामाह मनुः-

षडानुपूर्व्याद्विप्रस्य क्षत्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान्न राक्षसमिति ॥

आदितः षड्विवाहा विप्रस्य धर्म्याः । आसुरादयश्चत्वारः क्षत्रियाणां धर्म्या इति माधवः । नारायणस्तु-पैशाचस्य शूद्रेष्वपि निन्दितत्वात्प्राजापत्यादयश्चत्वारो ग्राह्याः तानेव चतुरः तेष्वपि अराक्षसमिति व्युदासात्त्रयः प्राजापत्यासुरगान्धर्वाः शिष्यन्ते इति व्याचख्यौ। एतेषां मध्ये प्रशस्तान् मनुरेवाह—

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं शूद्रवैश्ययोरिति ॥

स्मृत्यन्तरे—

चत्वारो ब्राह्मणस्याद्याः शस्ता, गान्धर्वराक्षसौ ।
राज्ञ, स्तथाऽऽसुरो वैश्ये, शूद्रे चान्त्यस्तु गर्हित इति ॥

गर्हितो न कस्यापि प्रशस्त इत्यर्थः। अन्यविवाहसम्भवे ब्राह्मणादीनां सर्वेषां पैशाचमप्यनुजानाति वत्सः-

सर्वोपायैरसाध्या स्यात् सुकन्या पुरुषस्य या ।
चौरेणापि विवाहेन सा विवाह्या रहःस्थितेति ॥

गान्धर्वादिष्वपि भार्यापतिभावाय पश्चाद्धोमाद्विसप्तपद्यन्तं कार्यम् ।

गान्धर्वासुरपैशाचा विवाहो राक्षसश्च यः ।
पूर्वं परिग्रहस्तेषु पश्चाद्धोमो विधीयते ।

इति परिशिष्टात् । होमाद्यभावे वरान्तराय देया । सति नेति विशेषः। तदुक्तं वसिष्ठबौधायनाभ्याम्-

बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति ॥

बलादिति च्छलादेरप्युपलक्षणम् । स्मृत्यर्थसारे-

आसुरेषूपवासः स्याद् गान्धर्वेषु त्रिरात्रकम् ।
राक्षसे चैव पैशाचे कुर्याच्चान्द्रायणं तथेति ॥

द्वितीयपरिणयने हेतूनाह याज्ञवल्क्यः—

सुरापी व्याधिता धूर्त्ता वन्ध्यार्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी च येति ॥

अधिवेदनं भार्यान्तरपरिग्रहः । उक्तहेत्वभावेप्यधिवेत्तारं मत्याह स एव—

आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रिय इति ॥

त्यजन् अधिविन्दन्निति विज्ञानेश्वरः । द्विविधं ह्यधिवेदनम् । धर्मार्थं कामार्थं च । तत्र पुत्रोत्पत्त्यादिधर्मार्थं प्रागुक्तानि मद्यपत्वादीनि निमित्तानि । कामार्थे न तान्यपेक्षितानि, किंतु पूर्वोढा तोषणीया ।

एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्वोढा, मपरां वहेदिति ।

स्मृतेः । यद्यप्यसौ स्वयं न तोषयेत्तदा तत्तोषणाय पूर्वोढायै अधिवेत्तुर्धनस्य तृतीयांशं राज्ञा अधिवेत्ता दाप्य इति फलितार्थः । यद्यपि ब्राह्मणस्य क्षत्रियादिकन्याविवाहोपि शास्त्रसंमतस्तथापि

असवर्णासु कन्यासु विवाहश्च द्विजातिषु ।

इति कलिनिषिद्धेषु परिगणितत्वेन सांप्रतमनुपयोगात्तत्प्रपञ्चो-न क्रियते । बह्वीनां पत्नीनामृतुयौगपद्ये गमनक्रममाह देवलः—

यौगपद्ये तु तीर्थानां विवाहक्रमशो व्रजेत् ।
रक्षणार्थमपुत्रां वा ग्रहणक्रमशोपि वेति ॥

तीर्थमृतुः ।

तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ।
योनौ जलावतारे चेति—

निघण्टुबलेन योनिवाचकस्य तद्धर्मलक्षकत्वात् । तद्यौगपद्ये सत्य-

सवर्णासु वर्णक्रमेण, सवर्णासु विवाहक्रमेण गच्छेत् । यदा तु काचिदपुत्रा पुत्रवत्य इतराः तदा अपुत्रामग्रतो गच्छेदित्यर्थ इति **माधवः**। बह्वीषु पत्नीषु सहधर्मचारिणीं निर्द्धारयति **याज्ञवल्क्यः**—

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्मे ज्येष्ठाया न विनेतरा इति ।

सवर्णायां सत्यामित्युक्त्या तदभावे त्वसवर्णाप्यभ्यनुज्ञाता । तत्रापि शूद्रां निषेधति **वसिष्ठः**—कृष्णवर्णा या वै रमणायैव न धर्माय इति सवर्णानेकत्वे तु ज्येष्ठाया विना इतरा न किंतु तया सहैव कनीयस्यो नियोक्तव्या इत्यर्थः । तथाच **बौधायनः**—एकैकां गार्हपत्यमीक्षयेत् एकैकामाज्यमवेक्षयेदिति । **कात्यायनोपि**—

नैकयापि विना कार्यमाधानं भार्यया द्विजैः ।
अकृतं तद्विजानीयात्सर्वा नाऽन्वारभन्ति चेदिति ।

यत्तु **विष्णुवचनम्**—

सवर्णासु विधौ धर्मे ज्येष्ठाया न विनेतरा इति ।
अग्निहोत्रादियज्ञेषु द्वितीया न सहाऽऽचरेत् ।
अन्यथा निष्फलं तस्य स्विष्टैः क्रतुशतैरपि ॥

तदसवर्णाविषयं सत्स्वग्निषु या परिणीता तद्विषयं चेति **माधवः**। तृतीया तु मानुषी नोद्वाह्या । तदुक्तं **मात्स्ये**—

तृतीयां मानुषीं नैव चतुर्थीं तु समुद्वहेदिति ॥

तृतीयां त्वर्ककन्यामुद्वहेत् तद्विधानं शौनकादिग्रन्थाद्बोध्यम् । तत्र पञ्चमदिवसे कर्त्तव्यमुक्तं **ब्रह्मपुराणे**—

चतुर्थदिवसेऽतीते पूर्ववत्संप्रपूज्य च ।
विसृज्य होममग्निं च मानुषीमुद्वहेत्ततइति ॥

अथोपासनारम्भसमयनिर्णयः ।

तत्र **गृह्यम्**—पाणिग्रहणादिगृह्यं परिचरेदिति ॥

शौनकः—

यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति।

उपक्रम्योत्तरस्याह्नः सायं परिचरेदमुमिति ॥

यदि रात्रौ नवनाड्यनन्तरमग्न्युत्पत्तिस्तदोत्तरादिने सायंहोमारम्भः। तत्पूर्वमग्न्युत्पत्तौ तु तस्यां रात्रावेवारम्भ इति सुदर्शनभाष्यकारः ॥ इत्थं षोडशसंस्कारा व्याख्याताः।

गौतमस्त्वाह—गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरणा, न्नप्राशन, चौलोपनयनम्, चत्वारि वेदव्रतानि, स्नानं, सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानम्, देवपितृमनुष्यभूतब्राह्मणानामेतेषाञ्च, अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्री आश्वयुजीति सप्तपाकयज्ञसंस्थाः। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रहायणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमात्यग्निष्टोमउक्थःषोडशी वाजपेयोतिरात्राप्तोर्याम इति सप्तसोमसंस्थाः। इत्येते चत्वारिंशत्संस्काराः। अष्टावात्मगुणाः। दया सर्वभूतेषु, क्षान्ति, रनसूया, शौच, मनायासो, माङ्गल्य, मकार्पण्य, मस्पृहेति यस्यैते चत्वारिंशत्संस्काराः न चाष्टावात्मगुणाः न स ब्रह्मणः सायुज्यं सालोक्यं गच्छति। यस्य तु खलु संस्काराणामेकदेशोप्यष्टावात्मगुणाः अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति गच्छतीति।

अस्यार्थः। उपनयनान्तानामष्टानां समाहारद्वन्द्वः, चत्वारि वेदव्रतानि प्रतिशाखं गृह्येषूक्तानि। स्नानम् समावर्त्तनम्। सहधर्मचारिणीसंयोगो विवाहः। पञ्चमहायज्ञाः। पृथक् पञ्चसंस्कारा नतु समुदायः। एतेषां चेति। वक्ष्यमाणानामनुष्ठानमित्यर्थः। पर्वणि भवः पार्वणः स्थालीपाकः। श्राद्धममावास्यादि। श्रावणी तत्र कर्त्तव्यं श्रवणाकर्म। आग्रहायणी तत्र कर्त्तव्यं प्रत्यवरोहणम्। चैत्री तत्र कर्त्तव्यः शूलगवः। आश्वयुजी तत्र कर्त्तव्यमाश्वयुजीकर्म। अनाहिताग्नेराग्रहायणं चेति द्वयम् आश्वयुजीशब्दग्राह्यमिति

हरदत्तः । पाकयज्ञाः अल्पयज्ञाः प्रशस्तयज्ञा वा । 'तं पाकेन मनमनसा योमापाकेन मनसे, त्यादौ पाकशब्दप्रयोगस्य प्रशंसायां दर्शनादिति वृत्तिकृन्नारायणः । आख्या चेयं गार्ह्याणामिति हरदत्तः । तथाचाऽऽपस्तम्बः—लौकिकानां पाकयज्ञशब्द इति । संस्था विधा । पाकयज्ञविधाः सप्तेत्यर्थ इति हरदत्तः । अग्न्याधेयादयः श्रुतिप्रसिद्धाः । दर्शपौर्णमासाविति समुदाय एकः संस्कारः । सप्तग्रहणात् । सोमसम्बन्धाभावादेते हविर्यज्ञाः । अग्निष्टोमे राजन्यस्य षोडशिग्रहो गृह्यते सोत्यग्निष्टोमः । ब्राह्मणस्य कथमयं संस्कार इति चिन्त्यमिति हरदत्तः । गच्छति गच्छतीति द्विरुक्तिरष्टमाध्यायसमाप्त्यर्था । अत्राधानादयो गृहस्थस्य नित्याः । तथाच वसिष्ठः— अवश्यं ब्राह्मणोग्नीनादधीत । दर्शपूर्णमासाग्रहायणेष्टिचातुर्मास्यपशुसोमांश्च यजेतेति ॥ हारीतोपि—

पाकयज्ञान् यजेन्नित्यं हविर्यज्ञांस्तु नित्यशः ।
सौम्यांस्तु विधिपूर्वेण य इच्छेद्ब्रह्म चाव्ययमिति ॥

एवं च यथाशक्तयङ्गोपसंहारेणाप्यनुष्ठेयानि । नित्येषु यथाशक्तिन्यायस्य षष्ठे स्थितत्वात् ॥ बौधायनोपि—

यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च ।
विपद्यपि न स स्वर्गं गच्छेत्तु पतितो हि स इति ॥
तस्मात् कन्दैः फलैर्मूलैर्मधुनाज्यरसेन वा ।
नित्यं नित्यानि कुर्वीत नतु नित्यानि लोपयेदिति च ॥

ननु संपूर्णद्रव्यसंपत्तावेव सोमयागः कार्यः । तदाह मनुः—

यस्य त्रैवार्षिकं वित्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हतीति ।
अल्पवित्तस्य यज्ञं निषेधति स एव
पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
न त्वल्पदक्षिणैर्यज्ञैर्यजेताथ कथंचनेति ॥

मत्स्यपुराणेऽपि—

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तथर्त्विजम् ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुरिति ॥

तथाचैतानि वचनानि कन्दमूलैरित्यादिबोधायनादिवचनैर्विरुध्येरन्निति चेत् मैवम्, एषां वचनानां काम्ययागविषयत्वात् । काम्येषु सर्वाङ्गोपसंहारेणाधिकारस्य पूर्वतन्त्रे सिद्धान्तितत्वादिति दिक् ।

मूलम्—

जीवत्पितरि नादध्यान्नाहिताग्निः स वै यदि ।
तथैव भ्रातरि ज्येष्ठे न यजेन्न विवाहयेत् ॥
अनाहिताग्नौ पितरौ ह्याधानं तु करोति यः ।
अरण्योरग्निमारोप्य तमादध्याद् द्विजोत्तमः ॥
ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् ।
अनुज्ञातोपि सन् पित्रा नादध्यान्मनुरब्रवीदिति ।

क्वचित्परिविन्दतोऽप्यदोष इत्याह कात्यायनः—

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिसक्तपतितशूद्रकल्पातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्यांश्च कृषिसक्तान् नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा ।
कुहकोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥
धनवार्द्धुषिकं राजसेवकं कर्षकं तथा ।
प्रोषितं च प्रतीक्षेत वर्षत्रयमपि त्वरन्निति ।

अत्रापिशब्दसूचितं कालान्तरमाह वसिष्ठः—अष्टौ द्वादश वा वर्षाणि ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति । आधानानधिकारिणि पितरि सत्यपि पुत्र आदधीतेत्याह सुमन्तुः—

पितुर्यस्य तु नाधानं कथं पुत्रस्तु कारयेत् ।

अग्निहोत्राधिकारोस्ति शङ्खस्य वचनं यथेति ।

एतेन

पिता पितामहो यस्य अग्रजो वाथ कस्य चित् ।

तपोऽग्निहोत्रमन्त्रेषु न दोषः परिवेदन इति ।

माधवोदाहृतमौशनसं वाक्यमपि व्याख्यातम् । तदेवं भ्रातरि पितरि चानधिकारिणि न दोषः । अधिकारिणि तु ज्येष्ठे तदनुज्ञया । पितरि तु अधिकारिणि सति अनुज्ञयापि नाधानमिति विवेकः । प्रागुक्तप्रतीक्षाकालानां व्यवस्थामाह माधवः—धर्ममर्थं वोद्दिश्य देशान्तरं गते द्वादशवर्षं प्रतीक्षा इतरत्र तु पक्षान्तराणि शक्त्येति । तथाच तदुदाहृता स्मृतिः—

द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः ।

न्याय्यः प्रतीक्षितुं भ्रात्रा श्रूयमाणः पुनः पुनरिति ॥

वृद्धवसिष्ठः—

अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम् ।

अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि ॥

अत्राज्ञातविषयत्वेनाधानस्यैव विशिष्य निर्देशाद्विवाहे ऽनुज्ञायामपि दोषो भवत्येवेति गम्यते । एतदेवाभिप्रेत्याह हारीतः—

सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत् ।

दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्ययेति ॥

हेमाद्रिः ।

इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां श्रीचतुर्विंशतिमतव्याख्यायां संस्कारकाण्डं सम्पूर्णम् ।

शुभमस्तु ।

अथ श्राद्धकाण्डम्

तत्र प्रेतोद्देशेन श्रद्धया द्रव्यत्यागविशेषः श्राद्धम्। तदाहुर्मूले—

मृतानां तु भवेच्छ्राद्धं ब्राह्मणैर्वेदपारगैरिति।

तथाच ब्रह्माण्डपुराणम्—

देशे काले च पात्रे च श्रद्धया विधिना च यत्।

पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतमिति॥

तद्द्विविधं पार्वण, मेकोद्दिष्टं चेति। त्र्युद्देशेन पार्वणम्, एकोद्देशेन एकोद्दिष्टम्। पुनस्त्रिविधम्। नित्यं, नैमित्तिकं, काम्यं, चेति। तत्र नित्यम् अहरहरमावास्याष्टकादिषु। नैमित्तिकं पुत्रजन्मादिषु। काम्यं फलार्थिनां तिथिनक्षत्रविशेषेषु।

तत्र श्राद्धे देशविशेषः स्मर्यते विष्णुधर्मोत्तरे—

दक्षिणप्रवणे देशे तीर्थादौ वा गृहेपि वा।

भूसंस्कारादिसंयुक्ते श्राद्धं कुर्याद्विचक्षणइति॥

दक्षिणप्रवणे दक्षिणावनते। भूसंस्कारो गोमयेनोपलेपः।

तथा च शङ्खः—

गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि।

न कुर्यात् श्राद्धमेतेषु पारक्याशुचिभूमिषु॥

कृत्रिमायां वेदिकादौ। पारक्यामपरपरिगृहीतायाम्। ताश्च गोष्ठारामादयो न पुनस्तीर्थादिस्थानानि। तथा चादित्यपुराणम्—

अटवी पर्वताः पुण्या नदीतीराणि यानि च।

सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रह इति॥

देवलः—

श्राद्धस्य पूजितो देशो गया, गङ्गा, सरस्वती, ।
कुरुक्षेत्रं, प्रयागश्च, नैमिषं, पुष्कराणि च, इति ॥

व्यासः—

पुष्करेष्वक्षयश्राद्धं जपहोमतपांसि च।
महोदधौ प्रयागे च काश्यां च कुरुजाङ्गले ॥

श्राद्धकालानाह याज्ञवल्क्यः ।

अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसंक्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः ॥

तत्रामावास्याश्राद्धं नित्यम् ।

श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः ।
इन्दुक्षये मासि मासि वृद्धौ प्रत्यब्दमेव च

इति वचनात् । अष्टकाश्चतस्रः, हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति शौनकस्मरणात् । एवं भाद्रपदबहुलाष्टम्यप्यष्टका बोध्याः । तथाच पद्मपुराणे—अग्निष्वात्तपितृकन्याया वसुनाम्ना पित्रा शप्तायाः पुनरनुगृहीतायाः भाद्रपदापरपक्षाष्टकाकालेनोत्पत्तिर्दर्शिता ।

प्रौष्ठपदाष्टका भूयः पितृलोके भविष्यति ।
आयुरारोग्यदा नित्यं सर्वकामफलप्रदेति ॥

तदेवं पञ्चाष्टका हेमाद्र्यादिग्रन्थे स्थिताः । तत्रापि श्राद्धं नित्यम् ।

अमावास्याव्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते तु स इति ।

पितामहस्मरणात् । वृद्धिः पुत्रजन्मादिः, तेन तद्विशिष्टः कालो लक्ष्यते । अयनद्वयं दक्षिणोत्तररूपं, सूर्यसंक्रमइत्यनेनैव सिद्धे पृथगुपादानं फलातिशयार्थम् । एवं विषुवतोरपि । तुलामेषयोः संक्रमणं विषुवत् । द्रव्यस्य खड्गमांसादे,र्ब्राह्मणानां श्रुताध्ययनसंपन्नानां संपत्तिर्लाभो

यस्मिन् काले इति बहुव्रीहिरिति माधवस्मृतिचन्द्रिकाकारादयः। विज्ञानेश्वरस्तु–द्रव्यमित्यसमस्तं पपाठ । व्यतीपातो योगविशेषः, तिथिनक्षत्रप्रयुक्तो वा, तल्लक्षणं तु स्मृतिचन्द्रिकाकृद्वृद्धमनुः स्मरति–

श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते इति ॥

नागदैवतमाश्लेषा, मस्तकं मृगशिरः । तथा च यद्यमावास्या रविवारेण श्रवणादिषडन्यतमनक्षत्रेण च युक्ता स व्यतीपात इत्यर्थः । अर्थद्वयमप्येतन्माधवादिग्रन्थे स्थितम् । गजच्छायालक्षणं तु स्मृत्यन्तरे–

यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
याम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तितेति ॥

पितृदैवत्यं मघा । हंसः सूर्यः । करो हस्तनक्षत्रम् । याम्या त्रयोदशी । पुराणे—

हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैवस्वती नाम सा च्छाया कुञ्जरस्य तु इति ॥

तथा

हंसे हंसस्थिते या तु अमावास्या कराग्विता ।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ।

हंसः सूर्यस्तद्दैवतकत्वाद्धस्तनक्षत्रमपि । चन्द्रसूर्ययोर्हस्तस्थयोरिति फलितोऽर्थ इति हेमाद्रौ । स्मृतिचन्द्रिकाकारस्तु–गजच्छाया हस्तिनश्छाया । तथा च पाठकश्रुतिः—" एतद्धयेव पितॄणामयनं यद्धस्तिश्राद्धं तच्छायायां श्राद्धं दद्यादिति । " एवं च–

गजच्छायासु कुर्वीत कर्णव्यजनवीजित इति–

भारते लिङ्गदर्शनमप्युपपद्यते । नच श्राद्धकालाः प्रकीर्तिता इति याज्ञवल्क्यवचनविरोधः । विज्ञानेश्वरोक्तपाठे द्रव्यशब्देन च पाठान्तरेपि वृद्ध्यादिशब्दैरिव स्वोपलक्षितकालग्रहणादित्याहुः । ग्रहणमुप-

गः, तत्रापि स्पर्शकालो ग्राह्यः ।

त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा ।
मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसा इति ।

वशिष्ठस्मरणात् । श्राद्धं प्रति रुचिरिच्छा । चकारः स्मृत्य
न्तरोक्तानां संग्रहार्थः । तथाच चन्द्रिकायां जातूकर्ण्यः—

ग्रहोपरागे च सुते च जाते पित्र्ये मघायामयनद्वये च ।
नित्यं च शङ्खे च तथैव पद्मे दत्तं भवेन्निष्कसहस्रतुल्यमिति ।

नित्यं दत्तमित्यन्वयः । तेन नित्यतालाभः । चन्द्रिकायाम्—पित्र्ये न-
भस्यापरपक्षे या मघा तस्यामित्यर्थः । शङ्खोऽमावास्या । पद्मोऽष्टका ।

शङ्खं प्राहुरमावास्यां क्षीणसोमां द्विजोत्तमाः ।
अष्टकासु भवेत्पद्मं तत्र दत्तं तथाक्षयमिति—

तेनैवोक्तत्वात् । यद्वा शङ्खेनोक्तं पद्मं ग्राह्यम् ।

यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च ।
पद्मकं नाम तत् प्रोक्तमयनात्तु चतुर्गुणमिति ॥

देवलः—

त्रयो गजच्छाया मन्वादिषु युगादिषु ।
एते कालाः समुद्दिष्टाः पितॄणां प्रीतिवर्द्धना इति ।

मन्वादयो युगादयश्चापरकाण्डे प्रपञ्चितास्तत एव बोध्याः ।
कृत्तिकादिसकलवासराः काम्यश्राद्धकालाः ।

तथाच विष्णुधर्मोत्तरे—

अथ काम्यानि वक्ष्यामि श्राद्धानि नव पार्थिव ! ।
आरोग्यमथ सौभाग्यं समरे विजयस्तथा ॥
कोणैतान्यवाप्नोति नात्र कार्या विचारणेति ।

तथा नक्षत्रेषु काम्यश्राद्धान्याह मार्कण्डेयः—

कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः ।
अपत्यकामो रोहिण्यां सौम्ये त्वोजस्वितां लभेत् ॥

आर्द्रायां शौर्यमाप्नोति क्षेत्रलाभः पुनर्वसौ ।
पुष्टिः पुष्ये पितॄनर्च्य आश्लेशासु वरान् सुतान् ॥
मघासु स्वजनश्रैष्ठ्यं सौभाग्यं फल्गुनीषु च ।
प्रदानशीलो भवति सापत्यस्तूत्तरासु च ॥
प्राप्नोति श्रेष्ठतां सत्सु हस्ते श्राद्धप्रदो नरः ।
रूपवन्तीनि चित्रासु तथापत्यान्यवाप्नुयात् ॥
वाणिज्यलाभदाः स्वात्यो विशाखाः पुत्रकामदाः ।
कुर्वतामनुराधासु दद्युश्चक्रप्रवर्त्तनम् ।
ज्येष्ठास्वर्थाधिपत्यं च मूले चारोग्यमुत्तमम् ।
अषाढासु यशःप्राप्तिरुत्तरासु विशोकता ॥
श्रवणे च शुभान् लोकान् धनिष्ठासु धनं महत् ।
वेदविद्याऽभिजिति तु भिषक्सिद्धिस्तु वारुणे ॥
अजाविकं प्रौष्ठपदे विन्देद्भार्यां तथोत्तरे ।
रेवतीषु तथा रौप्यमश्विनीषु तुरङ्गमान् ॥
श्राद्धं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमम् ।
तस्मात्काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्वविदिति ॥

चक्रप्रवर्त्तनं सर्वत्राज्ञायाः प्रतिघाताभावः । तथा प्रतिमासं कृष्णपक्षेषु प्रतिपदादितिथयोपि काम्यश्राद्धकालाः । तथा च याज्ञवल्क्यः—

कन्यां कन्यावेदिनश्च पशून् क्षुद्रान् सुतानपि ।
द्यूतं कृषिं च वाणिज्यं तथैकद्विशफानपि ॥
ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके ।
जातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥
प्रतिपत्प्रभृतिष्वेकां वर्जयित्वां त्रयोदशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति ॥

कन्यावेदिनो जामातरः । क्षुद्रपशवोऽजादयः । द्यूतं द्यूते विजयः एकशफा अश्वादयः । कृष्णप्रातिपत्प्रभृतिषु अमावास्यासु चतुर्दशीभि

न्नासु तिथिषु कन्याप्रभृतीनि चतुर्दशफलानि क्रमेण प्राप्नोति इत्यर्थः। अयं च विधिः सर्वेषु नतु केवलं भाद्रपदे । तथाच शौनकः—

प्रौष्ठपद्या अपरपक्षे मासि मासि चैवमिति ।

वृद्धमनुः—

नभस्यस्यापरः पक्षो यत्र कन्यां व्रजेद्रविः ।

स महालयसंज्ञः स्याद्गजच्छायाह्वयस्तथेति ।

यद्यपि दर्शान्तः पौर्णमास्यन्तो वा मास इति चान्द्रमासे पक्षद्वयममस्ति तथापि दर्शान्ताभिप्रायेणैवेदं बोध्यम् ।

तथाच बृहन्मनुः—

आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः ।

काङ्क्षन्ति पितरः क्लिष्टा अणुमप्यन्वहं जलम् ॥

आषाढीमवधिं कृत्वा यः पक्षः पञ्चमो भवेत् ।

तत्र श्राद्धं प्रकुर्वीत कन्यास्थोऽर्को भवेन्नर इति

आदित्यपुराणम्—

पक्षान्तरेपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।

कन्यागते पञ्चमे तु विशेषेणैव कारयेदिति ॥

श्लोकगौतमः—

कन्यागते सवितरि यान्यहानि तु षोडश ।

क्रतुभिस्तानि तुल्यानि संपूर्णतरदक्षिणैरिति ।

कार्ष्णाजिनिः—

आदौ मध्येऽवसाने च यत्र कन्यां व्रजेद्रविः ।

स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति इति ॥

गौतमः—अपरपक्षे श्राद्धं पितृभ्यो दद्यात् पञ्चम्यादिदर्शान्तम्, अष्टम्यादि सर्वस्मिन् वेति । ब्रह्माण्डपुराणे—

नभस्यकृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने ।

त्रिभागहीनपक्षं वा त्रिभागं त्वर्द्धमेव वा इति ।

एते च पक्षं, पञ्चम्यादि, अष्टम्यादि, दशम्यादि, वेति चत्वारः पक्षाः शक्तितो व्यवस्थाप्याः। अत्यसमर्थं प्रति तु सकृन्महालयो बोध्यः। तत्र प्रतिपदादिदर्शान्तमित्यस्मिन् पक्षे नन्दादिकं न वर्ज्यम् ।

तदाह कार्ष्णाजिनिः—

नभस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने ।

नैव नन्दादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशी इति ॥

नन्वेतत्पूर्वोदाहृतेन वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्यवचनेन विरुद्धमिति चेन्न, तस्य पञ्चम्यादिपक्षेषु सावकाशतया निरवकाशेन कार्ष्णाजिनिवचनेन बाधादिति । माधवः—

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।

इति मनुवचनमप्यत्रानुकूलमेव ।

कन्यागते सवितरि दिनानि दश पञ्च चेति ।

यान्यहानि तु षोडशेत्याद्यपि चतुर्दशीश्राद्धाभ्युपगम एव शोभत इति माधवः । पञ्चदशत्वषोडशत्वयोर्द्वेधा विषयविभागमाह माधवः-तिथिवृद्धौ षोडश, साम्ये पञ्चदशेत्येकः पक्षः । आश्वयुक्शुक्लप्रतिपदा सह षोडशेति कल्पान्तरम् । तथाच देवलः—

अहःषोडशकं यत्तु शुक्लप्रतिपदा सह ।

चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृतेति ।

हेमाद्रौ तु—प्रौष्ठपद्या सह षोडशेति तृतीयकल्पः स्थितः । ननु चरमपक्षद्वये दिनानि दश पञ्च चेति वचनस्य का गतिरिति चेत्, अत्र माधवादयः—द्वादशकपालेष्वष्टाकपालवत् षोडशसु पञ्चदशत्वयुत्यानुवादः । अथवा पञ्चदशादिवसषोडशादिवसविध्योर्व्रीहियववत् विकल्प एवेत्याहुः । अत्र चापरपक्षश्राद्धे पक्षद्वयं हेमाद्रौ स्थितम् । तत्रोदाहृतकार्ष्णाजिनिवचने श्राद्धषोडशकं प्रतीति संख्यया कर्मभेदः प्रतीयते, प्रतिपद्धनलाभेत्यादिभिश्च प्रत्येकं फलसम्बन्धः, ततो भिन्नानां श्राद्धानामेते प्रयोगा इत्येकः पक्षः ।

नभस्यस्यापरे पक्षे तिथिषोडशकं तु यत् ।
कन्यास्थार्कान्वितः श्रेयान् स कालः श्राद्धकर्मणि इति ॥

कार्ष्णाजिनिवाक्ये तु संख्यायुक्तेषु समुच्चयः स्यादिति न्यायेन तिथीनां श्राद्धसमुच्चयोऽवगम्यते । न चावृत्तिं विना तदुपपद्यत इति तदेव श्राद्धं प्रतिदिनमावर्त्तत इति अन्यः पक्षः ।

तत्राद्ये पक्षे प्रतिदिनं दक्षिणा देया । उत्तरस्मिन् पक्षे समाप्ति-दिने दक्षिणा देया दक्षिणायाः प्रयोगाङ्गत्वात् । ब्राह्मणा अपि प्रति-दिनं त एव नतु भिद्यन्ते । देशोऽपि स एवेत्यादि विवेचनीयम् । अत्यन्तदरिद्रस्तु एकस्मिन् दिवसे कुर्यात् । तदुक्तं नागरखण्डे—

आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति ।

तथा च तत्रैव—

आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति ।
शाकेनापि दरिद्रो वा सोन्त्यजत्वमुपैष्यतीति—

अकरणे दोषश्रवणाद्दरिद्रेणापि यथासंभवं कार्यम् । तच्च आषा-ढ्याः पञ्चमपक्षस्य पञ्चमीमारभ्यानन्तरपक्षपञ्चमीपर्यन्तासु तिथिषु मध्येऽनिषिद्धायां कस्यांचित्कर्तव्यम् ।

तदाह यमः—

हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वरान् ।
पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोरिति ॥

अशक्त्यादिना तत्रापि श्राद्धाकरणे तु यावत्कन्यागतः सूर्यस्ता-वन्मध्ये देयं तत्राप्यकरणे तु यावद्वृश्चिकदर्शनं श्राद्धं कुर्यात् ।

तदाह सुमन्तः—

कन्याराशौ महाराज यावत्तिष्ठेद्विभावसुः ।
तस्मात्कालाद्भवेद्देयं वृश्चिकं यावदागत इति ।

तत्र सकृन्महालयपक्षे वर्ज्यानाह गर्गः—

नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मनि ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति ॥

त्रिजन्मनि आत्मनो भार्यायाः पुत्रस्य च जन्मनक्षत्र इत्यर्थः ।

कर्तुश्च पुत्रदाराणां त्रिजन्मर्क्षाणि वर्जयेत् ।

इति स्मृत्यन्तरात् । वृद्धगर्गः—

प्राजापत्ये च पौंस्ने च पित्र्यर्क्षे भार्गवे तथा ।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यतीति ॥

प्राजापत्यं रोहिणी, पौंस्नं रेवती, पित्र्यं मघा । नारदस्तु—

कृत्तिकायां च नन्दायां भृगुवारे त्रिजन्मसु ।
पिण्डदानं न कर्त्तव्यं कुलक्षयकरं यतः ॥
त्रिजन्मसु त्रिपादेषु नन्दायां भृगुवासरे ।
धातृपौंस्नभयोः श्राद्धं न कर्तव्यं कुलक्षयात् ॥
सकृन्महालये काम्ये पुनःश्राद्धेऽखिलेषु च ।
अतीतविषये चैवमेतत्सर्वं विचिन्तयेदिति ॥

अस्यापवादः स्मर्यते हेमाद्रौ—

अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ।
तस्यां तिथिं च नक्षत्रं वारं च न विचारयेत् इति ॥

एतन्महालयश्राद्धं मलमासे न कर्तव्यम् । तथाच भृगुः—

एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् ।
हव्यकव्यक्रियाहन्ता तदा ज्ञेयोऽधिमासकः ।
वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घित इति ।

ननूदाहृतगर्गवचनेन त्रयोदशीश्राद्धं निषिद्धम् । अङ्गिरसापि—

त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितमिति ॥

मनुना तु त्रयोदश्यां श्राद्धं विहितम् ।
यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु चेति ॥

तदनयोर्विप्रतिषेधयोः कीदृशो विषयविभाग इति चेत्, अत्र हेमाद्रिकाराः–निषेधवाक्यानि एकवर्गोद्देश्यकविषयाणि । अत एव कार्ष्णाजिनिः—

श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् ।
न तृप्तास्तत्र ये यस्य प्रजां हिंसन्ति तस्य ते ॥ इति
यद्यपि
पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम् ।

इति धौम्यवचनादेव मातामहवर्गोऽपि प्राप्तस्तथापि व्यामोहप्राप्तस्यैकवर्गश्राद्धस्यायं निषेधः उदाहृतकार्ष्णाजिनिवचनस्यैवमेव व्याख्येयत्वात् । यद्वा सपिण्डश्राद्धविषयको निषेधः ।

अयनद्वितये श्राद्धं विषुवद्द्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपनादृते ॥

इति पुलस्त्यवचनात् । भाद्रपदापरपक्षत्रयोदश्याश्च युगादित्वाद् मघान्वितत्वेनापि पिण्डदाननिषेधः स्मर्यते आदित्यपुराणे—

संक्रान्तावुपवासेन पारणेन च भारत ।
मघायां पिण्डदानेन ज्येष्ठः पुत्रो विनश्यतीति ॥

चतुर्दशीश्राद्धनिषेधास्तु अपमृत्युहतेतरविषयाः । तथाच मरीचिः-

विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हितेति ॥

विषप्रभृतिभिर्घातोऽस्त्येषामिति तृतीयातत्पुरुषान्मत्वर्थ इति । प्रचेता अपि-

नखिदंष्ट्रिविपन्नानामेव शस्ता चतुर्दशीति ।
यत्पुनः शाकटायनेनोक्तम्

जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।
श्राद्धं कुर्वन्ति तेषां वै वर्जयित्वा चतुर्दशीमिति—

तत्प्रायश्चित्तं वैधमरणविषयकम् । अत एव सहगमनादिस्थले चतुर्दशीश्राद्धं नेति हेमाद्रिः। युद्धे प्रायोपवेशे च वैधत्वेपि वचनात् चतुर्दशीश्राद्धं भवत्येव । तथाच मनुः—

जातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु सुप्रजाः ।
प्रीयन्ते पितरश्चास्य ये वै शस्त्रहता रणे इति ।

तथाच ब्राह्मे—

प्रायोनाशकशस्त्राग्निविषोद्बन्धनिनां तथा ।
चतुर्दश्यां तु कर्त्तव्यं तृप्त्यर्थमिति निश्चय इति ।

चतुर्दश्यामेषामेवेत्यर्थः । अन्येषां तु विगर्हितेति प्रागुक्तमरीचिवचनात्, अत एव

शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति ।

याज्ञवल्क्यीयमपि चतुर्दश्यां शस्त्रहतानामेवेति नियमपरं नतु शस्त्रादिहतानां चतुर्दश्यामेवेत्येवंपरम् । एवं च दिनान्तरेऽपि पितामहादितृप्त्यर्थं श्राद्धं कर्त्तव्यमेव । नच चतुर्दशीश्राद्धेनैव पितामहादीनामपि तृप्तिरस्त्विवति वाच्यं, तस्यैकोद्दिष्टरूपत्वात् । तथा च सुमन्तुः—

समत्वमागतस्यापि पितुः शस्त्रहतस्य च ।
एकोद्दिष्टं सुतैः कार्यं न तु तस्यां महालय इति ॥

समत्वमागतस्य सपिण्डीकृतस्येत्यर्थः । यस्य पितृपितामहप्रपितामहेषु मध्ये कौ चिद् द्वौ शस्त्रादिना हतौ तद्द्वयोरपि चतुर्दश्यामेकोद्दिष्टं कार्यम्। तथाच स्मृतिः—एकस्मिन् द्वयोर्वैकोद्दिष्टविधिरिति । यस्य तु पित्रादयस्त्रयोपि शस्त्रादिना हतास्तेन पार्वणं कर्त्तव्यम्।एकस्मिन् द्वयोर्वेति विशेषोपादानात् । इदं च चन्द्रिकाकारापरार्कहेमाद्रीणां मतम् । माधवाचार्यस्तु—त्रिषु शस्त्रादिहतेषु त्रयाणां पृथगेकोद्दिष्टमेव कार्यमिति देवस्वामिमतमेव प्रतिपेदे पार्वणश्राद्धस्य साक्षाद्विधायकव-

चनाभावात्, एकस्मिन् द्वयोर्वेत्यस्योपलक्षणार्थत्वात्। अन्यथा वाक्यभेदापत्तेरिति तदाशयः। एकं वृणीते द्वौ वृणीते इति नित्यप्राप्तत्वादनुवादः। इह वैकल्पिकप्राप्तिमतो वाशब्दपूर्वकं तथैवानुवाद इति न नित्यवदनुवादविरोधोपि। त्रीन् वृणीत इतिवच्छस्त्रहते एकोद्दिष्टमित्येव विधिशरीरमिति दिक्। शस्त्रादिहतानामपि दिनान्तरे पार्वणमेव। अत एव **प्रजापतिः**—

संक्रान्तावुपरागे च वर्षोत्तरमहालये।
निर्वपेदत्र पिण्डाँस्त्रीनिति प्राह प्रजापतिरिति॥

भ्रात्रादीनां तु महालये एकोद्दिष्टमेव। तथाच **सुमन्तुः**—

सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते।
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च॥
पित्र्याय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् इति

हेमाद्रौ पुराणवचनम्।

उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः।
श्वशुरभ्रातृतत्पुत्रर्त्विक्शिष्यपोष्यपोषकाः॥
भगिनीस्वामिदुहितृजामातृभागिनीसुताः

इत्युपक्रम्य

सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये।
एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नत इति॥

एवंस्थिते

प्रदानं यत्र यत्रैषां सपिण्डीकरणात्परम्।
तत्र पार्वणवत्कुर्यादेकोद्दिष्टं त्यजेद्बुधः

इत्यादिवचनानि प्रतिपदोक्तैकोद्दिष्टविध्यभावे द्रष्टव्यानीति सर्वं सुस्थम्।

अथ क्षयाहोपि श्राद्धकालः। तल्लक्षणमाह **व्यासः**—

क्षयमासतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि।
प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तद्विदुरिति।

तत्र संन्यासिनां क्षयाहे सुतैः पार्वणमेव कर्त्तव्यम् ।
एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह ।
सपिण्डीकरणाभावात्पार्वणं तस्य सर्वदेति-
प्रचेतःस्मरणात् । अमावास्याक्षयाहे प्रेतपक्षक्षयाहे च पार्वणमेव ।
अमावास्या क्षयो यस्य प्रेतपक्षेपि वा पुनः ।
पार्वणं तत्र कर्त्तव्यं नैकोद्दिष्टं कदाचन इति-
स्मरणात् । अन्यत्र क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्प एव, उभयविधायकवचनसत्वात् । तथाच **यमः**-
सपिण्डीकरणादूर्द्ध्वं प्रतिसंवत्सरं सुतैः ।
मातापित्रोः पृथक्कार्यमेकोद्दिष्टं क्षयाहनि इति ॥
शातातपस्तु-
सपिण्डीकरणं कृत्वा कुर्यात्पार्वणवत्सदा ।
प्रतिसंवत्सरं श्राद्धं छागलेयोदितो विधिरिति ॥
वंशसमाचाराद्व्यवस्थायां सत्यां व्यवस्थितोयं विकल्पइति **विज्ञानेश्वरः** । इति श्राद्धकालाः ।

अथ क्षयाहाज्ञाने निर्णयः ।

मासपक्षयोर्ज्ञाने दिवसस्याज्ञाने तत्पक्षस्यैकादशी ग्राह्या । पक्षाज्ञाने कृष्णैकादशी । अमावास्या मुख्यः पक्षः । तदसंभवे तु शुक्लैकादशी ग्राह्या। तथाच **बृहस्पतिः**—
न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति ।
मासश्चेत्प्रतिविज्ञातस्तदर्थे स्यान्मृताहनि ॥
मृताहनि यत्कर्त्तव्यन्तदिति शेषः । **मरीचिः**-
श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेहनि
एकादश्यां न कर्त्तव्यं कृष्णपक्षे विशेषत इति ॥
विशेषतइत्युक्त्या शुक्लपक्षेऽनुकल्पतयाभ्यनुज्ञात इति **हेमाद्रिः** ।
भविष्यत्पुराणे-

दिनमेव विजानाति मासं नैव तु यो नरः ।
मार्गशीर्षे थवा भाद्रे माघे वाथ समाचरेदिति ।
दिनमासयोरुभयोरप्यज्ञाने तु प्रभासखण्डे स्मर्यते
मृताहं यो न जानाति मासं वापि कदाचन ।
तेन कार्यममावास्याश्राद्धं माघेऽथ मार्गके । इति

प्रस्थिते मृते तु विशेषमाह बृहस्पतिः—

दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ।
प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशेति ॥
प्रास्थानिकयोस्तयोरस्मरणेतु भविष्योत्तरे उक्तम् ।
मृतवार्ताश्रुतेर्ग्राह्यौ तौ पूर्वोक्तक्रमेण त्विति ।

मरणवार्त्ताश्रवणे दिनमासौ ग्राह्यावित्यर्थः । वार्त्ताया अप्यश्रवणे तु जातूकर्ण्यः—

पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः ।
ऊर्द्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥
कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः ।
तदादीन्येव सर्वाणि संचरेदिति ॥

पितरीत्यविवाक्षितं ग्रहैकत्ववत् । तदादीनीति । तथाच प्रतिकृतिदाहदिवस एव क्षयाहतया ग्राह्यइति भावः ।

अथाशौचादिनिमित्तकप्रतिबन्धे सति श्राद्धकालाः ।

तत्र मासिकश्राद्धे आशौचप्राप्तौ आशौचापगमे सति तत्कार्यमिति मुख्यः कल्पः । मुख्यकालप्रत्यासन्नत्वात्तस्य तदुत्तरो दर्शः, कृष्णैकादशी, उत्तरमासान्तर्गततिथिर्वेति त्रयोनुकल्पाः । शुक्लैकादश्यपि मतभेदेन ग्राह्या । तथाच षट्त्रिंशन्मते

मासिकाब्दे तु संप्राप्ते अन्तरा मृतसूतके ।
कार्यं वदन्ति शुद्ध्यन्ते दर्शे चापि विशेषत इति ।

मासिकं चाब्दं चेति समाहारद्वन्द्वः। मरीचिः—

श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषत इति ।
विशेषतइत्युक्त्या शुक्लपक्षोपि अनुज्ञातो भवतीति हेमाद्रिः ।
अत्रिः—
तदहश्चेत्प्रदुष्येत केन चित्सूतकादिना ।
सूतकानन्तरं कुर्यात्पुरस्तदहरेव वेति ।

पुरः उत्तरमासे इति तस्मिन्नेवदिने इत्यर्थः । इदं हेमाद्रिमतम् । देवस्वामिमाधवपारिजातकारप्रभृतयस्तु मासिके आशौचेनोपहते सूतकानन्तरम् शुद्धिदिन एव कर्त्तव्यं, पुरस्तदहरेव वेति द्वितीयपक्षस्तु सूतकाद्यतिरिक्तनिमित्तान्तरेण विहते मासिके द्रष्टव्यः, मासिकाब्दे त्विति षट्त्रिंशन्मतवचनं तु अनुमासिकाविषयम्, तस्मादनुमासिके वार्षिके चाशौचोपहते शुद्धिकालप्रभृतयः उत्तरमासस्थतत्तिथिभिन्नाश्चत्वार एव पक्षा मासिके त्वाशौचोपहते शुद्ध्यनन्तरपक्षः, एवं निमित्तान्तरोपहते तु मासिके उत्तरमासस्थतात्तिथिरेवेति व्यवस्थामाहुः । तेषामयमाशयः ।

दैवात्पितॄणां श्राद्धे तु आशौचं जायते यदा ।
आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयते

इति ऋष्यशृङ्गवचनम् आशौचमात्रविषयत्वाद्विघ्नान्तरपरतयापि सम्भवतोऽत्र्युक्तस्य द्वितीयपक्षस्य स्वविषये बाधकम् । अत्र्युक्तद्वितीयपक्षस्तु मासिकपरो न त्वनुमासिकपरोपि ।

एकोद्दिष्टे तु सम्प्राप्ते यदि विघ्नः प्रजायते ।
अन्यस्मिंस्तत्तिथौ तस्मिन् श्राद्धं कुर्यात् प्रयत्नतः ।

इति देवलवचनेनैकोद्दिष्टपरतानिर्णयात् । अन्यस्मिन् मासान्तरे, तत्तिथौ मृततिथौ, तस्मिन् शुक्ले कृष्णे वा पक्षे इत्यर्थः । मासिकमेकोद्दिष्टम्, अनुमासिकेषु तु पार्वणमिति वक्ष्यते । आशौचान्तराविघ्निते तु मृततिथौ शुक्लकृष्णैकादशीरूपं पक्षत्रयं, मासिके तु तथाभूते उत्तर-

मासस्य तत्तिथिरेवेति उभयमिदं निर्विवादमेव। हारीतः—

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम् ।
अमावास्यादि नियतं माससम्वत्सराद्दत इति ।

मासः मासिकः, सम्वत्सरः साम्वत्सरिकः, एतदुभयभिन्नं नियतं नित्यम् । अमावास्यादि आमश्राद्धं कर्त्तव्यमित्यर्थः । एतद्भार्यारजोदर्शनकृतविघ्नविषयकम् । तथा चोशनसोक्तम्—

अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ।
सिद्धान्नेन न कुर्वीत आमं तस्य विधीयत इति ॥

आमश्राद्धासंभवे तु व्यासः—

द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं प्रकुर्वीत यस्य भार्यारजस्वलेति ।

मृताहश्राद्धे तु विवदन्ते तत्र ।

मृतेऽहनि तु सम्प्राप्ते यस्य भार्या रजस्वला ।
श्राद्धं तदा न कर्त्तव्यं कर्त्तव्यं पञ्चमेहनि ।

इति श्लोकगौतमवचनात् । तथा श्राद्धादौ कर्मणि भार्यया सहाधिकारश्रवणात्तस्यां रजोदर्शनदूषितायामधिकारनिवृत्ते पञ्चमेऽहनि मृताहश्राद्धं कर्त्तव्यम् । भार्यान्तरयुतेन त्वधिकारानपायान्मुख्यकाल एव कर्त्तव्यमिति हेमाद्रिमतम् । अन्ये तु अपुत्रायाः पत्न्या एव पत्युर्मृताहे श्राद्धे अधिकाराद्यदा सा रजस्वला स्यात्तदा पञ्चमेऽहनि श्राद्धं कुर्यान्नतु मृतेऽहनीति उदाहृतश्लोकार्थः । तथाच यस्येत्यनेन श्राद्धकर्त्ता न निर्दिश्यते किंतु संप्रदानं यस्य मृतस्य भार्या तदीयं श्राद्धमित्यर्थः। अत्र गौतमश्लोके सांप्रदायिकानामित्थं पाठः ।

अपुत्रा तु यदा भार्या संप्राप्ते भर्त्तुराब्दिके ।
रजस्वला भवेत्सा तु कुर्यात्तत्पञ्चमेऽहनीति ॥

कर्त्तुस्तु पत्न्यां रजस्वलायाम् अमावास्यादिकमामेन हेम्ना वेत्युक्तमेव । मृताहश्राद्धं तु तस्मिन्नेवाह्नि पक्वान्नेन कार्यम् । तथाच लौगाक्षिः—

पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः ।
अन्नेनैवाब्दिकं कुर्याद्धेम्ना चामेन वा क्वचित् इति ।
क्वचिदमावास्यादौ । संग्रहकारोप्याह—
विदेशगो वा विगताग्निको वा रजस्वलायामपि धर्मपत्न्याम् ।
श्राद्धं मृताहे विदधीत पाकैर्नामेन हेम्ना नच पञ्चमेऽह्नि इति ॥
तस्मादपुत्रकस्त्रीकर्तृकश्राद्धम्पञ्चमेऽह्नि, अन्यत्र मृताह एवेति सिद्धान्तयन्ति । मतद्वयमप्येतन्माधवनिबन्धे स्थितम् । इह पक्षद्वयेन श्राद्धं तदा न कर्त्तव्यम् इत्यनुवादमात्रं कर्त्तव्य पञ्चमेऽहनीति तु विधिः, सच श्राद्धविघ्ने सति विहितानाममावास्याकृष्णैकादश्यादिकालानां बाधनार्थः, तेन वचनवैयर्थ्यं न शङ्क्यम् । यत्तु पारिजातादौ—
मासिकानि सपिण्डानि अमावास्या तथाब्दिकम् ।
अन्नेनैव तु कर्त्तव्यं यस्य भार्यारजस्वला ।
इति वचनमुदाहृत्याऽऽमावास्यायामामश्राद्धविधायकवचनानि तु पाकयोग्यस्त्र्यन्तराभावे विषयाणीत्युक्तं त॒ चिन्त्यम् । अन्नाभावे द्विजाभावे इति पृथगुपादाय—
हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति—
प्रघट्टकान्ते उदाहृतेन वचनेन सह विरोधात् । नहि तत्राप्यन्नाभावपरता पृथगुपादानवैयर्थ्यात् । उदाहृतस्मृतिस्तु भार्यान्तरसद्भावविषयकतया कथञ्चिन्नेतव्येति दिक् ।

अथ श्राद्धनिषेधकालः ।

विष्णुः—
सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि न कर्त्तव्यं ह्यादित्यस्यानुदर्शनमिति ॥
सन्ध्यालक्षणमाह याज्ञवल्क्यः—
उदयात्प्राक्तनी सन्ध्या मुहूर्त्तद्वयमुच्यते ।
सायं त्रिघटिका ज्ञेया ह्यस्तादुपरि भास्वतः इति

स्कान्दे—
उपसंध्यं न कुर्वीत पितृपूजां कथञ्चनेति ।

अथ पिण्डदाननिषेधकालाः ।

बृहत्पराशरः—
युगादिषु मघायां च विषुवत्ययने तथा ।
भरणीषु च कुर्वीत पिण्डनिर्वपनं नहीति ॥

ब्राह्मे—
यदा च श्रोत्रियोऽभ्येति गृहं वेदविदग्निचित् ।
तेनैकेन तु कर्त्तव्यं श्राद्धं हि विषुवच्च तत् ।
विषुवदिति अपिण्डकमित्यर्थः ।

पाद्मे—
अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
सङ्क्रान्तिषु च कर्त्तव्यं पिण्डनिर्वपनादृते इति ।

ज्योतिःपराशरः—
विवाहे विहिते मासान् त्यजेयुर्द्वादशैव हि ।
सपिण्डाः पिण्डनिर्वापं मौञ्जीबन्धे षडेव हीति ॥

अस्यापवादं स एवाह—
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
यस्य कस्यापि मर्त्यस्य सपिण्डीकरणे तथा ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वनं सदा इति ।

वृद्धशातातपः—
पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोऽत्रेति ।

तेन पिण्डनिषेधे स्वधावाचनमपि लुप्यते ॥ इति पिण्डनिषेधकालाः ।

अथ प्रतिनिमित्तं श्राद्धभेदे प्राप्ते तन्त्रेण क्वचिदनुष्ठानं निरूप्यते । यत्र निमित्तानां यौगपद्यं संप्रतिपन्नदेवताकत्वं च तत्रासंगृह्यमा-

णाविशेषत्वात् न्यायलभ्यमेव तन्त्रं यथा युगादिसंक्रान्त्योः तथाच संक्रान्ति-निमित्तक,ममावास्यानिमित्तकं, व्यतिपातनिमित्तकं चेत्येतानि श्राद्धानि तन्त्रेण करिष्ये इति संकल्प इति हेमाद्रिः। यद्यप्यमायां पिण्डाद्यङ्गं नतु संक्रान्त्यादौ। तथाच गृह्यमाणविशेषतया तन्त्रानुपपत्तिस्तथापि प्रसङ्गसिद्धिरेवेह बोध्या। पच्यर्थमनुष्ठितैः प्रयाजैरिव पुरोडाशे। उक्तं च कालादर्शे—

नित्यदार्शिकयोश्चोदकुम्भमासिकयोरपि।
दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः॥
दार्शिकस्य च मन्वादेः सम्पाते श्राद्धकर्मणः।
प्रसङ्गादितरस्यापि सिद्धेरुत्तरमाचरेदिति॥

अस्यार्थः, नित्यश्राद्धदार्शिकश्राद्धयोः संनिपाते दार्शश्राद्धेनैव नित्यश्राद्धसिद्धिः। नच विनिगमकाभावाद्वैपरीत्यमङ्गबहुलत्वेन दर्शस्यावश्यकत्वात्। तथाच मासिकेनैवोदकुम्भश्राद्धसिद्धिः, एवं माघाऽमायां युगादिश्राद्धेनैव दार्शिकसिद्धिः, तथा ग्रहणेऽर्द्धोदयाद्यलभ्ययोगश्राद्धेनैव दार्शिकसिद्धिः। एवं फाल्गुनामायां मन्वादित्वनिमित्तश्राद्धेनैव दार्शिकसिद्धिरिति। ननु दर्शे पिण्डदानमङ्गं युगादौ तदभावोऽङ्गं तथाच विरुद्धाङ्गयोः कथं प्रसङ्गोपीति चेत्, अत्रोच्यते शाबरभाष्यप्रसङ्गे न तौ पशौ करोमीति प्रकरणान्तरस्यापि पर्युदासाभ्युपगमात् प्राभाकरैश्च तथैव समर्थनात् तद्वदिहापि पिण्डेतरदङ्गं नतु पिण्डाभावः। महाभाष्येपि ल्युन्विधौ एवमेव स्थितम्। उक्तं च हरिणा—

भिन्नप्रकरणस्थं च वाक्यं न्याय्यापवादयोः।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम्।
द्वितीये यो लुगाख्यातस्तच्छेषमलुकं विदुरिति।

न्याय्य उत्सर्गः, अलुकं चातुरर्थिकं षाष्ठं चेत्यर्थ इति हेलाराजः। भट्टाचार्यमते तु न तौ पशावित्यादाविवेहापि विकल्पो दुर्वारः। नच दीक्षितो ददातीत्यादाविव विशेषवचनेन सामान्योक्तस्य बाधः,

निषेधेन विधायकप्राप्तेरभ्युपेततया तस्य च विषयान्तरालाभेन विकल्पस्य दुर्वारत्वात् । नह्येतदङ्गप्रापकत्वस्याङ्गान्तरं विषयः । अन्यथा न तावित्यत्रापि तथात्वापत्तेरिति । तथा भाष्यरीत्यापि दार्शिकेन युगादेः प्रसङ्गसिद्धिरस्तु नाम युगादिमन्वादिभ्यां त्वपिण्डकाभ्याम-मायाः प्रसङ्गासिद्धिरुपपदेवेति कथं कालादर्शादिग्रन्थसामञ्जस्य-मिति परिभाव्यतां सूरिभिरिति । प्रकृतमनुसरामः । देवताभेदे तु न तन्त्रम् । तथाच कालादर्शे—

नित्यस्य चोदकुम्भस्य नित्यमासिकयोरपि ।
दर्शस्य चोदकुम्भस्य दर्शमासिकयोरपि ॥
युगाद्याब्दिकयोश्चापि मन्वाद्याब्दिकयोरपि ।
प्रत्याब्दिकस्य चालभ्ययोगेषु विहितस्य च ॥
सम्पाते देवताभेदात् श्राद्धयुग्मं समाचरेदिति ॥

अत्र नित्यदार्शिकयोः षट्देवताकत्वान्मासिकोदकुम्भयोरेकोद्दि-ष्टत्वात् देवताभेदः । तथा नित्यदार्शिकयुगादिमन्वादिप्रभृतीनामलभ्ययो-गनिमित्तानां च षट्देवतात्वात् प्रत्याब्दिकस्य तु त्रिदेवतात्वादेकोद्दिष्ट-त्वाद्वा देवताभेद इत्याहुः । वस्तुतस्तु एकादशप्रयाजैः पाशुकैः पारोडाशि-कानामिवेहापि अधिकदैवत्येन न्यूनदैवत्यस्य प्रसङ्गसिद्धिर्दुर्वारा, तस्मादुक्तसिद्धान्तस्थैर्यार्थं वचनमेवान्विष्य शरणीकरणीयम् । अतएव जी-वन्मातामहवर्गस्यापि दर्शेनासमानदैवतेन प्रत्याब्दिकस्य तन्त्रप्रसङ्गौ ने-त्यवधेयम् । अत्राप्यनियतनिमित्तं नित्यदार्शिकादि प्रथमं कुर्यात् । तथाच कात्यायनोप्याह—

द्वे बहूनि निमित्तानि जायेरन्नेकवासरे ।
नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् इति ।

अथ श्राद्धे भोजयितव्या ब्राह्मणाः ।

तत्र पङ्क्तिपावनादयो मुख्या प्रसिद्धा एव । ननु
न सगोत्रे हविर्दद्याद्यथा कन्या तथा हविः ।

इत्यादिभिः सगोत्राणां हविर्दानं निषिद्धमिति चेत् न, अत्र हविः परस्परं पित्र्यद्रव्यपरत्वात् । शिष्यस्यापि वैश्वदेव एव निवेशः, सोदर्याभिहितस्यार्थस्य, एतेनान्तेवासिनोपि व्याख्याता इत्यापस्तम्बेन शिष्येऽतिदेशात् । एतेन शिष्यानपि गुणवतो भोजयेदिति वशिष्ठवचनं वैश्वदेवविषयं ज्ञेयम् । आपस्तम्बः—ब्राह्मणान् भोजयेद् ब्रह्मविदो योनिगोत्रमन्त्रान्तेवास्यसंबन्धानिति । योनिसम्बन्धा मातुलादयः । गोत्रसंबन्धाः सगोत्राः । मन्त्रसंबन्धा गुरुशिष्यभूताः । अन्तेवासिनः शिल्पशास्त्राध्येतारः । एतान् विहाय भोजयेत् । अत्र सगोत्रविषये विशेषः अत्रिस्मृतौ—

षड्भ्यस्तु पुरुषेभ्योर्वागश्राद्धेयास्तु गोत्रिणः ।
षड्भ्यस्तु परतो भोज्याः श्राद्धे स्युर्गोत्रजा अपीति ॥

अनुकल्पमाह मनुः–

अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ।
मातामहं मातुलं वा स्वस्रियं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विक्याज्यौ च भोजयेत् ।

विट्पतिर्जामाता अतिथिर्वेति माधवादयः । आपस्तम्बः–गुणवद्लाभे सोदर्योपि भोजयितव्यः । एतेनान्तेवासिनोपि व्याख्याता इति बौधायनः । तस्मादेवंविधं सपिण्डमप्याशयेदिति । विष्णुपुराणेपि–

पितृव्यं गुरुदौहित्रावृत्विक्स्वस्रीयमातुलान् ।
पूजयेद्धव्यकव्येन वृद्धानतिथिबान्धवान् इति ।

अत्र ऋत्विक्सपिण्डसोदरपितृव्यादयो वैश्वदेवस्थाने नियोक्तव्याः नतु पित्रादिस्थाने । तथाच अत्रिः–

पिता पितामहो भ्राता पुत्रो वाथ सपिण्डकः ।
न परस्परमर्च्याः स्युः श्राद्धादौ ऋत्विजस्तथा ।
ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणा द्विजैः ।
वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः इति ।

कौर्म्ये—

श्वो भविष्यति हि श्राद्धं पूर्वेद्युरभिपूजयेत् ।
असम्भवे परेद्युर्वा यथोक्तैर्लक्षणैर्युतानिति ।

देवलः—

श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान् निमन्त्रयेत् ।
निरामिषं सकृद्भुङ्क्त्वा सर्वभुक्तजने गृहे ।
असम्भवे परेद्युर्वा ब्राह्मणांस्तान् निमन्त्रयेत् इति ।

वशिष्ठः—

द्वौ दैवे पितृकृत्ये त्रीन्नेकैकमुभयत्र वा ।
भोजयेत्तु समृद्धोपि विस्तरं तु विवर्जयेदिति ।
विस्तरं नवावरान्भोजयेदयुजो वा यथोत्साहमिति गौतमोक्तम् ।
तस्य त्वत्यन्तसमृद्धोधिकारीत्यर्थः ।

याज्ञवल्क्यः—

द्वौ दैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा ।
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकमिति ।

यत्तु शङ्खवचनम्—

भोजयेदथवाप्येकं ब्राह्मणं पङ्क्तिपावनम् इति ।
तत्तु ब्राह्मणान्तरालाभविषयकम् ।

तत्र विशेषमाह वशिष्ठः—

यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ।
अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु ।
देवतायतने कृत्वा यथाविधि निवेदयेत् ।
प्राश्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे इति ।

तदेतदुक्तं मूले—

विप्राभावे वृथा न स्याद्दद्यादग्नौ जलेपि वेति ।

मात्स्ये—

पठन्निमन्त्र्यनियमान् श्रावयेत्पैतृकान् बुधान् ।
अक्रोधनैः शौचपरैः शततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणेति ॥
प्रचेताः—
श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम् ।
श्राद्धकर्त्ता न कुर्वीत दन्तप्रक्षालनं बुधः ।

अथ श्राद्धीयद्रव्याणि ।

अत्रिः-
अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेदिति ।
वायवीये-
नागरं चात्र वै देयं दीर्घमूलकमेव चेति ।
हिङ्गुस्तु विहितप्रातिषिद्धत्वाद्वैकल्पिकः । तथाचादित्यपुराणे-
मधुकं रामठं चैव कर्पूरं मरिचं गुडम् ।
श्राद्धकर्मणि शस्तानि सैन्धवं त्रपुसं तथेति ।
त्रपुसम् अम्लं दधि ।
व्यासः—
अश्राद्धीयानि धान्यानि कोद्रवाः पुलकास्तथा ।
हिङ्गुद्रव्येषु शाकेषु कालानलशुभास्तथा इति ।
शुभाख्यः शाकविशेष इति माधवः ।
मूले—
कोद्रवान् राजमाषांश्च कुलत्थान् वरकाँस्तथा ।
निष्पावाँश्च विशेषेण पञ्चैतांस्तु विवर्जयेत् ।
यावनालानपि तथा वर्जयन्ति विपाश्चित इति
वरकान् नवमुद्गान् इति माधवः ।
अत्र निष्पावशब्दः कृष्णनिष्पावपरः । निष्पावाश्चात्र शोभना इति ।
मार्कण्डेयपुराणे- कृष्णेतरनिष्पावपरः ॥

कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धकर्मणि ।

इति वचनान्तरादिति भावः। चणका अपि विहितप्रतिषिद्धाः ।

तथाच **मरीचिः**—

कुलत्थाश्चणकाः श्राद्धे न देयाश्चैव कोद्रवा इति ।

मार्कण्डेयः—

गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि ।

श्राद्धेषु दत्तैः प्रीयन्ते मासमेकं पितामहाः ।

देवलः—

कण्डूरां श्वेतवृन्ताकं कूष्माण्डं च विवर्जयेदिति ।

वृन्ताकं नालिकापोतं कुसुम्भाश्मन्तकानिचेति **पैठीनसीस्मृतौ**। वृन्ताकसामान्यग्रहणमपि श्वेतवृन्ताकविषयकमिति **माधवः** । **भविष्यपुराणम्**—

लशुनं गृञ्जनं चैव पलाण्डुकवलानि च ।

वृन्ताकनालिकाला‌‌‌ुजातीयाजातिदूषितामिति ।

श्वेतकन्दविशेषः गृञ्जनम्

लशुनं दीर्घपत्रश्च पिच्छगन्धो महौषधम् ।

करण्यश्च पलाण्डुश्च लतार्कश्चापरारिका ।

गृञ्जनं यवनेष्टश्च पलाण्डोर्दशजातय इति ।

सुश्रुतेनोक्तत्वादिति श्राद्धप्रकरणे **माधवः** । प्रायश्चित्तप्रकरणे तु गृञ्जनं पत्रविशेषः। यदीयं चूर्णं गायकाः कण्ठशुद्ध्यर्थं भक्षयन्ति। विशेषश्च मदाद्यर्थो मूलविशेषो वा गाजरापरपर्याय इति द्वेधा माधवेनैव व्याख्यातम्। विनिगमकं त्विह परिभावनीयम्। **हारीतः**—न वटप्लक्षोदुम्बर दधित्थनीपमातुलिङ्गानि भक्षयेदिति । दधित्थः कपित्थः। निमन्त्रितेभ्यो ब्राह्मणेभ्योऽपरेऽहनि यद्देयं तदाह **कात्यायनः**—

तैलमुद्वर्तनं स्नानं दन्तधावनमेव च ।

कृत्तरोमनखेभ्यस्तु दद्यात्तेभ्योपरेऽहनीति ।

स्नानं स्नानसाधनम् । करणे ल्युट् । एवं दन्तधावनमित्यत्रापि । तैलमभ्यङ्गम् । निषेधतिथिषु तु आमलकोदकं देयम् । तथाच मार्कण्डेयः-

अह्नः षट्सु मुहूर्त्तेषु गतेष्वथ च तान् द्विजान् ।

प्रत्येकं प्रेषयेत्प्रेष्यान् आदायामलकोदकमिति ।

एतदमावास्यातिरिक्तविषयकम् । "धात्रीफलैरमायां न स्नाया" दिति स्मृतेः । यत्तु प्रचेतोवचनम्-

श्राद्धभुग्भ्यो नखश्मश्रुच्छेदनं नतु कारयेदिति-

तन्निषिद्धातिथिविषयकामिति माधवः । आपस्तम्बः-

अटव्यां ये समुत्पन्ना अकृष्टफालिनस्तथा ।

ते वै श्राद्धे पवित्राः स्युस्तिला नतु सितास्तिलाः ।

तथाच सत्यव्रतः-

जर्तिलास्तु तिलाः प्रोक्ताः कृष्णवर्णा वने भवाः इति ।

जर्तिलानामलाभे तु ग्राम्यास्तिला ग्राह्याः ॥

कुतपञ्चासने दद्यादिति मनुः । कुतपो नेपालकम्बलः ।

मध्याह्नः खङ्गपात्रं च तथा नेपालकम्बलः ।

रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः

पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।

अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः ।

इति स्मृतेः । भोजनपात्राणि तु पलाशपत्ररूपाण्येव प्रशस्तानि नत्वन्यपर्णरूपाणि । अर्घ्यपात्रे तु न नियमः । तथाचाङ्गिः-

पलाशेभ्यो विना न स्युः पर्णपत्राणि भोजने इति ॥

कदलीपत्रन्तु विशिष्य निषेधत्यङ्गिराः-न जातीकुसुमानां न कदलीपत्राणामिति । अत्र जात्यो विहितनिषिद्धत्वाद्वैकल्पिक्यइति माधवः । तत्र निषेधः उक्त एव । विधिस्तु मार्कण्डेयपुराणे-

जात्यश्च सर्वा दातव्या मल्लिका श्वेतयूथिका ।

जलोद्भवानि सर्वाणि कुसुमानि च चम्पकामिति ॥

१९

ईदृग्विषये वाक्यद्वयवैकल्पोद्धारश्चिन्त्यः । देशाचाराद्यवस्थायां सत्यां तु साफल्यं सुलभम् । होलाधिकरणोल्लङ्घनं त्वस्त्येव । विहितोदासीनाभ्यां सह तुल्यकक्षतालाभः फलमित्येके । उभयालाभोऽभ्यनुज्ञातत्वात्फलमित्यन्ये ।

शङ्खः—

उग्रगन्धीन्यगन्धीनि चैत्यवृक्षोद्भवानि च ।
पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि चेति ॥

तथा ।

कौशेयं क्षौमकार्पासं दुकूलमहतं तथा ।
श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलान् ।

एवं दर्भादिमेक्षणान्तन्द्रव्यमुपकल्प्य स्नायात् । तथाच यमः—

ततः स्नात्वा निवृत्तो यः प्रत्युत्थाय कृताञ्जलिः ।
पाद्यमाचमनीयं च सम्प्रयच्छेद्यथाक्रममिति ॥

मात्स्ये—

भवनस्याग्रतो भुवि ।
गोमयेनानुलिप्तायां गोमूत्रेण तु मण्डले इति ।

गोमयसहितेन गोमूत्रेण मण्डले कार्ये इति शेषः ।

शम्भुः—

उदक्प्लवमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवमिति ।

उदीच्यं वैश्वदेविकं मण्डलम् उदक्प्रवणम् । दक्षिणं पित्र्यं मण्डलं दक्षिणाप्रवणं कुर्यात् । अत्र मण्डलकरणात्प्रभृति आश्राद्धसमाप्तेर्वैश्वदेविकं कर्म प्रदक्षिणं यज्ञोपवीतिना कार्यम् । पित्र्यम् अपसव्यं प्राचीनावीतिना । तथाच मनुः—

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा ।
पित्र्यमानिधनात् कार्यं विधिवद्दर्भपाणिनेति ॥

आनिधनादासमाप्तेः । कात्यायनः—

दक्षिणं पातयेज्जानु देवान् परिचरन् सदा ।
पातयेदितरज्जानु पित्र्यं परिचरन् सदेति ।

शातातपः—

उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः ।

बौधायनः—

प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम् ।
देवानामृजवो दर्भाः पितॄणां द्विगुणाः स्मृताइति ।

स्मृत्यर्थसारे—

अक्षय्यासनयोः षष्ठी द्वितीयाऽऽवाहने तथा ।
अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृता इति ।
यद्वा चतुर्थ्येव सर्वत्र प्रयोज्या आवाहनवर्जमिति ।
मण्डलकरणानन्तरं कर्त्तव्यमाह शम्भुः—

उत्तरे ऽक्षतसंयुक्तान् पूर्वाग्रान् विन्यसेत्कुशान् ।
दक्षिणे दक्षिणाग्रांस्तु सतिलान् विन्यसेद् बुध इति ।
तथा ।
पाद्यं चैव तथा चाऽऽर्घ्यं दैवमादौ प्रयोजयेत् ।
शन्नोदेवीतिमन्त्रेण पाद्यं चैव प्रदापयेत् ।

मात्स्ये—

नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोरिति ।

सुमन्तुः—

दर्भपाणिर्द्विराचम्य लघुवासा जितेन्द्रियः ।
परिश्रिते शुचौ देशे गोमयेनोपलेपिते ॥
दक्षिणाप्रवणे सम्यगाचान्तान् प्रयतान् शुचीन् ।
आसनेषु सदर्भेषु विविक्तेषूपवेशयेद् इति ।

आदित्यपुराणे—

विप्रौ द्वौ प्राङ्मुखौ तेभ्यो द्वौ तु पूर्वं निवेशयेत् ।

उत्तराभिमुखान् विप्रांस्त्रीन् पितृभ्यश्च सर्वदेति ॥

मरीचिः—

तथा मातामहश्राद्धं वैश्वदेवसमन्वितम् ।

कुर्वीत भक्तिसम्पन्नः तन्त्रं वा वैश्वदैविकमिति ॥

अत्र द्वयोरपि श्राद्धयोर्वैश्वदेवकर्मणस्तन्त्रावृत्तिविधानात् एकप्रयोगता, भिन्नप्रयोगता वातश्चैकाधिकारात् पूर्वसाधनता, भिन्नसाधनता वेति माधवः ।

तथा उपविष्टानां ब्राह्मणानां नियमाः स्मर्यन्ते ।

पवित्रपाणयः सर्वे ते च मौनव्रतान्विता इति ।

यमः—

ब्रह्मोद्याश्च कथाः कुर्युः पितॄणामेतदीप्सितमिति ॥

स एव ।

भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः ।

उपविष्टेष्वनुप्राप्तः कामं तमपि भोजयेदिति ॥

ब्राह्मणोपवेशनानन्तरं कृत्यं पुराणे ऽभिहितम् ।

श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।

ताभ्यां चैव नमस्कृत्य ततः श्राद्धं प्रवर्त्तयेत् ।

उभौ हस्तौ समौ कृत्वा जानुभ्यामन्तरा स्थितौ ।

सप्रश्रयश्चोपविष्टान् सर्वान् पृच्छेद् द्विजोत्तमान् ॥

श्राद्धं करिष्ये इति पृच्छेदित्यर्थः । ततः कुरुष्वेत्यभ्यनुज्ञातो देवताभ्यश्चेति त्रिः पठेत् । उक्तञ्च ब्रह्माण्डे—

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

आद्येऽवसाने श्राद्धस्य त्रिरावृत्तं जपेत्सदेति ।

ततः कर्त्तव्यमुक्तं निगमे—अपहता इति तिलान् विकिरेदिति । ततो ब्राह्मणहस्ते उदकं दत्वा आसनेषु दर्भासनं दद्यात् ।

तथाच याज्ञवल्क्यः—

पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि इति ।

पुराणे—

आसने चासनं दद्याद्वामे वा दक्षिणेऽपि वा ।

पितृकर्मणि वामे च दैवे कर्माणि दक्षिणे इति ।

दैवे आसनार्थे सयवा दर्भा इति विशेषः। उक्तं च काठके—देवानां सयवा दर्भा इति। अत्र संग्रहकारः—ततः पुनरपो दत्वा निमन्त्रयेत् देवे क्षणः क्रियतां ततस्तथेति विप्रो ब्रूयात् प्राप्नोतु भवानिति कर्त्ता पुनर्ब्रूयात् प्राप्नवानीति विप्रः पुनर्ब्रूयात् इति। निमन्त्रणम् चाङ्गुष्ठव्यतिरिक्तं हस्तं गृहीत्वा कर्त्तव्यम् । तथाच पुराणे—

निरङ्गुष्ठं गृहीत्वा तु विश्वान् देवान् समाह्वयेत् इति ।

गृहीत्वा इत्यस्यानन्तरं निमन्त्र्येति शेष इति माधवः ।

आवाहनेतिकर्त्तव्यतामाह यमः—

यवहस्तस्ततो देवान् पृष्ट्वा चावाहनं प्रति ।

आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ।

विश्वेदेवाः शृणुतेति मन्त्रं जप्त्वा ततोऽक्षतान् ।

ओषधय इति मन्त्रेण विकिरेत्तु प्रदक्षिणम् ।

पादादिमस्तकान्तमक्षतानारोपयेदित्यर्थ इति माधवः। विश्वेदेवाश्च पार्वणे पुरूरवार्द्रवसंज्ञकाः । तथाच शङ्खः

इष्टिश्राद्धे क्रतुदक्षौ संकीर्त्यौ वैश्वदेविके ।

नान्दीमुखे सत्यवसू काम्ये तु धुरिलोचनौ ॥

पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ ।

नैमित्तिके कालकामावेवं सर्वत्र कीर्त्तयेदिति ॥

इष्टिश्राद्धं, कर्माङ्गश्राद्धं तच्च पारस्करेण दर्शितम्—

निषेककाले सोमे च सीमन्तोन्नयने तथा ।

ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत्कृतमिति ॥

वृद्धिवादित्यनेन वृद्धिश्राद्धात्कर्माङ्गश्राद्धमन्यदिति ज्ञायते नान्दीमुखं वृद्धिश्राद्धम्, तत्स्वरूपमाह वृद्धवासिष्ठः–

पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतमिति ॥

आदिशब्देनान्नप्राशनचूडाकरणादिसंस्कारा गृह्यन्ते नतु गर्भाधान, पुंसवन, सीमन्तोन्नयनानि तत्र क्रियमाणस्वकर्माङ्गश्राद्धत्वेन पृथगुदाहृतत्वात् । पार्वणममावास्याश्राद्धम् । नैमित्तिकं सपिण्डीकरणम् । यद्यपि–

एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।

इति परिभाषितं तथापि तदप्यदैवं कर्त्तव्यमिति वाक्यशेषेण तत्र वैश्वदेवहीनतावगमादिह नैमित्तिकशब्देन एकोद्दिष्टयुक्तं सापिण्डीकरणं लक्ष्यते इति माधवादयः । विश्वेदेवानामन्त्र्य अर्घ्यपात्रद्वयासादनानि कुर्यात् । तथाच याज्ञवल्क्यः–

यवैरन्ववकीर्याथ भाजने सपवित्रके ।

शन्नोदेव्या पयः क्षिप्त्वा यवोसीति यवाँस्तथेति ॥

मात्स्ये–

विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यासनपूर्वकैः ।

पूरयेत्पत्रयुग्मन्तु स्थाप्य दर्भपवित्रकइति ॥

कात्यायनः–सौवर्णराजतौदुम्बरखड्गमाणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते पत्रपुटके वेति निषेधति कांस्यादीनि इत्यर्थः । राजतं तु पितृपात्रविषयकम् । तदुक्तं रजतमधिकृत्य

शिवनेत्रोद्भवं यस्मादतस्तत्पितृवल्लभम् ।

अमङ्गलं तद्यत्नेन देवकार्येषु वर्जितमिति ।

अर्घ्यपवित्रं च प्रतिपात्रं भेदेन कार्यमित्याहुर्मूले—

द्वे द्वे शलाके देवानां पात्रे कृत्वा पयः क्षिपेत् ।

पवित्रकरणे कर्त्तव्यतामाह याज्ञवल्क्यः–

पवित्रेस्थ इतिमन्त्रेण द्वे पवित्रे च कारयेत् ।

अन्तर्गर्भे कुशच्छिन्ने कौशे प्रादेशसंमिते इति ।

कुशमन्तरीकृत्य छिन्ने नतु काष्ठेन लोहेन वा । अनन्तरम् स्वाहार्घ्या इति मन्त्रेण देवतार्थं ब्राह्मणसमीपेऽर्घ्यपात्रं स्थापयेत् । तथा च गार्ग्यः—स्वाहेति चैव देवानामिति । अर्घ्यपात्रस्थापनेऽयं मन्त्रो नत्वर्घ्यदाने इति माधवादयः ।

याज्ञवल्क्यः—

यादिव्या इति मन्त्रेण हस्ते अर्घ्यं विनिक्षिपेत् इति ।

गार्ग्यः—

दत्वा हस्ते पवित्रं तु सम्पूज्यार्घ्यं विनिक्षिपेत् इति ।

तत उदकपूर्वकं गन्धादि दद्यात् । तथाच याज्ञवल्क्यः—

दत्वोदकं गन्धमाल्यं धूपदानं सदीपकमिति ॥

अत्र गन्धादिकमाच्छादनस्याप्युपलक्षणमिति माधवादयः ।तदेवमासनप्रभृत्याच्छादनपर्यन्तं वैश्वदेविकार्चनं काण्डानुसमयेन कृत्वा आसनाद्याच्छादनपर्यन्तं पित्रर्चनं प्राचीनावीत्यप्रदक्षिणं दक्षिणामुखः कुर्यात् । तथाच याज्ञवल्क्यः—

अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणमिति ।

अत्र हि अपसव्यं ततः कृत्वेति वैश्वदेविकासनादिपदार्थकाण्डादूर्द्धं पित्रर्चनविधानात् काण्डानुसमयो लभ्यत इति विज्ञानेश्वरमाधवादयः । आसनादौ विशेषमाह—

द्विगुणान् तु कुशान् दत्वा ह्युशन्तस्त्वेत्यृचा पितॄन् ।
आवाह्य तदनुज्ञातो जपेदायन्तुनस्ततः ॥
यवार्थस्तु तिलैः कार्यः कुर्यादर्घ्यादि पूर्ववत् ।
दत्वार्घ्यं संस्रवाँस्तेषां पात्रे कृत्वा विधानतः ।
पितृभ्यः स्थानमसीति न्युब्जपात्रं करोत्यध इति ।

द्विगुणान् द्विगुणभुग्नान् सतिलानासनार्थं दद्यात् । तदुक्तं काठके—पितॄणां द्विगुणैस्तु तैरिति । आसनदानात्पूर्वं पश्चाच्चोदकं दद्यात् । तथाचा

श्वलायनः—अपः प्रदाय दर्भान् द्विगुणभुग्नानासनं प्रदायाऽपः प्रदायेति। ततः श्राद्धे क्षणः क्रियतामिति पूर्ववत्कुशं दत्वा पितॄनावाहयिष्ये इति ब्राह्मणान् पृष्ट्वा आवाहयेति तैरनुज्ञातः उशन्तस्त्वेति मन्त्रेण आवाह्य नमो वः पितर इति तिलान् मस्तकादिदक्षिणपादान्तम् अवकीर्य आयन्तु न इतिमन्त्रेणोपतिष्ठेत। तथाच प्रचेताः—

शिरःप्रभृतिपादान्तं नमोव इति पैतृके इति।

मूले च—

विश्वेदेवांस्तु पादादि शिरआदि पितामहान्।
अर्घ्यपात्रं विधायैव ब्राह्मणान् पूजयेत्ततइति।
उपस्थानानन्तरं कृत्यमुक्तं पुराणे—
जपेदायन्तुन इति मन्त्रं सम्यगशेषतः।
रक्षार्थं पितृसत्रस्य त्रिःकृत्वः सर्वतो दिशम्।
तिलांस्तु प्रक्षिपेन्मन्त्रमुच्चार्यापहताइति।

ततोऽर्घ्याद्याच्छादनान्तं पूर्ववत् कुर्यात्। अत्रार्घ्यपात्रासादनादौ विशेषो विष्णुना दर्शितः। दक्षिणाग्रेषु दक्षिणापवर्गेषु चमसेषु च त्रिष्वप आसिञ्चेच्छन्नोदेवीरिति। अयमर्थः, दक्षिणाग्रेषु दर्भेषु दक्षिणापवर्गतयाऽऽसादितेषु पवित्रान्तर्हितेषु चमसेषु त्रिष्वर्घ्यपात्रेषु शन्नोदेवीरभिष्टय इति मन्त्रेण प्रतिपात्रेण प्रतिपात्रमपआसिञ्चेदिति। शौनकः—पात्रेषु दर्भान्तर्हितेषु अपः प्रदाय शन्नोदेवीरभिष्टय इत्यनुमन्त्रितासु तिलानावपति तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोकान्पृणाहि नः स्वधानम इति। अत्र च पित्रादीनां त्रयाणामेकैकस्थानेऽनेकब्राह्मणनिमन्त्रणेपि त्रीण्येवार्घ्यपात्राणि नतु ब्राह्मणसंख्यया। तथाच वैजवापः—

स्नात्वा पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित्।
एकस्मिन् वा बहुषु वा ब्राह्मणेषु यथाविधीति॥

तिलानर्घोदकेषु क्षिप्त्वेत्यर्थः। अर्घ्यपवित्रं तु अयुग्मसंख्यया

कार्यमित्याहुर्मूले—

तिस्रास्तिस्रश्शलाकाः स्युः पितृपात्रेषु पार्वणे इति ।

तिलप्रक्षेपानन्तरं गन्धं पुष्पादीनि प्रक्षिपेत् । तदुक्तं ब्रह्मपुराणे—

अर्घ्या गन्धैश्च पुष्पैश्च ताः प्रपूज्याश्च मन्त्रवत् इति ।

या अर्घार्हास्ता आपः पूज्या इत्यर्थः । अनन्तरं कर्त्तव्यमाह शौनकः— ताःप्रतिग्राहयिष्यन्स्वधार्घ्या इति । ता आपो ब्राह्मणैः प्रतिग्राहयिष्यन् स्वधार्घ्या इति मन्त्रेण स्थापयेदित्यर्थः । पैठीनसिः— ततो ब्राह्मणहस्तेषु उदकपूर्वकमर्घोदकं ददाति या दिव्या इत्युक्त्वाऽसावेतत्ते अर्घोदकमिति । अप उपस्पृश्यैवमेवेतरयोरिति । एवमर्घ्यं दत्त्वा तेषामर्घ्योदकानां संस्रावान् विप्रहस्तेभ्यः पात्रेषु गलितान् पितृपात्रे संगृह्य तत्पात्रं न्युब्जमधोमुखं पितृभ्यः स्थानमसीत्यधः कुर्याद् । भूमौ निदध्यादित्यर्थः । न्युब्जकरणानन्तरं कर्त्तव्यमाह बैजवापः—

तस्योपरि कुशान् दत्त्वा प्रदद्याद्दैवपूर्वकम् ।

गन्धपुष्पाणि धूपं च दीपवस्त्रोपवीतकम् ॥

दैवपूर्वकमित्यनेन पदार्थानुसमयो लभ्यते सच याज्ञवल्क्योक्तेन काण्डानुसमयेन सह विकल्प्यत इति माधवः । अत एव स्मृत्यर्थसारेपि—आसनादीनामाच्छादनान्तानां काण्डानुसमयः, पदार्थानुसमयो वेति पक्षद्वयमप्युक्तम् । ततोऽग्नौकरणं कुर्यात् ।

तदनुष्ठानप्रकारमाह याज्ञवल्क्यः—

अग्नौ करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम् ।

कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् ॥

हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः ।

यथालाभोपपन्नेषु रौप्येषु तु विशेषत इति ॥

अग्नौकरिष्यन् घृतप्लुतमन्नमादायाग्नौ करिष्ये इति ब्राह्मणान् पृच्छेत् । घृतप्लुतेन शाकादेर्निरासः । ततः कुरुष्वेति तैरनुज्ञातः सन्निधावुपसमाधाय मेक्षणेनावदाय सोमाय पितृमते स्वाहा नमः, अग्नये काव्य-

वाहनाय स्वाहा नम इति पिण्डपितृयज्ञावधानेनाग्नौ जुहुयात्। ततो मेक्षणं हुत्वा हुतशेषं पितृभाजनेषु दद्यान्न तु वैश्वदेवभाजनेषु । रौप्येष्विति-लिङ्गात्, माधवाद्युदाहृतवचनाच्च । आहिताग्निः सर्वाधानी तु दक्षिणाग्नौ जुहुयात् । तथाच मार्कण्डेयः—

आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः ।
अनाहिताग्निस्त्वौपसदे, अग्न्यभावे द्विजे,ऽप्सु ॥वेति

अर्धाधानपक्षे तु औपासनाग्नावेवाग्नौकरणहोमः । अग्न्यभावे तु पाणावेव होमः पाणिहोमे इध्ममेक्षणविप्राभ्यनुज्ञा न सन्ति । पित्र्यविप्रपाणिं परिसमुह्य पर्युक्ष्य वामेनोपस्तीर्य दक्षिणेनावदाय जुहुयादिति स्मृत्यर्थसारे । स्मृतिचन्द्रिकाकारस्त्वाह—विप्राभ्यनुज्ञा नास्तीत्य शुद्धम्। अग्निश्चेदाज्यं गृहीत्वा भवत्स्वेवाग्नौकरणमिति पूर्ववत्तथास्त्विति शौनकगृह्यविरोधात् मेक्षणाभावोक्तिरपि मेक्षणकार्ये अन्यविध्यभावादयुक्ता परिसमूहनपर्युक्षणसद्भावोक्तिश्चायुक्ता पांसुनिरसनलक्षणस्ये ष्टकार्यस्य लोपात् नियमादृष्टमात्रस्यात्राप्रयोजकत्वात् इति । हेमाद्रिस्तु उक्तस्मृत्यर्थसारसंग्रहे स्मृतिचान्द्रिकाकारोक्तं तत्खण्डनं चोपन्यस्य पर्युक्ष्य दर्भानास्तीर्येति यमवचनेन पर्युक्षणदर्भानास्तीर्येति पाठान्तरं परिस्तरणसमूहनादिपरिसंख्यापरं कर्कग्रन्थं चोपन्यस्य यदत्र युक्तं तद्ग्राह्यमित्युपसंजहार। पाणौ हुतस्य पृथग्ग्रासं प्रतिषेधति गृह्यकारः—

अन्नं पाणितले दत्तं पूर्वमश्नन्त्यबुद्धयः ।
पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते ॥
यच्च पाणितले दत्तं यच्चान्यदुपकल्पितम् ।
एकीभावेन भोक्तव्यं पृथग्भावो न विद्यत इति ॥

स्मृत्यर्थसारे तु—सर्वाधानी दक्षिणाग्नौ जुहुयाद्विप्रपाणौ वेति विकल्पमभिधाय तेन पाणिहुतं तदैव प्राश्याऽऽचम्योपविशेत् । अथवा भाजने क्षिप्त्वाऽऽचम्योपविशेत् । विधुरादिभिरग्निहीनैर्हुतं तु पूर्वं नाश्नीयात् भोजनकाल एवाश्नीयात् । त्यक्ताग्निहुतं तु नैवाश्नीया-

दिति स्थितम् ।

अथ परिवेषणम् ।

याज्ञवल्क्यः—

दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमंत्रणम् ।
कृत्वेदंविष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥

मनुः—

विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमात् ।

अनन्तरं विश्वेभ्यो देवेभ्य इदमन्नं परिविष्टं परिवेष्यमाणं चातृप्तेरिति यवोदकेन निवेद्य तथा पित्र्येऽमुकगोत्रायामुकशर्मणे इदमन्नामिति तिलोदकप्रदानेन निवेद्य एवं पितामहाय प्रपितामहाय च निवेद्यापोशानं दत्त्वा सव्याहृतिकां गायत्रीं मधुवाताइति त्र्यृचं च मध्विति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रूयात् । तथाच स्मर्यते—

संकल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः ।
श्राद्धं निवेद्यापोशानं जुषप्रैषोथ भोजनम् ।

तथा

गायत्रीं त्रिः सकृद्वापि जपेद् व्याहृतिपूर्विकाम् ।
मधुवाताइति त्र्यृचं मध्वित्येतत्त्रिकं तथा इति ।

याज्ञवल्क्यः—

सव्याहृतिकगायत्रीं मधुवाता इति त्र्यृचम् ।
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेपि वाग्यताः ॥
अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः ।
आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं ततः ॥
अन्नमादाय तृप्ताः स्थः शेषं चैवानुमान्य च ।
तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृदिति ॥

आतृप्तेरिति तृप्त्यनन्तरमपि किंचिद्देयम् । तथाच शौनकः—मृष्टं दत्तमृधुकमिति । मृष्टं प्रभुतं दत्तं ऋद्धिकरमिति वृत्तिकारः तच्च

दासवर्गतृप्त्यर्थम् । तथाच मनुः—

उच्छेषणं भूमिगतं जिह्मस्य च शठस्य च ।

दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षत इति ।

तथा आतृप्तेः पवित्राणि पुरुषसूक्तपवमानादीनि जप्त्वा तृप्तान् कृत्वा पूर्वोक्तं सव्याहृतिगायत्र्यादिकं जपेत् । अनन्तरं सर्ववर्णभक्तमादाय तृप्ताः स्थेति तान् पृष्ट्वा तृप्ताः स्म इति तैः प्रत्युक्तः शेषमन्नमस्ति किं क्रियतामिति पृष्ट्वा इष्टैः सह भुज्यतामिति अनुज्ञां प्राप्य तदन्नं पितृस्थानब्राह्मणस्य पुरस्तादुच्छिष्टसंनिधौ दक्षिणाग्रेषु दर्भेषु तिलोदकप्रक्षेपपूर्वकं ये अग्निदग्धाइत्यनयाऽवक्षिपेत् । पुनस्तिलोदकं निक्षिपेत् । ततो ब्राह्मणहस्ते गण्डूषार्थं सकृत्सकृदपो दद्यात् । तदनन्तरं कर्त्तव्यं सएवाह

सर्वमन्नमुपादाय सतिलं दक्षिणामुखः ।

उच्छिष्टसन्निधौ पिण्डान् दद्याद्वै पितृयज्ञवत् ॥

मातामहानामप्येवं दद्यादाचमनं ततः ।

स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव चेति ॥

पिण्डपितृयज्ञकल्पातिदेशेन चरुश्रपणसद्भावेऽग्नौकरणशिष्टचरुशेषेण सह सर्वमन्नमुपादायाग्निसन्निधौ पिण्डं दद्यात् तदभावे ब्राह्मणार्थं सार्ववर्णिकमन्नमुपादाय उच्छिष्टसंनिधौ पितृयज्ञकल्पेन पिण्डान् दद्यात् । मातामहानामप्येवमेव वैश्वदेवावाहनादिपिण्डप्रदानान्तं कर्म कृत्वा ब्राह्मणानामाचमनं दद्यात् ततः स्वस्तीति ब्रूतेति ब्राह्मणान् स्वस्ति वाचयेत् । तैश्च स्वस्तीत्युक्ते अक्षय्यमस्तु ब्रूतेति ब्राह्मणहस्तेषूदकं देयम् । अस्त्वक्षय्यमिति ते ब्रूयुः । ततः कर्त्तव्यं स एवाह—

दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ।

वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम् ॥

ब्रूयुः अस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम् ।

विश्वेदेवाश्च प्रीयन्तां विप्रैः प्रोक्त इदं जपेत् ॥

दातारो नोभिवर्द्धन्तां वेदाः सन्ततिरेव च ।

श्रद्धा च नो मा व्यगमत् बहु देयं च नोऽस्त्विति ॥

इत्युक्त्वोक्त्वा प्रिया वाचः प्रणिपत्य विसर्जयेत् ।

वाजेवाजे इति प्रीतः पितृपूर्वं विसर्जयेदिति ।

दक्षिणायां विशेषमाह पारस्करः—हिरण्यं विश्वेभ्यो देवेभ्यो, रजतं पितृभ्य इति। तथा

एकपङ्क्त्युपविष्टानां विप्राणां श्राद्धकर्मणि ।

भक्ष्यभोज्यं समं देयं दक्षिणां त्वनुसारत इति ॥

निमन्त्रितब्राह्मणानां विद्यादिगुणतारतम्येनेत्यर्थः । पित्र्ये दक्षिणादानं प्राचीनावीतिना कार्यम् ।तथाच जमदग्निः—अपसव्यन्तु तत्रापीति । तत्रापि दक्षिणादानेपीत्यर्थः ।

यत्तु तेनैवोक्तम्—

अपसव्यं कर्म सर्वं दक्षिणादानवर्जितम् इति ।

तद्ब्राह्मणोद्देशेन दक्षिणादानविषयकम् । सच पक्षो देवलेन दर्शितः ।

आचान्तेभ्यो द्विजेभ्यस्तु प्रदद्यादथ दक्षिणामिति ।

तत्र क्रमं स एवाह—

दक्षिणां पितृविप्रेभ्यो दद्यात्पूर्वं ततो द्वयोरिति ।

द्वयोर्द्वाभ्यां वैश्वदेविकब्राह्मणाभ्यामित्यर्थः। तदेवं यथा रजतहिरण्यादिदक्षिणां दत्त्वा स्वधां वाचयिष्ये इत्युक्त्वा तैर्ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यःपित्रादिभ्यो मातामहादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत् । ततोऽस्तु स्वधेति ब्राह्मणा ब्रूयुः । ततो भूमावुदकं सिक्त्वा विश्वे देवाः प्रीयन्तामिति ब्रूयात्। ब्राह्मणैश्च प्रीयन्तां विश्वेदेवा इत्युक्ते दातार इति मन्त्रं जपेत् ततः पितृणां न्युब्जं पात्रं उत्तानं कृत्वा वाजेवाजे इति मन्त्रेण पितृपूर्वं विसर्जयेत् । तथाच स एवाह—

यस्मिंस्ते संस्रवाः पूर्वं पितृपात्रे निवेशिताः ।

पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेद् इति

पिण्डप्रमाणं त्वाहसंग्रहकारः ।

एकोद्दिष्टे सपिण्डे च कपित्थं तु विधीयते ।
नारिकेलप्रमाणं तु प्रत्यब्दे मासिके तथा ॥
तीर्थे च दर्शे संप्राप्ते कुक्कुटाण्डप्रमाणतः ।
महालये गयाश्राद्धे कुर्यादामलकोपममिति ॥

वायुपुराणे-

शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे ।
उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥

सप्तगोत्राणि तु स्मृत्यन्तरे-

पिता माता च भार्या च भगिनी दुहिता तथा
पितृमातृष्वसा चैषां सप्तगोत्राणि वै विदुरिति ॥

अत्र मातृशब्देन मातामहगोत्रं, भार्यागोत्रं श्वशुरगोत्रं, भगिनीगोत्रं दुहितृपितृष्वसॄणां गोत्राणि यत्कुले ता दत्तास्तदीयानि, एतेषामेव गोत्राणामेकोत्तरशतं कुलं लक्षणया तत्स्थाः पुरुषाः गृह्यन्ते । यथा

तत्वानि विंशतिनृपाद्वादशैकादशक्रमात्
दशाष्टाविति गोत्राणि कुलमेकोत्तरं शतमिति ॥

अस्यार्थः, पितृगोत्रे तत्वानि २४ एते च द्वादश परे, तावन्त एवावरे। मातृगोत्रे दश परे, दशावरे एवं विंशतिः २० । भार्यागोत्रे अष्टौ परे, अष्टौ अवरे १६ । भगिनीगोत्रे तत्रादयः षट् परे, भागिनेयादयः षड्अवरे १२ ।दुहितृगोत्रे तच्छ्वशुरादयः पञ्च परे, दौहित्रादयः पञ्चावरे जामाता चेत्येकादश ११ । पितृष्वसृकुले तच्छ्वशुराद्याः पञ्च परे, तद्भर्त्राद्याअवरे पञ्चेत्येवं दश १० । मातृष्वसृकुले तच्छ्वशुराद्याश्चत्वारः परे, तद्भर्त्राद्याश्चत्वारोऽवरे इत्येवमष्टौ ८ । सर्वे समुदिता एकोत्तरं शतं भवति ।

अथ पिण्डानां प्रतिपत्तिः ।

तत्र पुत्रार्थी मध्यमं पिण्डं पत्न्यै दद्यात्। तथाच वायुपुराणे-

पत्न्यै प्रजार्थी दद्यात्तु मध्यं तु मन्त्रपूर्वकमिति ।

मन्त्रस्तु मात्स्ये—

आधत्त पितरो गर्भं मन्त्रं सन्तानवर्द्धनम् इति ।

बृहस्पतिः—

अन्यदेशगता पत्नी गर्भिणी रोगिणी तथा ।

तदा तं जीर्णवृषभश्छागो वा भोक्तुमर्हति इति ।

देवलः—

ततः कर्मणि निर्वृत्ते तान् पिण्डांस्तदनन्तरम् ।

ब्राह्मणोऽग्नि, रजो, गौर्वा भक्षयेदप्सु वा क्षिपेदिति ।

एतच्च पुत्रार्थित्वाभावविषयकं, मध्यपिण्डेतरविषयकं वा । तीर्थश्राद्धे तु अप्स्वेव पिण्डप्रक्षेपः । तदुक्तं विष्णुधर्मोत्तरे—

तीर्थश्राद्धे सदा पिण्डान् क्षिपेत्तीर्थे समाहितः

दक्षिणाभिमुखो भूत्वा, पित्र्यादिक्सा प्रकीर्तितेति ।

अनन्तरमुच्छिष्टं संमार्जयेत् । अतएव याज्ञवल्क्यः—

सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेदिति ।

सत्सु विद्यमानेषु अविसृष्टेषु इति यावत् । यत्तु प्रचेतसो वचनम्—

भृत्यवर्गावृतो भुङ्क्ते कव्यशेषं स्वगोत्रजैः

आसायं श्राद्धशालायां द्विजोच्छिष्टं न मार्जयेदिति ।

तत्तु गृहान्तरासंभवविषकम् । मात्स्ये—

ततश्च वैश्वदेवान्नं सभृत्यः सहबान्धवः ।

भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितामिति ।

श्राद्धशेषेणैव च वैश्वदेवः । नित्यं श्राद्धं तु श्राद्धान्तरे सति कृताकृतम् । यदा तु क्रियते तदा तु तदपि श्राद्धशेषेणैव । आहिताग्निना तु श्राद्धात्प्रागेव वैश्वदेवः सच पृथक्पाकेनैवेत्यादिग्रन्थान्तरे स्फुटम् । यदि पितृपाकशेषाद्वैश्वदेवः, यदि वा पाकान्तरादुभयथापि पितृपाकशेषादेव भोजनम् । तथाच याज्ञवल्क्यः—

प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितमिति ।

असति तु पितृशेषे पाकान्तरं कृत्वापि भोक्तव्यमेव । तथाच देवलः

श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्तेऽथ कदाचन ।

देवा हव्यं न गृह्णन्ति कव्यानि पितरस्तथेति ॥

एकादश्यादौ तु भोजनप्रत्याम्नायः स्मर्यते—

उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ॥

उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति ॥

बृहस्पतिः—

तां निशां ब्रह्मचारी स्याच्छ्राद्धभुक् श्राद्धिकैः सहेति ।

मात्स्ये—

पुनर्भोजनमध्वानं पानमायासमैथुनम् ।

श्राद्धभुक् श्राद्धकृच्चैव सर्वमेतद्विवर्जयेत् ॥

स्वाध्यायं कलहं चैव दिवास्वापं तथेच्छयेति ॥

यमः—

पुनर्भोजनमध्वानं भारमायासमैथुनम् ।

संध्यां प्रतिग्रहं होमं श्राद्धभुक्त्वष्ट वर्जयेदिति ॥

अत्र संध्याहोमयोः प्रतिषेधो ऽकृतप्रायश्चित्तपरः । तथाच माधवीये पुराणवाक्यम्—

दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ।

ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि ॥

असमर्थस्तु संकल्पश्राद्धं कुर्यात् सदा नरः ।

तथाच स्मर्यते—

अङ्गानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात् ॥

संकल्पश्राद्धमेवासौ कुर्यादर्घ्यादि वर्जितमिति ।

तल्लक्षणं तु व्यास आह—

संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ।

नावाहनाग्नौकरणे पिण्डांश्चैव न दापयेदिति ॥

विकिरश्च न दातव्य इति माधवीये स्मृत्यन्तरे ।

पारिजाते वृद्धशातातपः—

पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोत्र विकिरश्च विलुप्यते ॥
अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथास्थितमिति ॥

विसर्जनकाले ओं स्वधेति न वक्तव्यमित्यर्थः ।

स्मृतिसंग्रहे—

अग्नौकरणमर्घ्यं च विकिरावाहने स्वधाम् ।
पिण्डयुक्ते प्रकुर्वीत पिण्डहीने विवर्जयेदिति ॥

आवाहनस्य च समन्त्रकस्यैव निषेधः, अन्यथा देवतासान्निध्यप्रसङ्गः। तथाच आवाहनमन्त्रान् अपठित्वैव देवान् पितॄंश्च ब्राह्मणेषु ध्यायेदिति चन्द्रिकादौ स्थितम्। अन्नासंभवे आमश्राद्धम्, तस्याप्यसंभवे हेमश्राद्धं कार्यमित्युक्तम् । तत्र विशेषमाह व्यासः—

आमं ददातु कौन्तेय दद्यादन्नं चतुर्गुणम् ।
आवाहनादि सर्वं स्यात्पिण्डदानं च भारत ! ॥
दद्याच्च द्विजातिभ्यः शृतं वाऽशृतमेव वा ।
तेनाग्नौकरणं कुर्यात्पिडांस्तेनैव निर्वपेदिति ॥
हस्तेऽग्नौकरणं कुर्याद् ब्राह्मस्य विशेषतः ।

इति तेनैवोक्तत्वादिह पाणावेव होमः। तस्य कालमाह शातातपः—

आमश्राद्धं तु पूर्वाह्ण इति ।

यत्तु

मध्याह्नात्परतो यस्तु कुतपः स उदाहृतः ।
आममात्रेण तत्रैव पितॄणां दत्तमक्षयम् ॥

इति स्थितम् । तच्छूद्रकर्तृकश्राद्धविषयकमित्यपरार्के स्थितम्, हेमाद्रावप्येवम् । आमश्राद्धे हेमश्राद्धे च भोजनयुक्तानामपोशानकर्मा-

दीनां यथासुखं जुषध्वं तृप्ताः स्थेत्यादीनां च द्वारलोपान्निवृत्तिरिति पारिजाते । मरीचिः-

आवाहने स्वधाकारे मन्त्रा ऊह्या विसर्जने ।
अन्यकर्मण्यनूह्याः स्युरामश्राद्धे विधिः स्मृत इति ॥

अत्रामश्राद्ध इति हेमश्राद्धस्याप्युपलक्षणमिति परिजाने ।

आवाहने यथा पितृन् हविषे अत्तवे इत्यत्र अत्तवेपदस्थाने स्वीकर्त्तव्य इत्यूहः । स्वधाकारे नमो वः पितरइषे इत्यत्र इषेस्थाने आमद्रव्यायेत्यूहः, विसर्जने वाजेवाजइतिमन्त्रेण तृप्ता इति क्तप्रत्ययान्तमुपनीय-तर्प्स्यथेति लृडन्तमूह्यमिति पारिजाते स्थितम् । यद्यपि ऋग्व्यूहो निषिद्धस्तथापि विशेषवचनात्कार्यः । एवं "पूर्यातवा एतहचोक्षरं यदेनदप्यूहति तस्मादृचं नोहे" दिति यद्यपि श्रुतिस्तथापि विशेषविषयिण्या स्मृत्या बाध्यते । अग्निहोत्रादिस्मृतिरिव पतितेन कर्म न कर्त्तव्यमिति स्मृत्येत्यन्यत्र विस्तरः । हेम्नाद्यसंभवे स्मर्यते—

तृणानि वा गवे दद्यात्पिण्डान् वा विधिपूर्वकम् ।
तिलोदकैः पितृन् वापि तर्पयेत् स्नानपूर्वकम् ॥
अग्निना वा दहेत्कक्षं श्राद्धकाले समागते ।
तस्मिंश्चोपवशेदह्नि जपेद्वा श्राद्धसंहितामिति ॥

अथ पार्वणश्राद्धप्रपञ्चः ।

अथ तद्विकृतिभूतं प्रत्याब्दिकं निरूप्यते ।
तत्रेतिकर्त्तव्यमाह जातूकर्ण्यः-

पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः ।
कुर्वीत दर्शवत् श्राद्धं मातापित्रोर्मृतेऽहनीति ॥

ननूक्तातिदेशेन

पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ॥

इति वचनेन च प्रत्याब्दिकेपि मातामहानामपि श्राद्धं प्राप्नोतीति चेत् सत्यम् । अत एव निषिद्धं तत्कात्यायनेन—

कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिदिति स्थितिरिति ॥

कर्षूसमन्वितं सपिण्डीकरणम् । यद्यपि क्षयाहे पार्वणमेकोद्दिष्टं च प्रागुदाहृतैर्वचनैर्लभ्यते तथापि देशाचाराद्व्यवस्थितो विकल्प इत्युक्तं प्रागेव । तदेतदाहुर्मूले—

सपिण्डीकरणादूर्द्ध्वं कुर्यादेव हि पार्वणम् ।
एकोद्दिष्टं क्षये केचिदिच्छन्ति मुनिपुङ्गवा इति ॥

तत्राप्यमायां प्रेतपक्षे च मृतानां पार्वणमेव नियतमुक्तम् ।

अमायां तु क्षयो यस्य प्रेतपक्षेऽथवा पुनः ॥
पार्वणं तेन कर्त्तव्यं नैकोद्दिष्टं कदाचन ।

इति वचनाद् । इदं च वचनमानिश्चितमूलमिति **विज्ञानेश्वरः** । शाङ्खस्मृतावेतदुपलभ्यत इति **माधवः** ।

अथान्वारूढायाः क्षयाहो निर्णीयते ।

अन्वारोहणं च द्विविधम् । सहगमन, मनुगमनं च । सहगमनं च भर्तृशरीरेण तदस्थिभिर्वा तत्प्रतिनिधिभूतपर्णशरेण वा सह एकचित्यारोहणम् एकनिर्णयभर्तृसंस्कारमुद्दिश्य क्रियमाणमिति । संस्कारश्च न दाहमात्रं येन शरीरस्यैव संस्कारो न भर्तुरित्युच्येत । अस्थिपालाशविध्यानर्थक्यापत्तेः किंतूत्तरश्राद्धादिकर्माहताप्रयोजको मन्त्रादिकरणको दाहपूर्वकः क्रियाविशेषः। सच क्वचिद्भर्तृशरीर एव, क्वचित्तदवयवास्थ्यादिषु, क्वचिच्च तत्प्रतिकृतिषु पालाशादिषु क्रियत इति तत्तदर्थमर्थ्यमाना सैव चितिर्भर्तृचितिरेव । तेनास्थ्यादिनापि सहगमने ब्राह्मण्यादेर्न पृथक्चितिप्रयुक्तो दोषः, निर्व्यूढे हि भर्तृसंस्कारे स्त्रिया एवाग्निप्रवेशसिद्ध्यर्थं रच्यमाना चितिः पृथक्चितिः, तत्र ब्राह्मण्या नाधिकारः । भर्तृशरीरादिसाहित्यव्यतिरेकेण केवलं भर्तृमात्रोद्देशेन भिन्नचित्यारोहणमनुगमनम् । तत्र च ब्राह्मण्याः सहगमन एवाधिकारः ।

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां बत नारीणां धर्मोयं परमः स्मृत इति
उशनसः स्मरणात् । यानि च
या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नात्मानं च पतिं नयेत् ॥

इत्यादीनि च वाक्यानि तानि पृथक्चितिविषयाण्येव । तदेतत्स्पष्टमाह स्मृत्यर्थसारः—ब्राह्मण्या एकचित्यारोहणमेव न पृथक्चित्यारोहणं कार्यम् । सवर्णायाः पत्या सहैकचित्यारोहणम्, असवर्णायाः पृथक्चित्यारोहणमेवेति । क्षत्रियादिस्त्रीणां पृथक्पृथगेवेति मिताक्षरास्वरसः ।
दिवोदासीये भरद्वाजः—

पृथक्चितिं मृते पत्यौ न विप्रा गन्तुमर्हति ।
साप्यनुम्रियते पर्णशरदाहे सहास्थिभिरिति ॥

पारिजातेपि—देशान्तमृते पत्यौ ब्राह्मण्यास्तदस्थिभिः सहगमनं भवत्येव । तत्र चन्द्रिकायां भृगुः—

या समारोहणं कुर्याद्भर्तृचित्यां पतिव्रता ।
तां मृताहनि संप्राप्ते पृथक्पिण्डे नियोजयेत् इति ।
स्मृत्यन्तरेपि—
एकचित्यां समारूढौ दम्पती निधनं गतौ ॥
पृथक्श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथक् इति ।
ओदनमोदनापिण्डम् इत्यर्थः । अग्निस्मृतौ—
एकचित्यां समारुह्य मृतयोरेकबर्हिषि ।
पित्रोः पिण्डान् पृथग् दद्यादिति ।

तथा चैकस्यां तिथौ मातृपितृमरणे तन्त्रेण श्रपणं कृत्वा मातृपितृश्राद्धं पृथक् पृथक् कृत्वा एकबर्हिषि षट् पिण्डान् दद्यात् । पतिमुद्दिश्य कालान्तरे यान्वारूढा सा यस्यां तिथौ अग्निं प्रविष्टा तस्यामेव श्राद्धमर्हति नतु पतिक्षयतिथौ " क्षयाहस्तु क्षयेहनीति " । यत्र

क्षयः स क्षयाहः

तिथिस्तात्कालिकी ग्राह्या तथा मरणजन्मनोः ।

इति वचनादिति केचित् तन्न, मरणतिथौ श्राद्धप्रतिपादकवाक्यानामन्वारूढाश्राद्धेतरश्राद्धविषयकत्वात् ।

आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।

मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रतेति ।

स्वधर्ममनुपालयन्ती साध्वी कस्माच्चित्प्रतिबन्धकात्पतिमरणादिने मरणालाभे ततः प्रागूर्ध्वं वा तमुद्दिश्य तद्भक्त्यैवासून् त्यजति तस्या आब्दिकं पतिक्षयदिने एव युक्तम् । उक्तं च—

सहाग्रतः पृष्ठतो वा तद्भक्त्या म्रियते यदि ।

तस्याः श्राद्धं प्रदातव्यं पृथक् पत्युः क्षयेहनि इति ॥

पत्युः क्षयेऽहनि तस्याः श्राद्धं पृथक् दातव्यमित्यन्वयः । तस्याः क्षयेऽहनि इत्यन्वये पत्युः पृथगिति व्यर्थं स्यात् । किंच अन्यथाप्राप्ते विधिः स्यात्, तथाच वाक्यानर्थक्यमिति । अत्र केचित् तस्या अन्वारूढाया, भर्तुश्च क्षयाहनि स्वक्षयाहे पृथक् श्राद्धं प्रदातव्यं तेन तत्क्षयाहे तस्याः, पतिक्षयाहे पत्युः नत्वेकस्यां भर्तुरेव क्षयतिथावित्यर्थमाहुः तदपि न, क्षयेहनीत्यस्य संबन्धाकाङ्क्षायां तत्पतिशब्दाभ्यां संबन्धिसमर्पणे कृते श्राद्धपदेपि संबन्धाकाङ्क्षायां ताभ्यामेव संबन्धिसमर्पणे तस्याः श्राद्धं तस्याः क्षयाहनि पत्युः श्राद्धं पत्युः क्षयेहनीत्यावृत्तिलक्षणो वाक्यभेदः स्यात् पृथक्पदे वीप्साप्रसङ्गाच्च । किंच एकस्मिन्नेव दिने यदा तिथिद्वयं तत्र च प्रातरेकस्यां तिथौ पत्युर्मरणमपरस्यां चाग्निप्रवेशः स्त्रिया कृतः तत्र सहगमनेपि दिनद्वये श्राद्धप्रसङ्गः, तस्मात्तिथिस्तात्कालिकेति वचनमन्वारूढाश्राद्धेतरविषयम् । तदुक्तं पुराणसमुच्चये—

अग्रतः पृष्ठतो वापि तद्भक्त्या म्रियते तु या ।

तस्याः श्राद्धं सुतैः कार्यं पत्युरेव क्षयेहनि ।

इति वदन्ति ।

अथ वमनादिना श्राद्धविघ्ने निर्णयः ।

ऋग्विधाने–

इन्द्राय सामसूक्तेन श्राद्धविघ्नो यदा भवेत् ।
अग्न्यादिभिर्भोजनेन श्राद्धं सम्पूर्णमेव हीति ।

अत्रादिपदेन विधिवल्लौकिकाग्निप्रतिष्ठापनमन्वाधानाघाराज्यभागान्तस्थालीपाकतन्त्रं पितृनामपूर्वकाग्न्यर्चनान्न त्यागहोमादयो गृह्यन्ते भोजनशब्देन च श्राद्धस्य पुनः करणम् । एवञ्चात्र विधानद्वयमुक्तम् । तत्र भोजनानन्तरं श्राद्धे प्रधानभूतपिण्डदाने कृते पश्चाद्वमनप्राप्तौ होम एव कर्तव्यः । पिण्डदानात्प्राग् वमनादौ तद्दिने उपवासं कृत्वा परेऽहनि श्राद्धं कर्तव्यमित्यर्थः । उभयत्र सूक्तजपश्चानुवर्तते । पृथग्निमित्तत्वादर्शनात् । पक्षद्वयमप्याह स्मृतिसंग्रहकारः–

प्राधान्यं पिण्डदानस्य भोजनस्य तदङ्गता ।
अतो भुक्तिक्रियाहानौ श्राद्धावृत्तिं न मन्यते इति ॥

अत्र श्राद्धाऽऽवृत्तिं न मन्यते इत्यनेन होमविधिः सूचितः । तदुक्तम्—

प्राणादिपञ्चभिर्मन्त्रैर्यावद्द्वात्रिंशसंख्यया ।
होमशेषं समाप्याथ श्राद्धशेषं समापयेत् इति ॥

तथा तत्रैव ।

अकृते पिण्डदाने तु सज्जनो ब्राह्मणो वमेत् ।
पुनः पाकात्तु कर्तव्यं पिण्डदानं यथाविधि इति ॥

अत्र पुनः पाकविधानेन श्राद्धस्य पुनरावृत्तिर्विधीयते इति । संकल्पश्राद्धेपि पुनः करणमुक्तम् ।

भुक्तिक्रियायाः प्राधान्यं श्राद्धे संकल्पसंज्ञके ।
तत्रापि पितृविप्राणां तूपघाते पुनः क्रियेति ॥

एतद्वचनजातेन परेहनि पुनः श्राद्धकरणमुक्तम् । तदेतत्सांवत्सरिकमासिकविषयम् । अमायां वमनादिविघ्ने तु तदैवाऽऽमेन कार्यम् ।

तथाच मरीचिः—

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमावास्यादि नियतं माससंवत्सरादृतइति ॥

अनेनाब्दिकं मासिकं च श्राद्धमावश्यकं पक्वान्नेनैव कार्यमिति सूचितम् । श्राद्धे परिवेष्टुरुच्छिष्टस्पर्शे शुद्धिप्रकारः संग्रहे—

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तो न संकरः ।
भूमौ निधाय तद्द्रव्यमाचान्तेभ्यूक्षणाच्छुचिरिति ॥

भोक्तॄणामन्योन्यस्पर्शे शङ्खः–

श्राद्धपङ्क्तौ तु भुञ्जानो ब्राह्मणो ब्राह्मणं स्पृशेत् ।
तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेदिति । अन्योच्छिष्टस्पर्शे शङ्खः—

उच्छिष्टलेपनं स्पर्शे प्रक्षाल्यान्येन वारिणा ।
भोजनान्ते नरः स्नात्वा गायत्रीं त्रिशतं जपेत् ॥

अन्योन्यभोजनपात्रोच्छिष्टस्पर्शे व्यासः–

उच्छिष्टोच्छिष्टसंस्पर्शे स्पृष्टपात्रं विहृत्य च ।
सर्वान्नं पूर्ववत् क्षिप्त्वा भोजयेत्तु द्विजोत्तम इति ॥

एकोद्दिष्टलक्षणमाहुर्मूले–

एकां शलाकां निक्षिप्यैकोद्दिष्टे त्वर्घ्यमाहरेत् ।
एकपात्रे पवित्रं तु देवावाहनवर्जितम् ॥
अग्नौकरणहीनं तु शेषं कुर्याच्च पूर्ववत् इति ।

याज्ञवल्क्योपि—

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् इति ॥

उपतिष्ठतामित्यक्षय्यस्थाने, विसर्जने अभिरम्यतामिति वदेत् । ब्रूयुस्तेऽभिरताः स्म इति । कात्यायनः– स्वदितमिति तृप्तिप्रश्नः, सुस्वदितमित्यनुज्ञेति । तच्चैकोद्दिष्टं त्रिविधम् । नवं, नवमिश्रं पुराणं चेति ।

तत्र प्रथमाद्येकादशाहान्तं विहितं नवश्राद्धम् । तथाचाङ्गिराः—

प्रथमेह्नि तृतीयेह्नि पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते इति ॥

वसिष्ठस्त्वाह—

सप्तमेह्नि तृतीयेह्नि प्रथमे नवमे तथा ।
एकादशे पञ्चमे स्युर्नवश्राद्धानि षट् सदेति ।

षण्णां नवश्राद्धानामुपरि कर्त्तव्यं मासिकं नवमिश्रम्। तथाचाश्वलालायनः—नवमिश्रं षडुत्तरामिति । मासिकानामुपरि कर्त्तव्यं प्रत्याब्दिकादि पुराणम् । अत एव हारीतेन प्रायश्चित्तकाण्डे क्रमेण नवमासिकयोः प्रायश्चित्तमभिधायोत्तरकालीनं श्राद्धं पुराणशब्देन व्यवहृतम् ।

चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मासिके ।
एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयतइति ॥

इत्थं पार्वणैकोद्दिष्टे विवेचित अथोभयात्मकं सपिण्डीकरणं विविच्यते तत्र लौगाक्षिः—

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनामिति ।
षोडशश्राद्धानि तु जातूकर्ण्येन दर्शितानि ॥
द्वादशप्रतिमास्यानि आद्यषाण्मासिके तथा ।
त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडशेति ॥

आद्यम् ऊनमासिकम् । एवं षाण्मासिकाब्दिकशब्दावपि ऊनषाण्मासिकमूनाब्दिकञ्चाहतुः द्वादशप्रतिमास्यानां पृथगुपादानात् । तेषां तु कालमाह याज्ञवल्क्यः—

मृतेऽहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैवमाद्यमेकादशेहनीति ॥

पैठीनसिः—

मासिकानि स्वकाले तु दिवसे द्वादशेपि वेति ।

ऊनषाण्मासिकादीनां कालन्तु श्लोकगौतम आह—

एकद्वित्रिदिनैरूने त्रिभागेनाधिकेन वा ।
श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतम इति ॥

ऊनमासिकस्य वैकल्पिकं कालमाह गालवः—

मरणाद्द्वादशाहे स्यान्मास्यूने वोनमासिकमिति ।

ऊनानां वर्ज्यकालमाह गार्ग्यः—

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति ॥

पुराणे—

सपिण्डीकरणादर्वाक् कुर्याच्छ्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि त्विति ॥

एवं षोडशश्राद्धानि कृत्वा ततः सपिण्डीकरणं कुर्यात् । तस्य कालमाहुर्मूले—

सपिण्डीकरणं चाब्दे सम्पूर्णेऽभ्युदये तथा ।
द्वादशाहे तु केषाञ्चिन्मतं चैकादशेऽहनीति ॥

बौधायनस्तु—अथ संवत्सरे पूर्णे सपिण्डीकरणं त्रिपक्षे वा तृतीये वा मासि षष्ठे वैकादशे वा द्वादशाहे वेति । एकादशाहद्वादशाहतृतीयमासषष्ठमासैकादशमाससंवत्सरान्तत्रिपक्षशुभागमा इति अष्टौ काला माधवादिग्रन्थेषु फलिताः । तत्रेयं व्यवस्था, मृताहादेकादशे दिने यद्यमावास्या स्यात्तदा साग्निकेन तस्यामेव सपिण्डीकरणं कार्यम् ।

तथाच कार्ष्णाजिनिः—

सपिण्डीकरणं कुर्यात्पूर्वश्चाग्निमान् सुतः ।
परतो दशरात्राच्चेत्कुहूरब्दोपरीतरइति ॥

एकादशदिवसत्वेन दर्शस्यानागमे तु साग्निर्द्वादशेऽह्नि कुर्यात् ।

तथाच भविष्यत्पुराणम्—

यजमानोऽग्निमान् राजन् प्रेतश्चानग्निमान् भवेत् ।
द्वादशाहे भवेत्कार्यं सपिण्डीकरणं सुतैरिति ॥

प्रेतस्य साग्निकत्वे तु तृतीयपक्षे सापिण्डनम् ।

तथाच सुमन्तुः—

प्रेतश्चेदाहिताग्निः स्यात्कर्त्तानग्निर्यदा भवेत् ।
सपिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥

उभयोः साग्निकत्वे तु द्वादशाहे ।

तथाच स्मर्यते—

साग्निकस्तु यदा कर्त्ता प्रेतश्चाप्यग्निमान् भवेत् ।
द्वादशाहे तदा कार्यं सपिण्डीकरणं पितुरिति ॥

उभयोरनग्निकत्वे तु द्वादशाहादयःसप्त काला इच्छया विकल्प्यन्ते तथाच माधवीये भविष्यत्पुराणम्—

सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ ! ॥
द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासिके ।
एकादशेपि वा मासि मङ्गले वाप्युपस्थिते इति ॥

व्याघ्रः—

आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थितेश्च शरीरस्य द्वादशाहे प्रशस्यत इति ॥

एतच्च सर्वं त्रैवर्णिकाविषयं शूद्रस्य तु द्वादशाहएव नियमः ।

मन्त्रवर्ज्जं हि शूद्राणां द्वादशेहनि कीर्तितमिति ॥

सपिण्डीकरणं प्रकृत्य विष्णुनोक्तत्वात् । यदा संवत्सरपूर्त्तेः प्रागेव सपिण्डीकरणं क्रियते तदा, यद्यपि षोडशश्राद्धानि ततः प्रागेव कृतानि ।

श्राद्धानि षोडशाद-त्वा न कुर्य्यात्तु सपिण्ड नमिति ।

वृद्धवसिष्ठोक्तेः तथापि स्वस्वकाले पुनरपि मासिकादीन्यावर्त्तनीयानि ।

तदाह गोभिलः—

यस्य संवत्सरादर्व्वाग् विहिता तु सपिण्डता ।
विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडशेति ॥

विधिवदिति यथाचारं पार्वणविधिना एकोद्दिष्टविधिना वेत्यर्थः। तथाच पैठीनसिः—

सपिण्डीकरणादर्व्वाक् कुर्य्यात् श्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्य्यात् सर्व्वाणि तानि तु ॥
सपिण्डीकरणादूर्ध्वं यदा कुर्य्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्य्यात्तथा कुर्य्यात्स तान्यपि ॥

आवर्त्तनं चोर्ध्वभाविनामेव नतु प्राग्भाविनाम् ।

तथाच कार्ष्णाजिनिः—

अर्व्वागब्दाद्यत्र यत्र सपिण्डीकरणं कृतम् ।
तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिरिति ॥

सपिण्डीकरणादूर्ध्वमावर्त्तनीयानामनुमासिकादीनां वृद्धिप्राप्तौ पुनरपकर्षः । तथाच शाट्यायनिः—

सपिण्डीकरणादर्वाक् अपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥

निषेधश्च कात्यायनेनोक्तः ।

निर्वर्त्य वृद्धितन्त्रं तु मासिकानि न तन्त्रयेदिति ॥

विज्ञानेश्वरस्तु—संवत्सरादर्वाक्सपिण्डीकरणमिति पक्षे किं षोडशश्राद्धानि कृत्वा सपिण्डीकरणं किंवा विपरीत इति संशय्य सपिण्डनानन्तरं स्वकाले कार्याणीति मुख्यः पक्षः। अर्वाक्सपिण्डनादिति त्वापत्कल्प इति सिद्धान्तितत्वात्। तन्मते माधवाद्युदाहृतानि शाठ्यायनिप्रभृतिवचनानि कथं व्याख्येयानीति परिभावनीयम् ।

सपिण्डीकरणस्य गौणकालमाह ऋष्यशृङ्गः—

सपिण्डीकरणश्राद्धमुक्तकाले न चेत्कृतम् ।
रौद्रे हस्ते च रोहिण्यां मैत्रभे वा समाचरेदिति ॥

अथ सपिण्डीकरणेतिकर्त्तव्यतामाह याज्ञवल्क्यः—

गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥
येसमाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् इति ।

प्रेतपात्रोदकं किंचिदवशेषं त्रिधा विभज्य पितृपात्रेष्वासिच्य प्रेतार्घ्यपात्रावसिष्टोदकेन प्रेतस्थानब्राह्मणहस्तेऽर्घ्यो देय इति व्याख्यातारः। कात्यायनोऽपि—ततः संवत्सरे पूर्णे चत्वारि पात्राणि सतिलगन्धोदकैः पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य, प्रेतपात्रं पितृपात्रेषु सिञ्चति येसमाना इति द्वाभ्यामेतेन पिण्डो व्याख्यात इति। तदेतदाहुर्मूलकाराः ।

चत्वारीहार्घ्यपात्राणि अर्चयेत्पूर्ववच्छुचिः ।

प्रेतपात्रं पितृणां तु पात्रेषु निर्वपेद् बुधः ॥
मधुव्राता ऋचं जप्त्वा संगच्छध्वमिति ब्रुवन् ।
ये समाना इति द्वाभ्यां केचिदिच्छन्ति सूरयः ॥
एवं पिण्डेषु कर्त्तव्यं चरमं तु विसर्जयेदिति ॥

व्युत्क्रममृतेषु तु सपिण्डीकरणं नास्ति, किन्तु पितरि प्रेते पितामहे च जीवति पितुरेकपिण्डमेकोद्दिष्टविधानेन विधाय पितामहस्य पितृपितामहप्रपितामहेभ्यः पार्वणविधिना दद्यात् । एवं गोब्राह्मणादिहतस्यापि सापिण्डाभावः, दार्शिकाब्दिकादौ एकोदिष्टपार्वणयोरनुष्ठानं चेति विज्ञानेश्वरमतम् ।

ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसाविति ।

कात्यायनवचनं चात्रोपष्टम्भकम् । स्मृतिचन्द्रिकाकारप्रभृतयस्तु–पितामहे जीवति प्रपितामहादिना सपिण्डनं कार्यमित्याहुः । तथाच मनुः–

पिता यस्य तु वित्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहमिति ॥

विष्णुरपि–यस्य पिता प्रेतः स्यात्स पित्रे पिण्डे निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति। स्मृत्यर्थसारे-व्युत्क्रममृतानां सपिण्डीकरणं कार्यं नवेति मतद्वयमप्युपनिबद्धम् । अत्र च विभक्तानामपि न पृथगधिकारः किंतु ज्येष्ठेनैव कर्त्तव्यमिति ।

नवश्राद्धं सापिण्डत्वं श्राद्धान्यपि च षोडश ।
एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥

इतिवचनात् । ज्येष्ठासंनिधाने तु य एव सपिण्डः समानोदको वा सन्निहितः स दशाहान्तं कुर्यात् । यत्तु—

कनीयसा कृतं कर्म सापिण्डीकरणं पुनः ।
तज्ज्यायसापि कर्त्तव्यं प्रेतशब्दं विहाय तु इति ॥

तत्कनीयसः साग्नित्वे पिण्डपितृयज्ञानुरोधेन सपिण्डीकरणस्यावश्यकर्त्तव्यत्वात्तद्विषयकम्, अनग्निकस्तु कनीयान् सपिण्डीकरणं न कुर्यादेवेत्यन्यत्र विस्तरः ।

उशनाः—

एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा
अहन्येकादशे प्राप्ते पार्वणं तु विधीयत इति ।

इदं च शूद्राणामप्यमन्त्रकं द्वादशेह्नि मासे गते वा कार्यम् । अन्वारोहणे सहगमने तु स्त्रियाः पृथक् सपिण्डी करणं न कार्यम् । भर्त्तुः कृते स्त्रियाश्च कृतं भवति ।

तदाह श्राद्धकल्पे आपस्तम्बः—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।
पृथक् पिण्डप्रदानं न तस्मात्पत्नीषु युज्यते ॥
चतुर्थीहोममन्त्रैः स्त्री पत्युर्देहार्द्धतां व्रजेत् ।
अतो धर्मे च पिण्डे च भवेत्तस्यार्द्धभागिनी ॥
मृते पितरि मातुस्तु न कुर्यात्सहपिण्डताम् ।
भर्त्तुरेव सापिण्डत्वे तस्या अपि कृतं भवेद् इति ॥

अस्यार्थः, एकस्यामेव तिथौ एकचित्यां समारूढयोर्दम्पत्योः पतिपिण्डदानसमय एव द्वयोर्नामग्रहणं कार्यम् । न पृथक् मातुः पिण्ड-

दानम् । पितृपिण्डदानेनैव तस्या अपि जातत्वादिति ।

तदुक्तं चन्द्रप्रकाशे–

एकचित्यधिरोहश्चेत्तिथिरेकैव जायते ।

एकपाकेन पिण्डैक्ये द्वयोर्गृह्णीत नामनी इति ।

स्मृत्यर्थसारे–अन्वारोहणैकादिनमरणे स्त्रियाः पृथक् सपिण्डीकरणं न कार्यम् । भर्तुश्च कृते स्त्रियाश्च कृतं भवतीति । अनुगमने तु मातुः सपिण्डीकरणं पत्यैव सह कार्यम् ।

तदाह शातातपः–

मृता याऽनुगता नाथं सा तेन सहपिण्डनम् ।

अर्हति स्वर्गवासेपि यावदाभूतसंप्लवम् ॥

अन्वारोहणे तु पुत्रः स्वपित्रैव मातुः सापिण्ड्यं कुर्याद् इति विज्ञानेश्वरः ।

यमोपि–

पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः ।

सा मृतापि हि तेनैक्यं गता मन्त्राहुतिव्रतैरिति ॥

पत्या चैकेनेत्यत्र पतिपदं पत्युः पित्रादीनामुपलक्षणार्थमित्येके । एतेन पत्यैव न तत्पित्रादिभिः सहेत्यन्ये ।

हारीतोऽपि–

स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः ।

एकत्वं या गता यस्माच्चरुमन्त्राहुतिव्रतैरिति ॥

तदेतत्पृथक्चित्यारोहणविषयम् । एकचित्यारोहणे पतिसापिण्डनेनैव तस्या अपि कृतत्वादिति शङ्खधरः । पतिमुद्दिश्य दिनान्तर-

मरणविषयमिति गोविन्दराजः । दिनान्तरमृते पुत्रः स्वपितृपितामह-पिण्डमध्ये कुशानन्तर्धाय पित्रैकेन मातुः सपिण्डनं कुर्यादिति स्मृत्यर्थसारः । पत्युद्देशेन मातुरग्निप्रवेशमरणविषयमिति मदनोपि । अथ सहगमनानुगमनातिरिक्तं प्रकारान्तरेण मरणे मातुः सपिण्ड्यं केन सहेत्यपेक्षायामाह शङ्खः—

मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः ।
पितामह्यादिभिः सार्द्धं सपिण्डीकरणं स्मृतम् ॥

शातातपोपि—

पितामह्या सहैवास्याः सपिण्डीकरणं स्मृतम् ॥

छन्दोगपरिशिष्टे—

मातुः सपिण्डीकरणं पितामह्या सहोदितमिति ॥

तदेतद्ब्राह्मादिविवाहोढाविषयमिति चिन्तामणिः ।

श्राद्धकल्पे यमस्तु—

जीवत्पिता पितामह्या मातुः कुर्यात्सपिण्डनम् इति ॥

मृतपितृकस्य विकल्पमाह यम एव—

प्रमीतपितृकः पित्रा पितामह्या थवा सुत इति ।

ब्राह्मादिविवाहोत्पन्नः पित्रा पितामहेन पितामह्या वा विकल्पेन कुर्यादिति विज्ञानेश्वरः । अत्र सर्वत्र पितामहीपदं प्रपितामहीवृद्ध-प्रपितामह्योरुपलक्षणम् । पितामह्यादिभिः सार्द्धमिति शङ्खोक्तेः । शातातपस्तु पक्षान्तरमाह—

तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिण्डनम् इति ।

अस्यार्थः, तस्या मातुर्मात्रा मातुरेव पितामह्या तच्छ्वश्र्वा तस्या

मातृपितामह्या या श्वश्रूर्मातुः प्रपितामही तयेत्यर्थः। पूर्वस्यां जीवन्त्यामुत्तरोत्तरयेति वाशब्दार्थमाह **मदनः**—आसुरादिविवाहेषु मातामह्यादिभिरेवेति वाशब्दार्थ इति सर्वे एव।

आसुरादिविवाहेषु विन्नानां योषितां स्मृता।

इति तेनैवोत्तरार्द्धेनाभिधानात्।

पक्षान्तरमाह **सुमन्तुः**—

पिता पितामहे योज्यः संपूर्णे वत्सरे सुतैः।

माता मातामहे तद्वदित्याह भगवान् शिव इति॥

तदेतत्पुत्रिकापुत्रविषयमिति बहवः।

तदाह **बौधायनः**—

आदिशेत्प्रथमे पिण्डे मातरं पुत्रिकासुतः।

द्वितीये पितरं तस्यास्तृतीये च पितामहम् इति॥

आसुरादिविवाहोत्पन्नः पुत्रिकासुतश्च मातामहेनैवेति **विज्ञानेश्वरोपि**।

अथापुत्रायाः पत्न्याः सापिण्डनमाह **पैठीनसिः**—

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम्।

श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्॥

अस्याः श्वश्र्वादिभिः स्वमात्रादिभिरिति सर्वसंमतोर्थइति।

तदुक्तं **व्यासेन**—

अपुत्रायां मृतायां तु पतिः कुर्यात्सापिण्डनम्।

स्वस्य मात्रादिभिः सार्द्धमेवं धर्मेण युज्यत इति॥

एवं विरुद्धेषु वचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्त्ता स्वमात्रैव सापिण्ड्यं कुर्यादिति **विज्ञानेश्वरोपि**।

अथापुत्रस्य भर्तुः पत्न्या सापिण्ड्यं कार्यमित्याह लौगाक्षिः-

सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममन्त्रकम् ।
सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च इति ॥

सुमन्तुरपि-

अपुत्रे संस्थिते कर्ता नास्ति चेत् श्राद्धकर्मणि ।
तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा इति ॥

अथ वृद्धिश्राद्धमाह । याज्ञवल्क्यः-

एवं प्रदक्षिणावृत् कौ वृद्धौ नान्दीमुखान् पितॄन् ।
यजेत दधिकर्कन्धूमिश्रान् पिण्डान् यवैः क्रियाः ।

आवृत् परिपाटी । पिण्डानिति दत्त्वेति शेषः । यवैरिति तिलसाध्याः क्रिया यवैः कुर्यादित्यर्थः । अत्र विशेषमाह आश्वलायनः अथाभ्युदयिके युग्मा ब्राह्मणा अमूला दर्भाः प्राङ्मुखो यज्ञोपवीती स्यात्प्रदाक्षिणमुपचारो यवैस्तिलार्थो गन्धादिदानं द्विर्द्विः ऋजुदर्भानासने दद्यात् यवोसीति स्वाहान्तेन मन्त्रेण यवापवनं विश्वेदेवा इदं वोऽर्घ्यं नान्दीमुखाः पितर इदमर्घ्यमिति यथालिङ्गमर्घ्यदानं पाणौ होमः अग्नये कव्यवाहनाय स्वाहा, सोमाय पितृमते स्वाहेति, मधुवाता इति ऋचः स्थाने उपास्मै गायतेति पञ्च मधुमतीः श्रावयेदक्षन्नमीमदन्तेति च षष्ठीमाचान्तेषु भुक्ताशयान् गोमयेनोपलिप्य तेषु प्राचीनाग्रान् दर्भान् संस्तीर्य तेषु पृषदाज्यमिश्रेण भुक्तशेषणैकैकस्य द्वौ द्वौ पिण्डौ दद्यादिति । इदं च श्राद्धत्रयं तत्र क्रममाह शातातपः—

मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् ।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतमिति ॥

आश्वलायनः—

माता पितामही चैव संपूज्या प्रपितामही ।
पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ।
एतेन वार्द्धनीयाः स्युः पितरोऽभ्युदये द्विजैरिति ।

अस्य मुख्यकालमाह वशिष्ठः–

पूर्वेद्युर्मातृकं श्राद्धं कर्माहे पैतृकं तथा ।
उत्तरेद्युः प्रकुर्वीत मातामहगणस्य त्विति ॥

वृद्धशातातपः–

पृथग्दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे ।
श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति ॥

तत्राप्यशक्तौ वृद्धमनुः—

अभावे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः ।
पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकमिति ॥

इदं गर्भाधानमारभ्य पुत्रस्य प्रथमविवाहावधि पित्रा कार्यम् तदुपरि पुत्रेणेत्यादि हेमाद्रौ स्फुटम् । अत्र च पित्रादयस्त्रय एव नान्दीमुखसंज्ञका इत्यवधेयम् । यत्तु–

पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयस्त्वश्रुमुखा ह्येते पितरः सम्प्रकीर्त्तिताः ।
तेभ्यः पूर्वे त्रयो ये तु ते तु नान्दीमुखाः स्मृताः ।

इति वचनं तद्भाद्रपदपूर्णिमायां विहितं यत् श्राद्धं तन्मात्रविषयकम् । तथाच ब्रह्मपुराणे–

नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्त्तव्यं वराहवचनं यथा ।
ये स्युः पितामहादूर्ध्वं ते स्युर्नान्दीमुखास्त्विह इति ।

पितामहशब्देन प्रपितामहो लक्ष्यते । तस्मात्प्रौष्ठपदीमुपक्रम्यै-वेत्थमभिधानादन्यत्र नान्दीश्राद्धे पित्रादीनामेवोपादानमिति हेमाद्रि-पारिजातादिनिबन्धेषु स्फुटतरमेतत् । यद्यपि श्राद्धविषये प्रकीर्णकं बहुतरं वक्तव्यमस्ति तथापि विस्तरभयादुपरम्यते । ग्रन्थान्ते महर्षिन-मस्काररूपं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति—

मनवे याज्ञवल्क्याय विश्वामित्राय चात्रये ।
विष्णवे च वशिष्ठाय व्यासायोशनसे नमः ॥
बौधायनाय शङ्खाय दक्षायाङ्गिरसे तथा ।
आपस्तम्बाय वत्साय हारीताय नमो नमः ॥
बृहस्पते ! नमस्तुभ्यं नारदाय महात्मने ।
पराशराय गार्ग्याय गौतमाय यमाय च ॥
शातातपाय शाङ्ख्याय संवर्त्ताय नमो नमः ।
चतुर्विंशतिसंख्येभ्यो मुनिभ्योस्तु नमो नमः ॥

इदं च मङ्गलाचरणं मुन्युपदिष्टधर्मसंग्राहकं तच्छिष्यकर्त्तृकम् । अ-र्थस्तु फुटएव ।

सर्ववेदैकवेद्याय सच्चिदानन्दमूर्त्तये ।
नमो नमः परेशाय विष्णवे प्रभविष्णवे ॥
तेनैव प्रेरितो यद्यदचरीक्रम चापलम् ।
तत्क्षम्यतांस एवैत दन्तर्यामी महेश्वरः ।

* इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां चतुर्विंशतिमुनिमतव्याख्यायां श्राद्धकाण्डं सम्पूर्णम् ।

* अस्य ग्रन्थस्य सत्स्वपि बहुषु खण्डेषु.. कृतेऽपि तत्प्राप्तिप्रयासे, संप्रत्युपलब्धं खण्डद्वयं लोकोपकारितया व्ययेनापि प्रकाशितम् । अन्यान्युपलभ्यमानान्यपि खण्डानि सत्वरमेव प्रकाशयिष्यन्ते ।

विज्ञापनम् ।

बनारससंस्कृतसीरीज़्नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चान्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहिते खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०